

॥ श्रीः ॥

सम्प्रदायप्रदीपः ॥

—*—

एट्टूर् इम्मडि तिरुमलै लक्ष्मीकुमार कोटिकन्यकादान
श्रीदेशिकताताचार्य नन्दन
मीमांसार्णव मीमांसाकेसरि पूर्वोत्तरतन्त्रप्रदीप
देशिकदर्शनधुरन्धर पण्डितराज
तिरुमलैताताचार्य
न्यायमीमांसाशिरोमणि प्राच्यविद्येश्वर
विरचितः ।

न्यायवेदान्तकेसरि
मधुरान्तकं श्री वीरराघवाचार्यस्वामि साहाय्येन
तिरुवैयारु नगरस्थ
श्री श्रीनिवास मुद्रणालये
मुद्रितः

जय-कन्या १९५४.

मूल्यम्] [रू. 1—0—0



॥ श्रीः ॥

श्रीमते रामानुजाय नमः

भूमिका ।

श्रीवैष्णवानां गोष्ठीषु चिरादचिराद्वाङ्कुरिताः साम्प्रदायिकार्थ-विषया वादप्रतिवादाः क्रमेण वर्धमाना एव दृश्यन्त इति विदन्ति विश्वेऽपि। ते चार्थाः पात्रपद्यं, प्रणामः, प्रदक्षिणम्, प्रपत्तिः, पद्धा, पुण्ट्रः पञ्च यज्ञाः, इत्येतेऽन्ये च के चन। तेषु विशिष्य निर्दिष्टा इमे पादिप-दार्थाः वादिभिः कलुषिताः पूर्णविपदाद्यर्था भवन्ति कलाद्वयस्यापि। 'अन्तश्छिद्राणि भूयांसि .....' इति ह्याहुः। ततस्तत्र तत्त्वबुभुत्सया कैश्चिदर्थिताः विश्वविश्रुतवैदुष्यातिशयाः श्रीमत्तातार्याचार्यस्वामिनः लोकस्य तत्त्वालोकाय सम्प्रदायप्रदीपमिमं प्रदिशन्ति। रामानुजदयापात्रपद्य-विषये विश्वविदितविविधपरीक्षाविशोधिते प्रवर्तितोऽयं प्रदीपः—

... ...

'श्रुतविविधपरीक्षाशोधिते क्वापिपात्रे।
अनघगुणदशायामाहितस्नेहमार्द्रैः
प्रदिशति निरपायं सम्प्रदायप्रदीपम् ॥'

इत्याचार्यकृत्याधिकारश्रीसूक्ति नामतो विषयतश्चानुस्मारयति। प्रदी-पोऽयं वादिव्यतिरिक्तानां आलोकमुपजनय्य उपकरिष्यतीति निश्च-प्रचम्। वादिनस्तु तत्त्वार्थं कण्ठे नियच्छन्तः स्वान्तस्तापपरीवाहानु-रूपैः मिथो व्याहृतैरेव व्यवहारैः दन्तादन्ति प्रवर्तयन्तीति तेषां अयं प्रदीपो नेत्रातुरस्येव प्रतिकूल एव भविष्यति।

1578 तमे वर्षे राजवोडयार्प्रभोः राज्याधिपत्यम्। 'तस्मात् प्रभो-रारभ्य रामानुजदयापात्रपद्यं यदुगिरिक्षेत्रे तिरुनारायणसन्निधौ तथा

इतरसन्निधिष्वपि प्रबन्धानुसन्धानसमये यथानुवृत्तं तथा इदानीमपि तथैव रीत्या अनुवर्तनीयम्' इति राजकीयं शासनं पात्रपद्यावतारस्य विविधकल्पनं सुदूरतो निरस्यति । हन्त राजकीयशासनस्वरूपमेवान्यथयद्भिः "किं नवीनं किं प्राचीनमिति न वयं विद्मः ; न च वेदितुं प्रभवामः ; यद्वा तद्वा स्वैरमुच्यतां भक्तैः ; ये तावदाक्षिप्य युद्धसन्नद्धा भवन्ति ते नियतं दण्ड्येरन्' इति 'एतादृशमेव निर्धारणं तत्र निष्पन्नम्" इति एवमादिभिः स्वपरातिसन्धानवाक्यैरेव पूर्यन्ते पात्रपद्यानुबन्धिनो वादिभिर्निबन्धाः । मैसूर्-राजकीयशासनकाले 1709तम कि. पि. वर्षे श्रीशैलपद्यानुसन्धानं यदुगिरिक्षेत्रे नासीदित्येव दर्शितशासनादवगम्यते ।

अनन्तरकाले तदपि तत्र सम्पादितास्पदमिति तु अन्यत् । रामानुजपद्यं तु इतः 376 वर्षेभ्यः पूर्वं सिंहासने स्थितस्य राजवोडैयार्-महाराजस्य काल एवानुसन्धीयमानमभूदिति सार्वभौमी स्थापना ।

ततः प्राक्तनी स्थितिरद्य विमृश्यते । कि. पि. 1338 बहुधान्यवत्सरे 'सुश्लोकोऽवततारदिव्यमहिमा रामानुजोक्त्यादिमः' इति द्वैतीयीकब्रह्मतन्त्रस्वतन्त्रस्वामिनां द्वादशसाहस्री । कृतिरियं तार्तीयीकैः ब्रह्मतन्त्रस्वतन्त्रगुरुभिः त्रिसहस्रीग्रन्थे तत्र तत्र विशिष्य तत्तद्वचननिदर्शनपूर्वकं प्रमाणीक्रियते । अथ च 1550 तमवर्षे स्थितैः वात्स्याहोबिलगुरुभिः रामानुजपद्यादितनियन् व्याख्यायां तत्र तत्र सेयं द्वादशसहस्री विशेषत उदाह्रियते, तथा तदुत्तरकालिकैः चन्द्रगिरिवेङ्कटदेशिकैरपि रामानुजपद्यव्याख्यातृभिश्च । तथैव प्रबन्धनिर्वाहो नाम निबन्धोऽपि देशिकस्य साक्षाच्छिष्यैः तिरुमलै श्रीनिवासाचार्यैरनुगृहीतः त्रिभिरप्येतैः स्वनिबन्धनेषु विशिष्य निदर्श्यते । 'किञ्च प्रबन्धनिर्वाहे नातिसङ्क्षेपविस्तरः' इति वात्स्यगुरुव्याख्योपक्रमः ।

प्रबन्धनिर्वाहनिबन्धो
विश्वपुस्तकालयेऽद्या
'द्वे चक्षुषी तदनुभा
वादिनो लिखन्ति—
संग्रहो यत्र यत्र
परीक्ष्यताम्, रामा
न सुलभमिति सश
इति । अत्र शतप
प्रदीपे (42 पु)।
"महीशूरपुर
विस्रब्धं विलिखा
मठेषु वा तत्रैकल
सुलभम्' (रा-पा.
विद्यायां वैदग्ध्यं
श्रीकार्यम् कस्तूरी
तन्त्रगुरुभिः वि
कस्य 'संग्रहेण म
कोक्तिः, तदातन
इति प्रत्यूचुः । 1
कालः ताळकोश
वात्स्याहो
वात्स्यगुरवः
ठास्थाने पञ्चदश
भन्ते । तेषां स
महाराजसमका

बन्धनिर्वाहनिबन्धोऽयं रामानुजपाद्मपद्माङ्कितः मद्रपुरीयराजकीय-
श्वपुस्तकालयेऽद्यापि दृश्यः। अतो द्वादशसाहस्री प्रबन्धनिर्वाहश्चेति
द्वे चक्षुषी तदनुभावमवेक्षितुं नः।' यदत्र शिक्षणीयसत्यवचनाः
ादिनो लिखन्ति—'राजकीयपुस्तकालयेष्वेव परं न; प्राचीनतालकोश-
संग्रहो यत्र यत्र विद्यालयेषु मठेषु वा वर्तते तत्र सर्वत्रापि कामं
परीक्ष्यताम्, रामानुजदयापात्रपद्यलेखनशालिपुस्तकं एकत्राप्येकमपि
न सुलभमिति सशपथं ब्रूमः।' (रामानुजदयापात्रपद्यचरित्रम् पु. १५)
इति। अत्र शतपथोऽपि शपथो मुधेति प्रतिष्ठापितमिह सम्प्रदाय-
प्रदीपे (42 पु)।

"महीशूरपुर्यां (Mysore) अन्यत्र च सुचिरं परीक्ष्यैव एवं
विस्रब्धं विलिखामः— प्राचीनतालकोशसंग्रहो यत्र यत्र विद्यालयेषु
मठेषु वा तत्रैकत्रापि रामानुजपात्रपद्यलेखनशालि पुस्तकं एकमपि न
सुलभम्' (रा-पा. चरित्रम् 15 पु) इति स्वैरं लिखन्तः परातिसन्धान-
विद्यायां वैदग्ध्यं वितन्वन्ति वादिनः। अत्र पात्रपद्यतत्त्वनिरूपणे
श्रीकार्यम् कस्तूरीश्रीनिवासरङ्गाचार्यस्वामिनोऽपि—'द्वितीयब्रह्मतन्त्रस्व-
तन्त्रगुरुभिः विस्तरेण व्याख्यातस्य 'रामानुजदयापात्रम्' इत्यादिश्लो-
कस्य 'संग्रहेण मया [वात्स्याहोबिलाचार्येण] व्याख्या क्रियते।' इत्यर्थ-
कोक्तिः, तदातनप्राचीनकोशेषु इतःपरं मुद्रितेषु च कोशेषु सर्वत्र दृश्यते"
इति प्रत्यूचुः। 1709 तम वत्सररूपः प्रकृतपद्यविषये राजकीयनिर्णय-
कालः तालकोशकाल एव किल।

वात्स्याहोबिलगुरुविषये विपर्यासं प्रदर्शयन्ति वादिनः। त एते
वात्स्यगुरवः ज्ञानाब्धिब्रह्मतन्त्रपरकालमुनीनां स्वाचार्याणां परकालम-
ठास्थाने पञ्चदशानां मङ्गलाचरणपूर्वकं रामानुजपद्यादिव्याख्यानमार-
भन्ते। तेषां साक्षात् शिष्या इमे 1550 तमे वर्षे आसन्। राजवोडयर्
महाराजसमकालिका इति प्रपञ्चिते तत्त्वे अदर्शनमभिनयन्तो हन्त

तत्त्वापह्नवे प्रवर्तन्त इत्यतिसाहसमेतत् । अतः एतदुदाहृत 'प्रबन्धः निर्वाह' 'द्वादशसहस्र' निबन्धनानुरोधात् 1338 कि. पि. रामानुज-पात्रपद्यकाल इति सुस्थम् ।

श्रीशैलेशाष्टकं नाम श्रीशैलेशदयापात्रपद्यविषया काचन अल्पाकृतिः देवराजार्यकृतत्वेन प्रथते ।, अस्याः शब्दार्थदोषजटिलत्वात् तेन विद्वद्वरेण्येन कृतत्वे अभिज्ञा अतीव विप्रतिपन्नाः । अथापि तेन्कलाजन एव कश्चित कर्तेत्यत्र नास्ति संशयः । तत्र अष्टमे श्लोके वेदारम्भे उच्चार्यमाणयोः हरिः ओम् इत्यनयोर्मध्ये यथा कृष्णेति पदं नोच्चारणीयं तथा प्रबन्धारम्भे श्रीशैलेश, लक्ष्मीनाथ, इत्यनयोर्मध्ये अन्यत् पद्यं न पठनीयमिति श्रीरङ्गनाथस्यादेश इत्युच्यते । तेन तयोर्मध्ये किमपि पद्यं पठ्यमानमासीत्, तत्प्रतिषेधाय इहैवमुच्यत इति स्पष्टमेतत् । प्रसक्तं हि प्रतिषिध्यते । तत्र किं तत् पद्यमिति विमर्शे 'रम्यजामातृ' इत्युपक्रमं तत् तेन्कलासम्प्रदायस्थैः कैश्चिदनुसन्धीयत इति तद्दूषणायैव इयं कृतिः प्रवृत्तेति च तदीया एव वदन्ति । रामानुजदयापात्रम, लक्ष्मीनाथसमारम्भां, इत्येव देशिककालात् प्रभृति अनुसन्धानक्रमे स्थिते वरवरमुनिशिष्यैः प्रथमं श्रीशैलेशपद्यमनुसन्धाय ततः परं रामानुजदयापात्रं, लक्ष्मीनाथसमारम्भां, इति प्राचीनक्रमागतपद्यानुसन्धानं क्रियमाणमासीत् यथेदानीं केशवार्यकृपापात्रं, रामानुजदयापात्रम, इति श्रीसन्निधिसम्प्रदायस्थैः । काले गच्छति देशिकद्वेषे विवृद्धे श्रीशैलेश, लक्ष्मीनाथ, इत्यनयोर्मध्येऽनुसंहितं रामानुजदयापात्रपद्यं पर्यत्यजन् । अस्य परित्यागस्य न्याय्यत्वसमर्थनसंरम्भवतैव केनचिन् एवं मिथ्या भगवदादेशो निबद्धः, परन्तु स्वकीयमसामर्थ्यमात्रं प्रकटितमभूत्, इत्यप्यत्र प्रतीतिर्भवति । तथा चेत् देशिकपात्रपद्यप्राचीनत्वे इदमपि प्रबलं प्रमाणम् । देवराजार्यकृतत्वे तु सुतराम् ।

असकृल्लिखन्ति वादिनः— "वडकलाः नादितो द्राविडाः। ते हि केवलं कर्मठाः, वेदान् अधीयते, यजन्ति, जुह्वति, असकृत् प्रणमन्ति भगवन्तं भगवद्भक्तांश्च । देवालयेषु क्वचिन्निभृतमुपविश्य जपादि-मिरुपासते । गङ्गामवगाहन्ते, निमज्जन्त्यम्भोधौ, पञ्चगव्यं प्राश्नन्ति' द्राविडवेदवैदेशिका अमी । अस्माकं तु सम्प्रदायस्थितिः इतः सार्ध-शतद्वयवत्सरतः प्राक् वेङ्कटाध्वरिणा प्रणीते विश्वगुणादर्शे सुप्रसिद्धा। 'सोऽयं कविः स्वकीये जीवितकाले स्वचक्षुषा यां स्थितिमैक्षत तामेव ग्रन्थतो निबबन्धेति निश्चीयते। स एष देशचरितप्रकाशकोमहाग्रन्थः।' तेन्कलाख्यान् प्रति इत्थं सुस्पष्टं प्रतिपादयति कविः— 'मुञ्चन्तः पञ्च यज्ञान्' इत्यादिना- 'मुञ्चन्तः पञ्च यज्ञान्' वयमेव । 'द्रविड-फणितिमिर्मोहयन्तोऽनभिज्ञान्' वयमेव । 'घण्टाघोषं त्यजन्तो हरिप-रिचरणे सर्वलोकाविगीतं' वयमेव । 'ख्यातं त्रैलोक्यमातुः श्रुतिभिर-भिहितं वैभवं खण्डयन्तः' वयमेव । 'केचिद्विप्लावयन्ते जगत्' ते वयमेव । 'न गाहन्ते गङ्गामपि' वयमेव ते । 'न मज्जन्त्यम्भोधौ' वयमेव ते । 'चम्पूग्रन्थोऽयं देशचरितप्रकाशकः, स्वचक्षुषा यां स्थितिमवैक्षत कविः तामेव ग्रन्थतो निबबन्धेति निश्चीयते" इति। अत्र प्रतिवक्तारः तेन्कलाश्रीवैष्णवा एव । श्रीमद्भट्टपराशरवंश्येषु घण्टाघोषः स्वगृहाराधनेष्वद्याप्यनुवर्तते। गङ्गास्नानादिकं चानुतिष्ठ-न्त्येव । 'स्मर्यन्ते पञ्च यज्ञा मुनिभिरपि नमस्कारमन्त्रेण शूद्रे' इति एकजातीनामप्यवर्जनीयाः पञ्च यज्ञाः । तेन्कलापुरुषान् सर्वानपि आत्मीयान् पश्यन्तो नास्तिकयन्ति वादिनः । सदेशिकाः द्राविडवे-दवैदेशिका इति साहसलेखनमुपहास्यम् । देशिकसम्प्रदायसिन्धुः त्रिपथगेव त्रेधा प्रवहतीति प्रसिद्धम् । ये न गाहन्ते गङ्गां ते त्रिपथ-गामिमां न गाहन्त एव । 1) श्रीपरकालमठसम्प्रदायः परकालमुनेः दास्य नाम्ना विश्रुतो विजयते । 2) श्रीमदहोबिलमठसम्प्रदायः अवयवि-भूतस्य श्रीशठकोपमुनेः दास्यनाम्ना प्रथितोऽनुवर्तते। 3) श्रीमन्मुनि-

*

त्रयसम्प्रदायस्तु सरोमुनि-भूतमुनि-महदाह्वयमुनिरूप-मुनित्रयनाम्ना विद्योतते । व्याकरणवद्विशिष्टाद्वैतमपि मुनित्रयदर्शनम् । दिव्यसूरिषु आदिमुनित्रयम्, अचार्येषु श्रीमन्नाथयामुनयतीन्द्राख्यं मुनित्रयमिति तन्त्रेण तदुभयनाम्ना मुनित्रयसम्प्रदाय इति व्यवह्रियते ।

श्रीमद्रहस्यत्रयसारस्यारम्भे आचार्यमुनित्रयं, अवसाने दिव्यसूरिमुनित्रयं च दर्शनप्रवर्तकमिति विशिष्य स्तुतम् । 'पाट्टुक्करियपळैयवरमूवरै' इतीदमिहानुसन्धेयम् । महीशूरराजकीयशाखायां मुद्रिते श्रीमन्महाराजवंशावळीग्रन्थे 'दोड्डकृष्णराजप्रभुः तिरुपतिक्षेत्रे स्थितान् मुनित्रयसम्प्रदायधुरन्धरान् महापरकालगुरून् तत आनाय्य समाश्रयणादिश्रीवैष्णवदीक्षामङ्गीकृत्य' इत्यादिकं दृश्यते । तदिदं पात्रपद्यतत्त्वनिरूपणे श्रीकार्यस्वामिभिः प्रकाशितम् । परकालमठीयाः मुनित्रयसम्प्रदायप्रवर्तका इति महाराजवंशावळीसिद्धम् । विशिष्य च 'श्रीमन्नाथमुनिश्रीमद्यामुनमुनिश्रीमद्रामानुजमुनिरूप-मुनित्रयसिद्धान्तस्थापनाचार्याः इत्यनुसन्धानं देशिकसम्प्रदायस्थेष्वेव दृश्यते । 'नाथोपक्षं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धैस्त्रातं सम्यग्यतीन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः' इति देशिकदर्शनं मुनित्रयसम्प्रदाय इति व्यपदिश्यते । किं बहुना देशिकसम्प्रदायस्थानां द्राविडवेदनिष्ठत्वं "श्रीवैष्णवसमयाचारनिष्कर्ष'कर्त्रापि नापलप्यते तदाह — सदाचार्यविवेके — "द्राविडवेदादिदिव्यप्रबन्धान्वितेषु श्रीवैष्णवकुलस्थेष्वपि' इति । 'श्रीमन्नाथमुनीन्द्रवंश्ययतिराडब्धीन्दुतत्प्रेरितश्रीमच्छ्रीकुरुकेशवल्लप्रशठजिद्वेदान्तभाष्यं शुभम्' तत्कालादारभ्य सम्प्रदायक्रमेणाधीयानाः देशिकसम्प्रदायस्थाः षट्सहस्रीभाष्यपरित्यागिभिः वेदान्तसम्प्रदायवैदेशिकैर्वादिभिरमीभिः दूष्यन्त इतीदं भूषणमेव । अनाघ्रातशैवसंस्कारैः अपरिचिता वैष्णववर्त्मभिः सप्तपूरुषविख्यातैः श्रीवैष्णवाग्रगण्यैराचार्यैः आदित आरभ्याद्यपर्यन्तं प्रवर्त्यमाने वडकलासम्प्रदाये का नाम द्राविडवेद-

वैदेशिकता । श्रीपाञ्चरात्रे भारद्वाजसंहितायां मुख्यगौणाचार्यविभागः स्पष्टीकृतः—

'सप्तपूरुषविख्याते सन्ततैकान्तिनिर्मले ।
कुले जातो गुणैर्युक्तो विप्रश्रेष्ठतमो गुरुः ॥ 39 ॥

स्वयं वा भक्तिसम्पन्नो ज्ञानवैराग्यभूषितः ।
स्वकर्मनिरतो नित्यं अर्हत्याचार्यतां द्विजः ॥ 40 ॥ इति ।

यतीन्द्रमाहानसिककुरुकेशरादयः श्रेष्ठतमा गुरवः । तदिदं उभयसम्प्रदायगुरुपरम्परासु सिद्धं सम्प्रतिपन्नं नापलपितुं क्षमम् । देशिकात् पूर्वतनवद् देशिकवच्च तस्य शिष्यप्रशिष्यादयः परकालाहोबिलमुनित्रयसम्प्रदायस्थाः सर्वेऽपि अनादिश्रीवैष्णवाः सप्तपुरुषविख्याता इति वस्तुस्थितिः । 'अविच्छिन्नसत्सम्प्रदायार्थवेदी गुरुर्वेङ्कटेशो गुरूक्तिष्ववतुल्यः' इति हि श्लाघितो देशिकसम्प्रदायः सप्ततिरत्नमालिकायाम् । 'आर्तोपच्छन्दनं गद्यं भाष्यं तु पररञ्जनम्' इति वादिगोष्ठीगरिष्ठैः स्वयमर्जिता संस्कृतवेदान्तवैदेशिकत्वपताका षट्सहस्रीभाष्यवैदेशिकत्वं च सम्मतम् । अतः उभयवेदान्तवैदेशिका वादिनः ।

प्रणामविषये युग्मप्रणाम एव प्रामाणिकः साम्प्रदायिकश्चेति वङ्गीशकारिकासु नानास्थलोदाहरणपूर्वकं प्रतिष्ठापितमिह (99 तम पुटे) प्रणम्योत्थायोत्थाय पुनः पुनः प्रणम्य' इति श्रीवैकुण्ठगद्यसूक्तिः 'नीळातुङ्गे'ति श्लोकस्य व्याख्यायां असकृत्प्रणामे प्रमाणीकृताऽनन्यथासिद्धेति च दर्शितम् । षट्सहस्रीगुरुपरम्पराप्रभावे श्रीभाष्यकारा असकृत् प्रणेमुरिति बहुषु स्थलेषु कण्ठोक्तम् ।

'आमन्त्रयितुमारेभे चरणावुपगृह्य च । ततः प्रदक्षिणं कृत्वा
भरद्वाजं पुनः पुनः'

इत्यत्र 'प्रदक्षिणविशेषणेन प्रणामस्तु सकृदेवेत्युक्तं भवतीत्याचार्याः'

इति स्वसम्प्रदायं प्रथमं प्रदर्शितवन्तः श्रीगोविन्दराजार्याः 'केचित्तु एकहस्तप्रणामैकप्रदक्षिणयोरिव एकप्रणामस्यापि निषिद्धत्वात् पुनः पुनरिति विशेषणस्यात्रार्थिके वा पूर्वश्लोकोक्ताभिवादनबललब्धे वा प्रणामेप्यन्वयेन न कोपि विरोधः इत्याहुः' इति सोपपत्तिकं पक्षान्तरं समर्थयामासुः। 'निपीड्य मातुश्चरणौ पुनः पुनः। जगाम सीतानिलयं महायशाः' इत्यत्र 'निपीड्य निपीडनपूर्वकमभिवाद्येत्यर्थः' इति स्वयमेव व्याचख्युः। 'रामस्य निपतिष्यामि सीतायाश्च पुनः पुनः' इति पाठभेदः गोविन्दराजार्यैः स्वीकृतश्च। पूर्वस्मिन् आचार्यपक्षे श्रीरामायणपूर्वोत्तरप्रकरणविरोधः प्रमाणान्तरविरोधश्चेति, पक्षान्तरे न कोऽपि विरोध इत्यनेनासूचयन्। प्रदक्षिणविषयेतु अद्य यावदनिर्धारणमेव वादिनां पक्षे दृश्यते। दर्शितश्लोकव्याख्यान एव 'एकं प्रदक्षिणं न कार्यमित्युक्तम्' इति, 'एकहस्तप्रणामैकप्रदक्षिणयोरिव एकप्रणामस्यापि निषिद्धत्वात्' इति च प्रदक्षिणाऽवृत्तिं आचार्याभिमतामाहुः। श्रीवैष्णवसमयाचारनिष्कर्षकर्ता लोकाचार्यशिष्यस्तु सकृत् प्रदक्षिणमेव महता संरंभेण समर्थयति साम्प्रदायिकमिति। लक्ष्मीविभुत्वं श्रीविष्णुचित्तार्यैः पुराणरत्नव्याख्यातृभिः 'यथा सर्वगतो विष्णुस्तथैवेयम्' इत्यस्य व्याख्याने दर्शितम् श्रीसूक्तभाष्ये च वेदान्तिमुनिभिः। (नञ्जीयर्) तदनुसारिणी लोकाचार्यरहस्यश्रीसूक्तिश्च निरदर्शि प्रदीपे।

प्रदीपग्रन्थेऽस्मिन् पात्रपद्यवत् पुण्ट्रादिविषयेऽपि प्रमाणप्रदर्शनपूर्वकं वडकलापुण्ट्रस्यैव हरिपादाकृतित्वमित्यादीनि समर्थ्यन्ते सुबहूनि सम्प्रदायतत्त्वानि। तत्त्वबुभुत्सूनां विशदावलोकनाय कल्पेतायं सम्प्रदाप्रदीपः।

राजकीयकलाशाला
पञ्चनदम्
२९—१०—१९५४

ति. ई. वीरराघवाचार्यः
श्रीमधुरान्तकम्

॥ श्रीः ॥

श्री श्रीनिवासपरब्रह्मणे नमः ।

श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

सम्प्रदायप्रदीपः ॥

—*—

आद्यं गुरुं कमलया कमलायताक्ष-
माचार्यवर्गमपरं च मुहुः प्रणम्य ।
यत्सम्प्रदायमनघं प्रति विप्रलम्भ-
शीलेन दूषणमकथ्यत तत्क्षिपामः ॥

आस्था यद्यास्तिकत्वे यदि रूचिरनघोदारचर्यानुसारे
तृष्णा श्रीवैष्णवश्रीमहिमनि यदि यद्यादरस्तत्त्ववित्तौ ।
श्रद्धा सिद्धान्तशुद्धिं प्रति यदि यदि धीः सर्वलोकोपकारे
धीरा निष्पक्षपाताः स्ववहितमनसः प्राध्वमीक्षध्वमेतत् ॥

1 उपोद्घातः ।

तत्र तावत्

दृष्टेऽपह्नुत्यभावादनुमिति विषये लाघवस्यानुरोधात्
शाब्देनैवावसेये विहतिविरहिते नास्तिकत्वप्रहाणात् ।
नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धै-
स्त्रातं सम्यग्यतीन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः ॥

इति भगवान् निगमान्तमहादेशिकः विशिष्टाद्वैतवेदान्तनामधेयस्य अस्मत्सिद्धान्तस्य इतरसकलसिद्धान्तविलक्षणतां प्रतिपादयामास । प्रमाणशुद्धिः प्रमातृशुद्धिः तदुभयमूला प्रमेयशुद्धिरिति त्रितयमिदं यस्मादस्मत्सिद्धान्ते सम्पन्नं तस्मादयमन्येभ्यः सर्वेभ्यो विशिष्यत इत्युक्तं भवति । यद्यपि 'त्रातं सम्यग्यतीन्द्रैः' इति श्रीमद्भाष्यकारैः अस्मद्दर्शनस्य सम्यक्परित्राणं कृतं आचार्यचरणाः प्रतिपादयन्ति; तथाऽपि

आपादचूडमनपायिनि दर्शनेऽस्मिन्
आशासनीयमपरं न विपक्षहेतोः ।

इतीयं दशा तत्त्वमुक्ताकलापसर्वार्थसिद्धिशतदूषणीप्रभृतिबहुतमप्रबन्ध-निर्मातृभिरेतैरेव महनीयैः सम्पन्नेति वस्तुस्थितिं प्रपश्यद्भिरस्माभिः

नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनादिप्रबन्धैः
सन्त्रातं देशिकेन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः ।

इत्यूहित्वा पद्यमिदमनुसन्धेयमित्यत्र औचित्यं प्रति सर्व एव सुमनसः सम्प्रतिपद्येरन् ।

उपोद्घाताधिकारः ।

बाह्यादिभिश्चिरनिरुद्धनिजप्रकाशो
पाणिन्धमीभवति वेदपथे समीचि ।
श्रीमद्यतीन्द्रकृतिरत्नरुचिप्रचारै-
स्सञ्चारयन् जयति नः कविवादिसिंहः ॥

इति शतदूषणीव्याख्याने चण्डमारुते एकविंशवादारम्भे तत्रभवान् महाचार्यः श्रीदेशिकस्य श्रीमद्वेदमार्गप्रतिष्ठापकत्वमाह ।

अस्मत्सम्प्रदायः उभयवेदान्तश्रिया विराजितः । ईशावास्याद्यु-पनिषदात्मकतया संस्कृतरूप एकः । द्राविडदिव्यसूक्तिरूपोऽपरः । अयं द्राविडवेदान्तो नष्टः पुनर्नाथमुनिना योगबलेन प्रतिलब्धः । शिष्यप्रशिष्यपरम्परया प्रवर्तितश्च । अस्य वेदान्तस्य द्रष्टारं श्रीशठ-कोपमुनिम्

माता पिता युवतयस्तनया विभूतिः
सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्वकुलाभिरामं
श्रीमत् तदङ्घ्रियुगलं प्रणमामि मूर्ध्ना ॥

इति श्रीयामुनाचार्यः स्वकीयस्तोत्रारम्भे प्रणतवान् । भगवद्भाष्यकारः पुनः केनापि कारणेन दिव्यप्रबन्धेषु वा तत्कर्तृषु दिव्यसूरिषु वा यं कमपि स्वग्रन्थेषु यत्रकापि सकृदपि नोदाजहार । तथापि

'ठयाख्यां भाष्यकृदाज्ञयोपनिषदां यो द्रामिडीनां ठयधात्'

इत्यादिभिरात्मवचनैः तस्य तत्र विशेषतः प्रतिपत्तिरासीदिति प्रस्फुटमव-गम्यते । एवमुभयवेदान्तसम्प्रदायः श्रीमन्नाथमुनेः प्रभृत्यन्ववर्तत । भगवन्मन्दिरेष्वपि यथा वेदानां तथा दिव्यप्रबन्धानामपि पारायणं संविहितमासीत् ।

श्रीदेशिकस्य काले औपनिषदस्य अस्मत्पूर्वाचार्यप्रतिष्ठापितस्य श्रीमद्विशिष्टाद्वैतसिद्धान्तस्यैव दिव्यप्रबन्धानां प्रामाण्यस्य तेषां भगवन्मन्दिरेषु उपयोगस्य च आक्षेपकारिणः अतिसंरम्भिणः प्रबला दुर्वादिन आसन् । तान् सर्वान् वादगोष्ठीषु विजित्य तत्प्रामाण्यं तेषां भगवन्मन्दिरेषु पारायणाद्यौचित्यं च देशिकः सुस्थिरं स्थापयामास । तदिदं श्रीशतदूषणीव्याख्यानस्य चण्डमारुतस्य कर्त्रा श्रीमहाचार्येण स्वकृतौ श्रीमद्वेदान्तदेशिकवैभवप्रकाशिकायाम्—

कार्या न भाषाकृतिगीतिरत्र
* तत्कल्पकार्चाश्च न पूजनीयाः ।
इत्युक्तपक्षं नृपतेः समक्षं
यः प्राक्षिपत् तं गुरुवर्यमीडे ॥ 79 ॥

जित्वा तु तान् भूपसमक्षतः श्री-
रङ्गेश्वरस्याध्ययनोत्सवादीन् ।
आकल्पमव्याहतमादिशद्य-
स्तं वेदचूडागुरुमाश्रयामि ॥ ८० ॥

इति प्रत्यपादि । एवं दिव्यप्रबन्धप्रामाण्यादिकमसहमानानां प्रतिवादिनां प्रशमने एकतः स्थिते, योग्येभ्यः शिष्येभ्यः प्रवचनवत् द्रमिडोपनिषत्सारः, द्रमिडोपनिषत्तात्पर्यरत्नावलिः, निगमपरिमलः, मुनिवाहननभोगः, मधुरकविहृदयं, इत्येषां ग्रन्थानां निर्माणेनापि दिव्यसूरिश्रीसूक्तिरक्षां श्रीदेशिकः अकरोत् । तत्र निगमपरिमलः (लुप्तः, चतुःसप्तति सहस्रग्रन्थात्मा श्रीकुरुकेश्वरकृतायाः षट्सहस्रथा व्याख्यानरूपः । इदमुक्तं वैभवप्रकाशिकायां महाचार्येण —

* तत्कल्पकानां भाषाप्रबन्धरूपदिव्यप्रबन्धकृतां शठकोपादीनां अर्चाः प्रतिमाः ।

ग्रन्थैश्चतुस्सप्ततिभिः सहस्रैः
श्रुतुस्सहस्रार्थविशेषयुक्तैः।
यः षट्सहस्रस्य चकार वृत्तिं
तं देशिकं नौमि शतं सहस्रम्॥ ११९॥

इति। अतः उभयवेदान्ताचार्यत्वं भगवति निगमान्तदेशिके स्थितम्। मुख्यञ्चैतदत्र। लक्ष्मीनाथसमारम्भाश्रीदेशिकपर्यन्ता गुरुपरम्परा एवमनुसन्धेया।

1 भगवान् 2 लक्ष्मीः 3 विष्वक्सेनः 4 शठकोपमुनिः
5 नाथमुनिः 6 पुण्डरीकाक्षः 7 राममिश्रः 8 यामुनाचार्यः
9 महापूर्णः 10 रामानुजमुनिः (श्रीभाष्यकृत्)
कुरुकेश्वरः (षट्सहस्रीकृत्)
विष्णुचित्तः
वरदाचार्यः (अम्माळ्)
रामानुजाचार्यः (वादिहंसाम्बुवाहः)
श्रीदेशिकः इति।

भगवद्रामानुजमुनेः (श्रीभाष्यकारस्य) अनन्तरं भिद्यमाना अन्याऽपि गुरुपरम्परा अस्ति। इयं सा—

10 रामानुजमुनिः 11 गोविन्द गुरुः (एम्बार्)
12 पराशर भट्टारकः (कूरनाथसुतः सहस्रनामभाष्यकृत्)
13 वेदान्तिमुनिः (नञ्जीयर्। श्रीशठकोपगाथासहस्रस्य नवसहस्रीव्याख्यानकृत्)
14 कलिवैरिदासः (लोकाचार्यः। नम्पिळ्ळै)
15 कृष्णगुरुः (षट्त्रिंशत्सहस्रीकारः)
16 लोकाचार्यः (अष्टादशरहस्यग्रन्थकारः आचार्यहृदयकारस्य [भ्राता)
17 श्रीशैलनाथः
18 वरवरमुनिः। इति।

कलिवैरिदासस्य कृष्णनामैव अपरोऽपि शिष्य आसीत्। सः शठकोपगाथानां चतुर्विंशतिसहस्रीव्याख्यानकारः। अन्येषामपि दिव्यप्रबन्धानां व्याख्याता च। एष्वाचार्येषु कलिवैरिदासप्रभृतयोऽर्वाञ्चः दिव्यप्रबन्धेष्वेव परमं परिश्रममकुर्वन्। कलिवैरिदासशिष्याभ्यां द्वाभ्यां कृष्णाभ्यां भगवद्गुणातिशयप्रतिपादनसंरम्भवशेन स्वकृतयोः श्रीशठकोपसूक्तिसहस्रव्याख्ययोः चतुर्विंशतिसहस्रीषट्त्रिंशत्सहस्रयोः अन्येषु च ग्रन्थेषु तत्त्वहितविषया अतिवादाः कृताः। केवलमर्थवादा इमे, न तेषां यथाश्रुतोऽर्थो ग्राह्य इत्येतत् तयोरेव ग्रन्थयोः अन्येषां च ग्रन्थानां पूर्वापरपरामर्शं कुर्वतां व्युत्पन्नानां वाक्यन्यायविदां विदुषां सुग्रहम्। किन्तु तथा विविच्य अर्थमुपलब्धुमक्षमाः केचन श्रद्धाजडाः आपातप्रतीतं अक्षरार्थं पारमार्थिकं गृहीत्वा तमेव स्वशिष्येभ्य उपदिशन्तो ग्रन्थेषु निबध्नन्तश्च सम्प्रदायाध्वनि महतीं वैयाकुलीमुत्पादयामासुः। यथा बौद्धादिवैलक्षण्येन वेदप्रामाण्यमभ्युपेत्यापि तत्र मायावादनिर्गुणब्रह्मवादादिसंश्रयणेन अन्ये वेदान्तिनः कुदृष्टय इत्यभिधानभाजोऽभवन् तथा दिव्यप्रबन्धप्रामाण्यमाश्रित्यापि भगवतो दुःखित्वं, लक्ष्म्या अनीश्वरत्वं, भगवत्या गङ्गाया अशुद्धत्वं, सेतुस्नानस्य वर्जनीयत्वं, नित्यनैमित्तिककर्मणामनाचरणीयत्वं, भक्त्यादीनामनुपायत्वमित्यादिसर्वशास्त्रसम्प्रदायविरुद्धमभ्युपगच्छन्तस्ते 'संप्रदायकुदृष्टयः' इत्यभिधानयोग्यतां भजन्तः,

बाह्याः कुदृष्टय इति द्वितयेऽप्यपारं
घोरं तमः समुपयान्ति न हीक्षसे तान्।
जग्धस्य काननमृगैर्मृगतृष्णिकेप्सोः
कासारसत्त्वनिहतस्य च को विशेषः॥

इति कूरनाथप्रदर्शितस्य न्यायस्य अन्याविशेषेण मुख्यलक्ष्या अभवन्।

सत्सम्प्रदायस्य घोरं विप्लवं एवमापतितं अवलोक्य अतिमात्रं विषण्णः श्रीदेशिकः सयूथ्यकलहात् अत्यन्तं भीतोऽपि वेदान्ताचार्यविरुद-वितरणमुखेन भगवता श्रीरङ्गनाथेन श्रीशठकोपनाथमुनियामुनार्य-यतिपतिप्रमुखैराचार्यतल्लजैः प्रवर्तितस्य लोकोत्तरस्य सर्वलोकश्रेयः-सम्पत्तेरेकोपायस्य वैदिकसिद्धान्तस्य सर्वेभ्य उपप्लवेभ्यः परिरक्षणभरं आत्मनः शिरसि आरोपितमवगच्छन् श्रीमद्रहस्यत्रयसारादिरहस्य-ग्रन्थजात, चतुःश्लोकीभाष्य, स्तोत्ररत्नभाष्य, निक्षेपरक्षादिबहुग्रन्थ-प्रणयनेन उद्भावितसम्भावितसकलशङ्कासमाधानपुरस्सरं शास्त्र-विहितां सम्प्रदायसिद्धां च तत्त्वहितगोचरां मर्यादां अचञ्चलं पुनः प्रतिष्ठापयामास । ततः प्रतिबुद्धाः अहम्ममरहिततया प्रसन्नमनसः परे बहवः पूर्वगृहीतमर्थमुपेक्ष्य तात्त्विकार्थाधिगमसन्तुष्टाः कृतकृत्याः कृतार्थाश्च बभूवुः । 'पेरियवाच्चान् पिळ्ळै' इत्याख्यातः चतुर्विंशतिसह-स्रीकारः श्रीकृष्णपादगुरुः चत्वारिंशदधिकैर्वर्षैः वर्षीयानपि श्रीदेशिकस्य शास्त्रोपदिष्टसम्प्रदायसिद्धसर्वार्थनिष्कर्षणविचक्षणतां लोकविलक्षणां प्रसमीक्षमाणः तस्य सकाशात् प्रपत्तिविषये सुनिश्चितं ज्ञानमधिजि-गमिषति स्म। तदीयामभ्यर्थनामनुसृत्य देशिकः न्यासविंशतिं संक्षिप्तां तद्व्याख्यां च निरमिमीत । षट्त्रिंशत्सहस्रीकारस्य कृष्णगुरोः पुत्रः सम्प्रदायान्तरे आहतानां अष्टादशरहस्यग्रन्थानां कर्ता लोकाचार्यः स्वयं देशिकस्य साक्षात् शिष्यो भूत्वा अस्मात् श्रीभाष्यार्थं जग्राह । अनेन कृतमेव श्रीदेशिकविषयं द्राविडतनियन्-पद्यं 'शीरोन्न तूप्पुल्' इत्यादि देशिककृतद्राविडप्रबन्धानुसन्धानावसरे अद्यापि सर्वत्र पठ्यते । अस्यानुजः आचार्यहृदयनाम्नो ग्रन्थस्य कर्ता तु देशिकं प्रति अत्यन्त-मसूयावानासीत्। स एव कवित्वे श्रीदेशिकेन स्पर्धमानः अत्युत्तम-स्तोत्रकाव्यस्य श्रीपादुकासहस्रस्यावतारहेतुरासीत् । एवंविधान् कति-पयान् प्रत्येव

आपातशान्तिमधुरान् पुनरस्मदीयान्
अन्योन्यवैरजननी विजहात्वसूया ।

इति देशिकः प्रार्थयाञ्चक्रे । एतादृशेषु कतिपयेषु स्थितेष्वपि अन्ये सर्वे श्रीदेशिकस्य अलोकसामान्यं वैभवातिशयं यथावदवगच्छन्तः स्वोक्तेऽपि तदनभिमतेऽर्थे आदररहिताः तस्मिन् नितान्तं बहुमानवन्त आसन् । अष्टादशरहस्यग्रन्थकारस्य लोकाचार्यस्य प्रशिष्यः तेषु ग्रन्थेषु कतिपयानां व्याख्याता च वरवरमुनिः तस्मिन् सम्प्रदाये श्रीभाष्यप्रवचनं प्रति तदर्थाधिगमं प्रति च प्रावण्यविरहात् तत्र निरूढज्ञानलिप्सया श्रीदेशिकप्रशिष्यं 'किडाम्बि-नयिनार्' इत्याख्या-तमाचार्यमुपसद्य तदध्ययनमकरोत् ।

एवमापातप्रतीतार्थभेदावलम्बनेन श्रीदेशिकादृतसम्प्रदायविरुद्धस्य सम्प्रदायान्तरस्य प्रादुर्भावे प्रसक्तेऽपि श्रीदेशिकग्रन्थैः शिक्षितमतयः परे स्वोक्तमर्थान्तरं स्वकृतान् ग्रन्थांश्च स्वयमेव उपेक्षितवन्तः । वस्तुतः सम्प्रदायभेदो नैवासीत् । सर्वैः श्रीवैष्णवैराश्रितः एक एव तु सम्प्रदायः । स च श्रीदेशिकेन प्रतिष्ठापितः । आह च श्रीदेशिकः 'सम्प्रदाय-परिशुद्धि'नाम्नि रहस्यग्रन्थे—

भाष्यकारशिष्यपरम्परासु योजनाभेदमात्रमस्ति, नार्थभेदः ।

इति । एवं स्थिते कस्यचित् कालस्यानन्तरं क्रूरेण कलिना शास्त्रसिद्ध-सकलधर्ममार्गविध्वंसनधुरन्धरेण विशिष्य सकलकल्याणहेतुभूतोत्त-मोत्तमश्रीवैष्णवसिद्धान्तसम्प्रदायद्रोहमीहमानेन इमे मम दूरमुपकरिष्य-न्तीति दृढपरिगृहीतैः कैश्चिदासुरप्रकृतिभिः, अप्रामाणिकान् शास्त्र-विरुद्धान् श्रीदेशिकनिरस्तान् अत एव पूर्वैः स्वयमेव परित्यक्तान् अपार्थानेव अभिनिविश्य सिद्धान्तीकुर्वद्भिः, अस्मत्सम्प्रदायोऽत्यन्तं भिन्न इति घोषयद्भिः, शास्त्रात् दैवाच्च अविभ्यद्भिः, श्रीदेशिकदूषणोत्सवैः,

श्रीदेशिकेन उभयवेदान्तप्रामाण्यप्रचारप्रतिष्ठापनद्वारा कृतमुपकारं स्मरता आस्तिकजनेन तत्र तत्र देवालयेषु तद्बिम्बं प्रतिष्ठाप्य पूजनं तत्पद्यपठनं च क्रियमाणमत्यन्तमसहमानैः श्रीदेशिकप्रशिष्यं सन्तं वरवरमुनिं तत्प्रतिद्वन्द्विपदे कृत्वा तत्पूजनपुरस्कारादिषु समुज्जृम्भितनिस्सीमसम्भ्रमैः हा हन्त श्रीवैष्णवगोष्ठ्यामान्तरक्षोभो महानुत्पादितः ।

इदं सन्निकृष्टपूर्वकालवृत्तम् । अथाद्यत्वे पाश्चात्यप्रक्रियावलम्बेन प्रायः सर्वेष्वेव जनेषु वेदः शास्त्राणि, धर्मः सम्प्रदायः, आचारो भक्तिः, इत्येतत् सर्वं प्रति उदासीनेषु प्रतिकूलेषु च संवृत्तेषु पुरातनवेदशास्त्रसम्प्रदायस्य आत्यन्तिके लोपे प्रसक्ते, ततो भीतैः आकुलैः विषण्णैः तत्र किं प्रतिविधानं, तत् कथं कर्तव्यमिति चिन्तासन्तानसमाक्रान्तस्वान्तैश्च भवितुमौचित्ये सति प्रत्युत अतिक्षुद्रैः अतिक्रूरैः अतिनृशंसैः अतिकुटिलैः बहुधा बहुभिः सुनिरस्तानपि अपार्थान् आम्रेडयद्भिः निर्लज्जैः नक्तन्दिवं सर्वास्ववस्थासु सदाचार्याणां, तत्सूक्तिरत्नानां, परमभागवतानां च उत्कटदूषणतत्परैः पामरप्रतारणपरायणैश्च भवद्भिः कैश्चित् पदेपदे पूतिगन्धोद्गारिदुर्वचःपटलप्रकटनेन सज्जनानां शिरश्शूलमुत्पाद्यते । एतदुक्तान् सर्वान् दुरर्थान् तदा तदा निरस्तवन्तो वयमिदानीं अचिरप्रकटिते 'रामानुजदयापात्रपद्यचरित्र' नाम्नि दुर्निबन्धे जडव्यामोहनाय लिखितानां अप्रामाणिकानामनृतमयानां विषयाणां विमर्शनेन तत्त्वस्थितिं बोधयितुं तदपेक्षिसाधुजनप्रार्थनामङ्गीकृत्य प्रवर्तामहे ।

इत्युपोद्घातपरिच्छेदः

प्रथमः ।

---

2 श्रीदेशिकः ।

श्रीदेशिकः या 'विन्नासिनी विबुधवैरिवरूथिनीनां पद्मासनेन परिचारविधौ प्रयुक्ता' भगवतो दिव्या घण्टा तदवताररूपः । तस्मात् तं ये द्विषन्ति तेषामसुरांशत्वमवर्जनीयम् ।

श्रीदेशिकः 'वेदान्तदेशिकः' इति 'सर्वतन्त्रस्वतन्त्रः' इति च बिरुदविशेषप्रदानेन दिव्यदम्पतिभ्यां सम्भावितः । तस्मात् तं ये द्विषन्ति तेषां भगवद्द्रोहित्वमपरिहार्यम् । नास्तिकत्वं च ।
श्रीदेशिकः

'विष्वग्व्यापिन्यगाधे यतिनृपतियशः सम्पदेकार्णवेऽस्मिन्
श्रद्धाशुद्धावगाहैः शुभमतिभिरसौ वेङ्कटेशोऽभिषिक्तः ।
प्रज्ञादौर्जन्यगर्जत्प्रतिकथकवचस्तूलवातूलवृत्त्या'

प्रौढगम्भीरोदारसन्निबन्धसंहत्या भगवद्रामानुजसिद्धान्तं सुस्थिरं स्थापयामास । तं ये रामानुजीया द्विषन्ति तेषां 'कृतघ्ने नास्ति निष्कृतिः' इति बहु कुत्सितं कृतघ्नत्वमनपनोद्यम् ।

अद्यापि यदा यदा मायावादिभिरितरैर्वा अस्मत्सिद्धान्त आक्षिप्यते तदा तदा श्रीदेशिक एकः शरणीकरणीयो भवति । तस्मात् तं ये द्विषन्ति तेषां 'तमिमं क्रियमाणघ्नः' इति गर्हितं कृतघ्नत्वादपि पापतरं क्रियमाणघ्नत्वमप्रतिविधेयम् ।

घोरा इमे दोषा अस्माकं मास्म प्रसजन्निति आत्महितार्थिभिः सर्वैः श्रीवैष्णवैः अस्मिन् आचार्यचूडामणौ द्वेषप्रसक्तिवर्जने अतिजागरूकैर्भाव्यम् । अत एव हि तस्मिन्

अद्वेषमात्रमपि वा येषां वेदान्तदेशिके ।
वीटीचेटोऽस्म्यहं तेषामिति वीथीषु घुष्यताम् ॥

इत्यभिज्ञा अद्वेष्मात्रमपि प्रशंसन्ति । एवं महतोऽनर्थस्य परिहाराय भगवति निगमान्तमहादेशिके द्वेषो न मनागपि कर्तव्य इत्युक्तम् । अथ यदि पुरुषार्थेषु उत्तमस्य मोक्षस्याधिगमेऽभिलाषः तर्हि तस्मिन् भक्तिरवश्यं कर्तव्येत्येतदपि सम्यगवधारणीयम् । अन्यथाऽत्यन्तदुर्लभत्वात् तस्य । तदुक्तं सप्ततिरत्नमालिकायां प्रतिवादिभयङ्करायैः ।

गुरौ वादिहंसाम्बुदाचार्यशिष्ये
जना भक्तिहीना यतीन्द्राप्रियाः स्युः ।
यतीन्द्राप्रिया विष्णुकारुण्यदूराः
कुतो मुक्तिवार्ता हि तादृग्विधानाम् ॥

इति ।

इति देशिकवैभवपरिच्छेदो द्वितीयः ।

---

3 पात्रपद्यम् ।

रामानुजदयापात्रं ज्ञानवैराग्यभूषणम् ।
श्रीमद्वेङ्कटनाथार्यं वन्दे वेदान्तदेशिकम् ॥

इतीदं श्रीदेशिकस्य तत्कुमारवरदाचार्यस्य च शिष्यभूतेन श्रीब्रह्मतन्त्रस्वतन्त्रस्वामिना निर्मितं तनियन्-पद्यम् । देवालयेषु वा गृहेषु वा यदा यदा दिव्यप्रबन्धानुसन्धानं प्रसक्तं तदा तदा आदौ अवसाने च दिव्यप्रबन्धविषये श्रीदेशिकेन कृतं परमोपकारं स्मरद्भिः सर्वैः श्रीवैष्णवैः तस्मात् कालात् प्रभृति अनुसन्धीयमानमभवत् ।

अस्मिन् पद्ये आद्येन पादेन सदाचार्यकटाक्षसमृद्धिरुच्यते । एतत्फलं द्वितीयेन पादेन । ज्ञानं परापरतत्त्वविषयं हितपुरुषार्थविषयं च । वैराग्यं भगवद्व्यतिरिक्तेषु विषयेषु । तेन भगवति भक्तिः फलिता ।

'परमात्मनि यो रक्तो विरक्तोऽपरमात्मनि' इति ह्युच्यते। एवमाचार्यत्वोपयुक्तगुणपौष्कल्यमुक्तम् । अथ अचार्यत्वं साक्षादुच्यते वेदान्तदेशिकमिति। अन्ये आचार्याः प्रवचनकरणेन हेतुना आचार्यपदाभिधेयतां लभन्ते। अयं तु न तावतैव अपि तु भगवता श्रीरङ्गनाथेन स्वयं वेदान्ततत्त्वार्थनिष्कर्षे अयमेव प्रगल्भ इति निश्चित्य वेदान्ताचार्यपदे निवेशितत्वादपीति भावः । सर्वस्यास्य वैशिष्ट्यस्य यन्मूलकारणं "जायमानं हि पुरुषं यं पश्येन्मधुसूदनः । सात्त्विकः स तु विज्ञेयः स वै मोक्षार्थचिन्तकः॥" इति स्मृतजायमानकटाक्षरूपं, तत्सम्पत्तिरुच्यते श्रीमद्वेङ्कटनाथार्यमिति । एवं गभीरार्थगर्भितमेतत् पद्यं न पद्यान्तरसामान्येन द्रष्टव्यम् । मन्त्रशास्त्रोक्तप्रक्रियया वर्णोद्धारप्रभृतिसकलसंस्कारकरणपूर्वकमावर्त्यमानमिदं श्रीदेशिकसाक्षात्कारसम्पादकतया मन्त्रविशेषरूपं भवतीति, तथा केचिदावर्त्य तत्साक्षात्कारं लेभिर इति च वदन्ति ।

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

इत्यस्मिन् तनियन्-पद्ये कुमारवरदाचार्यकृते यत् कवितार्किककेसरित्वविशेषणं दत्तं तदप्यत्र ज्ञानपदेन सूचितम् । भगवदनुभवरूपदिव्यप्रबन्धानुसन्धानावसरे देशिकस्य सकलाचार्यकृपापात्रत्वानुसन्धानमावश्यकमिति मन्यमानेन ब्रह्मतन्त्रस्वतन्त्रस्वामिना—

'श्रीशश्रीशठजिद्यतीशनिगमान्तार्यप्रभावोज्वलं रामानुजोक्त्यादिमं दिव्यमहिमेदमन्यत् तनियन्-पद्यं निरमीयत ।

इति पात्रपद्यपरिच्छेदस्तृतीयः ।

4 पद्यान्तरम्।

वरवरमुनिशिष्याः स्वाचार्यस्यास्य तनियन्-पद्यं निर्मातुं प्रवृत्ताः दिगन्तविश्रान्तेन यशसा विद्योतितस्य अचिरातीतस्य भगवतो निगमान्तमहादेशिकस्य यादृशं, तादृशं तत् कर्तुमिच्छन्तः स्वगुरुपरम्पराया द्राविडवेदान्तप्रधानत्वात् देशिकस्य यत् दिव्यप्रबन्धानुसन्धानावसरे उपयुज्यमानं तनियन्-पद्यं 'रामानुजदयापात्रम्' इति तदेवानुसृत्य

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम्।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम्॥

इतीदं पद्यमकुर्वन्। आदौ आचार्यदयापात्रत्वं तल्लोक्तमत्राप्युक्तम्। ज्ञानवैराग्यभूषणमित्येतत् कथञ्चित् धीभक्त्यादिगुणार्णवम्' इति परिवर्तितम्। श्रीमद्वेङ्कटनाथार्यमिति तत्र तृतीयपादे नामोक्तम्। अत्र तु रम्यजामातरं मुनिमिति चतुर्थ पादे तत्। 'वन्दे' इत्युभयत्र समानं पादभेदे सत्यपि। वेदान्तदेशिकमिति यत् तत्र स्थितं तत्स्थाने किमत्र वक्तव्यमिति पर्यालोचनायां विवक्षितवाक्यार्थे साक्षात् अत्यन्तोपयोगविरहेऽपि स्वाचार्यगतं कञ्चन विशेषं स्फोरयिष्यतीत्यभिसन्धाय 'यतीन्द्रप्रवणम्' इत्येतदयोजि। विशिष्टप्रभावेषु पूर्वोत्तरेषु महत्सु आचार्येषु बहुषु सत्स्वपि भगवति भाष्यकारे वरवरमुनेरभ्यधिका भक्तिः। व्यक्तमिदमार्तिप्रबन्धादिपरिशीलनपराणाम्। तस्या भक्तेरिदं फलं यत् भगवद्रामानुजसिद्धान्तावलम्बिषु सर्वेषु तस्य विशिष्टा प्रतिपत्तिरासीत्। विशिष्य च तत्सिद्धान्तप्रतिष्ठापनपरिपालनधुरन्धरे श्रीदेशिके तस्य महद् गौरवम्। अत एव पिल्लै-लोकाचार्यकृतरहस्यग्रन्थव्याख्यानावसरे सम्प्रतिपत्तिस्थले क्वचित् क्वचित् श्रीदेशिकश्रीसूक्तीरुदाहरन् विप्रतिपत्तिप्रतीतिस्थले क्वचिदपि देशिकश्रीसूक्तिखण्डने नैव प्रवर्तते। स्थितन्तु विशदं विवृत्य विरमति। श्लोकार्थान् प्रति

श्रीदेशिकेन यदुक्तं तत् सर्वं मूलकारेण स्वप्राचार्येण पिळ्ळै-लोकाचार्येणैव अभ्युपगतम् । अत एव ग्रन्थतो वा उपदेशतो मनागपि तत्र विप्रतिपत्तिं न कृतेति जानन् स्वभावतश्च प्रशान्तो वरवरमुनिः इतरनिरसने वा स्वयं कस्यचिदर्थस्य स्वातन्त्र्येण स्थापने वा नैव प्रावर्तत ।

महतामपि केषाञ्चिदतिवादाः पृथग्विधाः ।
तत्तदर्थप्रशंसादितत्परत्वादबाधिताः ।।

इति विरुद्धवदवभासमानानां उक्तीनां सङ्गमनप्रकारं श्रीदेशिकदर्शितमाश्रयन्तः सर्व एव आचार्याणां सर्वेषामैककण्ठ्यं सम्प्रदायस्य भाष्यकारप्रवर्तितया एकतां च प्रतिपेदिरे । तथा वरवरमुनिरपि । एवमस्य भगवद्भाष्यकारसिद्धान्तावलम्बिषु प्रतिपत्त्यतिशयं तत्र सम्प्रदायभेदप्रवर्तनप्राबल्यविरहं च व्यञ्जयतीदं यतीन्द्रप्रवणमिति विशेषणम् । तदिदं तनियन् पद्यं अर्वाचीनैः तेन्कलाजनैः देशिकपात्रपद्यस्थाने अनुसन्धीयते । ततः पूर्वं तु देवालयादिषु दिव्यप्रबन्धानुसन्धानारम्भावसानयोस्तु देशिकपद्यमेव सर्वैः श्रीवैष्णवैरनुसंहितमभूत् ।

इति पद्यान्तरपरिच्छेदश्चतुर्थः ।

---

5 कलाभेदः ।

अथ काले कस्मिंश्चिद् याते पूर्वोक्तरीत्या कलिपरवशीभूतैः कलहैकरुचिभिः पामरतया श्रीशठकोपनाथमुनियामुनार्ययतिपतिप्रमुखैः प्रवर्तितस्य सिद्धान्तविशेषस्य गौरवं सर्वलोकक्षेमङ्करतां च यथावदवगन्तुमक्षमैः पिळ्ळै-लोकाचार्यरहस्यग्रन्थेषु क्वचित् क्वचित् आपाततः प्रतीताः ये सिद्धान्तविरुद्धा अर्थास्तेषु अत्यन्ताभिनिविष्टैः, कामचारवादभक्षानुगुणतया नवीनसम्प्रदायान्तरप्रवर्तने सञ्जातो-

त्कटरागैः तदननुगुणतया श्रीदेशिके तदुक्तार्थेषु च जातप्रबलद्वेषैः देशिकसम्प्रदायोऽन्यः लोकाचार्यसम्प्रदायोऽन्य इति निरूपणोद्यतैः यो यो भेदः प्रदर्शयितुं शक्यः तत्तत्कल्पने प्रसितैर्बभूवे । तथा च अनयोःसम्प्रदाययोरष्टादशभेदाः सन्तीति परिगणना कृता । अनेन क्रमेण पुण्ट्रेऽपि भेदोऽकल्प्यत । श्रीदेशिकपद्यनिरोधेन पद्यान्तरपाठ-संरम्भः प्रादर्श्यत । एवं बहु ।

एवमेतैरुपक्रान्तस्य नवीनस्य सम्प्रदायस्य 'तेन्-कला' इति व्यवहारः । 'तेन्' इति दक्षिणदिग्वाची शब्दः । तद्द्वारा द्राविडभाषा-वाची च । कलेति विद्योच्यते । एवं च द्राविडभाषामयविद्यारूपाणां दिव्यप्रबन्धानां 'तेन्-कला' इति मुख्यमभिधानम । तदेकप्रधानत्वात सम्प्रदायोऽपि, तदवलम्बिनो जना अपि तेन शब्देनाभिधीयन्ते । 'वड-कला' इत्यनेन शब्देन श्रीदेशिकसम्प्रदायस्य तदवलम्बिनां च व्यवहार उदभूत् । वडकला उत्तरकला । संस्कृतमयी वेदान्तविद्येत्यर्थः । तद-वलम्बिनश्च उत्तरकलाः । अत्र कश्चन विशेषः सर्वैरत्यन्तमवधेयः । अर्वाचीनाः अनभिज्ञाः आग्रहिणः इमे तेन्कलाः वेदान्, तत्प्रतिपाद्यान् धर्मान्, कर्मज्ञानभक्तियोगान, प्रपत्तिं च कुत्सयन्तः परित्यजन्ति स्म । द्रमिडोपनिषदां पारमार्थिकं भावमगृह्णन्तोऽपि तत्र स्वकीयत्वाभिमानं विशेषतः प्रदर्शयन्तः इतरव्यवच्छेदेन द्रमिडकलामात्रसक्ता इत्यभिप्रा-येण तेन्-कला पदवाच्या अभवन् । इतरेषां वडकलापदवाच्यत्वं तु नैवेदृशम् । श्रीमन्निगमान्तमहादेशिकप्रतिष्ठापितप्रामाण्यान् दिव्यप्रब-न्धान् प्रति न हि तदनुसारिणः सात्त्विकाः केचित् मनसाऽपि स्वप्नेऽपि ईषदपि अनादरप्रदर्शने मतिं कुर्युः । उभयोरपि कलयोरविशिष्टप्रति-पत्तय एव इमे । तस्मात् वडकला एषु अस्ति, न तु इतरेष्विव नास्ति इति व्युत्पत्त्या इमे 'वडकलाः' भवन्ति । न तु 'वडकलैव एष्वस्ति, न तु तेन्-कला' इत्यनया व्युत्पत्त्या । तेन्-कलैव अस्माकं

प्रधानम्, नेतरेति स्वयं ते विश्रब्धं घोषयन्ति"। तेन तेषां नामधेयं कलान्तरव्यवच्छेदगर्भम्। अन्यत्र तु वडकला एवस्तीत्येतावन्मात्रेण तदुपपत्तेः तेन्-कलायां एतेषामुपेक्षाविरहाच्च कलान्तरव्यवच्छेदगर्भता नास्ति। ब्रह्मविष्णुरुद्राणां सृष्टिस्थितिसंहारा व्यापारा इति विभज्य व्यवहारसत्त्वेऽपि एतदनुरोधेन स्थितिहेतुर्विष्णुरित्युक्तेर्युक्तत्वेऽपि 'स्थितेरेव विष्णुर्हेतुः' इत्येतद् यथा नोपपद्यते, संज्ञामूर्त्यधिकरणन्यायेन सृष्टावपि संहारेऽपि च तस्य कर्तृत्वात् तथा प्रकृत इति बुद्धिमद्भिर्विवेक्तव्यम्। उभयकलासम्बन्धे श्रीमन्नाथमुनिकालात् प्रभृति अविच्छेदेन प्राप्ते अर्वाचीने काले ये वडकलां पर्यत्यजन् ते 'तेन् कलाः' इत्याख्यां लेभिरे। ये तु तां न तथा पर्यत्यजन् ते तत्प्रतिसम्बन्धितया 'वडकलाः' इत्याख्यां लेभिर इति।

ते इमे विभक्ते आख्ये वरवरमुनिपर्यन्तपूर्वाचार्यकाले नैव अभवताम्। ततोऽर्वाक्, तत्रापि द्विशतकानन्तरं उद्भूते।

वेदवेदान्तादिविद्यापरिश्रमविरहात् वर्णाश्रमादिधर्मानुष्ठानविरहाच्च कालं सर्वं सम्प्रदायभेदाभिवर्धने कलहकरणे सम्प्रदायान्तरोपरोधे सात्त्विकजनपीडने च विन्ययुञ्जत। श्रीमद्भाष्ये हि भगवद्रामानुजेन वर्णाश्रमधर्मपरिपालनावश्यकता ससंरम्भं निरूपिता भक्तेरुपायता च। गद्ये शरणागतिरनुष्ठिता। तत्सर्वमेषामत्यन्तमरुचयेऽकल्पत। अतः "आर्तोपच्छन्दनं गद्यं भाष्यं तु पररञ्जनम्" इति तयोरन्यथासिद्धिं फलतः अत्यन्तानादरणीयत्वं च निश्शङ्कं निर्भयं वर्णयाञ्चक्रुः।

द्राविडभाषामये 'प्रबन्धसार'नाम्नि ग्रन्थे श्रीदेशिकः दिव्यसूरीणां अवतारस्थलमासनक्षत्रनिर्देशपूर्वकं तत्तत्प्रबन्धगाथानां सङ्ख्यामपि परिच्छिद्य प्रतिपादयति। तत्र आहृत्य सर्वगाथासङ्ख्या चतुःसहस्री (४०००)। अत्र 'रामानुजशत-अन्तादि' संज्ञया 'तिरवरङ्ग-

समुद्धरन्' इत्यनेन कृताः भगवद्रामानुजविषयाः अष्टोत्तरशतसङ्ख्या गाथा अप्यन्तर्भूताः । वरवरमुनिः उपदेशरत्नमालानाम्नि स्वनिबन्धे प्रायः देशिकवदेव दिव्यसूरीणामवतारकालादिकं कीर्तयन्नपि गाथानां सङ्ख्यया परिच्छेदं न करोति । तेन देशिककृते गाथागणने तत्पर्यन्तानां श्रीवैष्णवानां विमतिर्नासीत् इति स्फुटीभवति । भगवद्रामानुजस्य साक्षाच्छिष्येण चटुकपूर्णेन स्वकृते यतिराजवैभवे रामानुजशतान्तादेः दिव्यप्रबन्धान्तर्भावः तद्विषयभूतेन भगवतैवाज्ञप्तः इति सुस्पष्टमुच्यते—

तत्र श्रीमान् यतीशः क्वमपि शठरिपुं संप्रतिष्ठाप्य तेन
श्रीरङ्गाधीश्वरस्याध्ययनमहमहर्विंशतिं कारयित्वा ।
पश्चात् कैश्चित् प्रबन्धैस्स्वविषयककथां तं प्रबन्धं मिश्रित्वा
रङ्गं संशाठ्य चक्रे स तदितरमहासूरिगोदाप्रतिष्ठाम् ॥ इति ।

एवं सम्प्रदायक्रमे स्थिते अर्वाचीनाः केचित् 'रामानुजशत-अन्तादि'-प्रबन्धं दिव्यप्रबन्धेभ्यो बहिश्चक्रुः । वयं सङ्ख्यासङ्ख्यां प्रकारान्तरेण कथञ्चित् पूरयन्ति स्म । एवं न परं रामानुजविरचितं भाष्यं गद्यं च अपि तु तद्विषयं निबन्धमपि ते अन्तादन्तीयं निश्चिन्वन्ति । इत्थं वस्तुतत्त्वे निरूप्यमाणे भगवद्रामानुजस्य एषां च नाकोऽपि सम्बन्धः । यदि कश्चिदत्रत्यं वक्तव्यः वर्हि सः द्रोग्धृद्रोग्धव्यभाव एव, नेतरः इत्येतत् सुमहत् ।

भगवद्रामानुजं प्रत्येव एवमाचरितवन्तः हसे देशिकं प्रति अन्यः दन्यदाचेरुरित्येतत्र विस्मयावहम् । स घण्टावतारः इति भगवदाराधनकाले घण्टां नोपयुञ्जते । देवालयेषु तत्प्रयोगपठनं यथाशक्ति उपारुन्धत । तत्र तत्र प्रतिष्ठिताः तत्प्रतिमाः अपनयन्ति स्म ।

अनियन्त्रितप्रसरणकल्पनावैभवेन भगवत्याः श्रीमहालक्ष्म्याः जीवकोटिप्रवेशमात्रस्थिरे । 'कस्य पादोदकेन स शिवः स्वशिरोधृतेन'

इति सुस्पष्टं यामुनाचार्ये भगवच्चरणारविन्दप्रभवया गङ्गया शिवस्य परिपूतत्वमभिदधाने सकलश्रुतिस्मृतीतिहासपुराणप्रसिद्धं अस्याः पुण्यनद्या वैभवमपह्नुत्य वैपरीत्येन शिवशिरःस्पर्शहेतुकमपरिशुद्धत्वमाचचक्षिरे। बहुपापप्रायश्चित्ततया धर्मशास्त्रेषु विहितं पञ्चगव्यप्राशनमकार्यं मेनिरे।

इत्थमतिसंरब्धैः आसुरसम्पदा सम्पन्नैः महता विपर्यासेन सम्प्रदायेऽस्मिन् स्थापिते, तत्र तत्र गत्वा बहुभिरुपायैः बहुजनपरिग्रहं प्रापिते च अनन्तरसन्ततिभवाः सर्वे तमेव समीचीनं सम्प्रदायं मन्यमानाः तत्रैव श्रद्धालवो भवन्तीति सहजमेतत्। परन्तु यदि तेषु केचित् ऋजुमतयः अधीतविद्या विवेकिनो भवन्ति तेषां तत्तद्ग्रन्थपरामर्शे सति स्वसम्प्रदायगता न्यूनताः न न स्फुरेयुः। तेऽपि तु प्रायः विषयविमर्शेषु दूरावगाहने आलस्यात् सङ्केतभङ्गभीरुत्वात् स्वपूर्वपुरुषादृतक्रमविपर्यासकरणे सहसा धैर्यासम्भवाच्च यथा पूर्वमेव वर्तन्ते। एषां हेतूनां विरहे तु तिरस्कृत्य तं सम्प्रदायं देशिकचरणारविन्दशरणा भवेयुरेव। अभवच्च तथा भारद्वाजश्रीनिवासाचार्यो नाम कश्चित्। स हि प्रथमं तेनकलाभूतः पश्चात् श्रीदेशिकग्रन्थनिषेवणेन प्रबुद्धः तदेकशरणो बभूवेति तस्यैव वचनेन ज्ञायते। श्रीकाशीचौखाम्बा-मुद्रणालये मुद्रितप्रकाशितस्य श्रीदेशिककृता या न्यायपरिशुद्धिः तद्व्याख्यानस्य कर्ता स प्रौढो विद्वान् भारद्वाजश्रीनिवासाचार्यः। स तत्र स्वस्य पूर्वदशां प्रति महान्तमनुशयं उत्तरदशां प्रति परमं प्रहर्षं च प्रकाशयन् निस्सङ्कोचं इदमाह—

इयतः समयानहं महान्तं
मतिभेदं विवशः प्रपद्यमानः।
स्वमवञ्चयमञ्जसाऽद्य दैवा-
न्निगमान्तार्यनिबन्धतः प्रबुद्धः॥ इति।

अतिसन्निहिते काले च उळग्पाकं रामानुजाचार्यो नाम पण्डित-
प्रवरः सुकृतविशेषपरिपाकवशेन जन्मना प्राप्तं सङ्केतप्रधानं तंसम्प्रदा-
यमवधूय, 'सङ्केतभीतिरहितस्सतृणेष्वसक्तः' इति देशिकसम्भावितं
सुसम्प्रदायमाश्रितः तावताऽप्यसन्तुष्य पूर्वसम्प्रदायरहस्यग्रन्थानां
अत्यन्तासामञ्जस्यं च बहुना ग्रन्थविस्तरेण घोषयामास ।

इति कलाभेदपरिच्छेदः पञ्चमः ।

इति सम्प्रदायप्रदीपे विवेककाण्डः ।

अथ प्रतिवचनकाण्डः।

अप्रमाणं न वक्तव्यं न त्यक्तव्यं प्रमाणवत्।
गुणदोषौ न कर्तव्यौ संरक्ष्या नियमा इमे॥

अथात्र पूर्वपक्षग्रन्थोक्तदूषणानां तत्सङ्ख्यानुसारेणैव समाधानं भ्रमः।

1 भगवन्मन्दिरेषु दिव्यप्रबन्धगाथापारायणोपक्रमः नाथमूनेः प्राक् परकालकालात् प्रभृतीति विज्ञायते।

प्रबन्धपारायणारम्भे लक्ष्मीनाथ, योनित्यमच्युत, माता पिता, भूतं सरश्च, इत्येतत्पद्यचतुष्टयपाठः भगवद्रामानुजनियमनादेवेति च।

2 भगवान् श्रीरङ्गनाथः वरवरमुनेः शिष्यो बभूवेति स एव श्रीशैलेशपद्यस्य कर्तेति च न वरवरमुनिः स्वयमाह। नापि प्रतिवादिभयङ्करमहाचार्यादिकल्पा विश्वसनीयवाचो महान्त आहुः। केवलमियं अर्वाचीनानामभिनिविष्टानां अत एव परलोकभीतिरहितानां कल्पना। एवमेवास्य पद्यस्य दिव्यप्रबन्धपारायणारम्भे पठनीयत्वाज्ञावादोऽपि। प्रमाणं हि सर्वत्र तत्त्वनिर्धारणे शरणम्। किमत्र तत्? परप्रत्यायनाय हि ग्रन्थो लिख्यते। तत्र प्रतिज्ञामात्रकरणेन किं भविष्यति? यदिदानीं बहुषु स्थलेषु तत्पाठो दृश्यते तदेव तत्र कथञ्चित् प्रमाणमिति चेत्, स सात्त्विकान् भीरुन् परिभूय तीक्ष्णप्रकृतिभिरितरैः कृतो विपर्यास इति न पूर्वस्थित्यै प्रमाणीभवितुं शक्नोति। पक्षपातिनामर्वाचां वचनं न कञ्चन श्रद्धत्ते।

ननु साक्षाद्वरवरमुनिशिष्येण देवराजगुरुणा तदुक्तम्, न त्वर्वाचीनेन येन केनचित्। तत् कथमविश्वसनीयमिति चेत् कुत्र तेन तदुक्तम्? तत्कृते वरवरमुनिशतके

अचार्यत्वं तदधिकमिति ख्यातमाम्नायमुख्यै-
रेष श्रीमान् भजति भगवानीश्वरत्वं विहाय ।
मन्त्रं दाता वरवरमुने मन्त्ररत्नं त्वदीयं
देवः श्रीमान् वरवरमुनिर्वर्तते देशिकत्वे ॥ ६२ ॥

इत्यस्मिन् श्लोक इति चेत्, इदं शतकं वस्तुतः किं तेन कृतम् अथवा वादिभीकरकृतत्वेन प्रकटितशतकान्तरवत् अर्वाचीनयत्किञ्चित्कर्तृक-मिति न वयं परीक्षितवन्तः स्मः । अद्य तु तेनैव कृतमिति कृत्वा प्रतिवदामः । अस्मिन् किमुच्यत इति चक्षुरुन्मील्य सम्यगवेक्ष्यताम् ।

एष श्रियःपतिः ईश्वरत्वं स्वस्य स्वतस्सिद्धं विहाय आम्नाय-मुख्यैः प्रमाणवचनैः तदधिकं तस्मादीश्वरत्वादप्यधिकं उत्कृष्ट-मिति ख्यातं आचार्यत्वं भजति । किं कुर्वन् ? मन्त्रं दाता-श्रीम-दष्टाक्षरादिमन्त्रमुपदिशन् । यो यः आचार्यः स सर्वः भगवत एव रूपान्तरमिति भावः । एवं सामान्यतो व्याप्तिः शिक्षिता । अथ तां प्रकृते योजयन् उत्तरार्धमाह । हे वरवरमुने, श्रीमान् देवः रङ्गनाथः, त्वदीयं मन्त्ररत्नं श्रीशैलेशदयापात्रमित्येत-त्पद्यरूपं त्वद्विषयं मन्त्रश्रेष्ठं दाता ददत् यः वरवरमुनिः एतन्नामा त्वदन्तेवासी तद्रूपः सन् देशिकत्वे अस्मदाचार्यस्थाने वर्तते ।

इति अस्य श्लोकस्यार्थः । व्युत्पन्नैः पण्डितैरत्र अन्योऽर्थो वक्तुं नैव शक्यते । वरवरमुनेः तन्नामैव कश्चन शिष्य आसीत । सः स्वाचार्य-विषयं 'श्रीशैलेशदयापात्रम्' इतीदं पद्यमकरोत् । आचार्यं वरवरमुनिं स्तुवन् देवराजगुरुः अस्य पद्यस्य मन्त्रश्रेष्ठत्वं तन्निर्मातुः शिष्यवरवर-मुनेः देशिकत्वं तद्द्वारा साक्षाद्भगवद्रूपत्वं च कविपद्धतिमाश्रित्य ब्रवीति । इममर्थमवगन्तुमक्षमा जडा भ्रान्ता वा यदि मिथ्याकथाः कल्पयन्ति ताः कथं प्राज्ञानां विश्वसनीयाः स्युः ?

3 कलाभेदोऽर्वाचीन इति अभिधानद्वयाभिधेयमर्थद्वयमिदमिति च पूर्वमेवोक्तम् । आदौ श्रीवैष्णवेषु ये समग्रप्रज्ञाशालिन आसन् ते अविशेषेण श्रीभाष्यार्थाधिगमप्रवचनप्रतिष्ठापनेष्वेव सम्पूर्णं परिश्रममकुर्वन् । तत्र अशक्तास्तु दिव्यप्रबन्धसङ्गिन आसन् । इदं च भगवद्रामानुजदिव्याज्ञानुसारात् । स किल एवमनुशशास—

प्रपन्नस्य आयुःशेषे कर्तव्यानि पञ्च कैङ्कर्याणि—

1 भाष्यमधीत्य तत्प्रवर्तनम् । तत्र योग्यताविरहे

2 दिव्यप्रबन्धानां श्रवणं प्रवर्तनं च । तत्र योग्यताविरहे

3 'अभिमतेषु' दिव्यदेशेषु निवेद्यान्नदीपमालासंविधानम् । तत्र योग्यताविरहे ।

4 द्वयार्थानुसन्धानम् । तत्र योग्यताविरहे

5 मदीयोऽयमित्यभिमन्यमानस्य कस्यचित् श्रीवैष्णवस्याभिमानविषयतया वर्तनम् ।

इति । तदिदं श्रीमद्रहस्यत्रयसारे शास्त्रीयनियमनाधिकारे आचार्यपादैः स्पष्टमुक्तम् । षट्सहस्रीगुरुपरम्परायामप्युक्तम्—

पठित्वा भाष्यं तत्प्रवचनमशक्तौ शठरिपोः
गिरि श्रद्धा वासः प्रभुपरिचितस्थाननिवहे ।
प्रभोः कैङ्कर्यं वा प्रपदनमनोरर्थमननं
प्रपन्नानां वामे भवतु परिचर्यापरिचयः ॥ इति

अतः शक्तानां प्रथमकर्तव्यं श्रीभाष्यवैदुष्यसम्पादनम् । सुधीत श्रीभाष्याः प्रज्ञावैभवे सति दिव्यप्रबन्ध परिश्रममपि कुर्युरेव । तावन्मात्रेण तु परिश्रान्ताः अलब्धकाला वा अकृतदिव्यप्रबन्धपरिचया ये आसन् तेऽपि तेषु समग्रभक्तयः अध्ययनासौकर्यं प्रति

अतीवानुशयवन्तश्च अभवन्। एवमेवाशक्तया श्रीभाष्याध्ययनादावप्रवृत्ता ये दिव्यप्रबन्धाध्यायिनः ते श्रीभाष्ये न द्वेषं चक्रुः। प्रत्युत भक्तिमन्तो बभूवुः। प्राक्तनीयं सर्वश्रीवैष्णवसाधारणी वृत्तिः। अर्वाञ्चस्तु कलहवृत्तयः अविवेकित्वात् स्वयं वैदिकप्रस्थानं सर्वं सर्वथा कुत्सयन्तः छिन्नवालसृगालन्यायेन परेष्वपि तादृशं दोषमारोपयितुकामाः 'दिव्यप्रबन्धविमुखास्ते' इति प्रथयितुमारभन्ते।

ये ज्ञानिनः ते ज्ञानानुगुणं कर्मानुष्ठानं समग्रं कर्तुं प्रवृत्ताः नदीतटाकादितीरेषु यथावत् सन्ध्यावन्दनाद्याचरणे, गृहेषु औपासनवैश्वदेवाद्याचरणे च व्यापृताः, प्राप्तेषु कालेषु भगवन्मन्दिरमुपगम्य सेवित्वा अधीतवेदा वेदगोष्ठ्यां अधीतदिव्यप्रबन्धाः तद्गोष्ठ्यां च प्रवर्तमानायामन्विता भूत्वा शेषं कालं यथोचितं क्षिपन्ति स्म। अतादृशास्तु यथाशक्ति नित्यनैमित्तिककर्मानुष्ठायिनः श्रीभाष्यकारशासनानुरोधेन देवालयेषु यत्किञ्चित् कैङ्कर्यं कुर्वन्तः तदेकपरा अभूवन्। एवं चात्रापि ज्ञानाज्ञाने एव विभागहेतू। न तु कलाभेदः।

अन्यत् सर्वमत्रोक्तम्—

"श्रुतिश्रेणीचूडापदबहुमते 'देशिक'मते
स्वपक्षस्थान् दोषान् वितथमतिरारोपयति यः।
स्वहस्तेनोत्क्षिप्तैः स खलु निजगात्रेषु बहुलं
गलद्भिर्जम्बालैर्गगनतलमालिम्पति जडः॥"

इत्यूहितदेशिकश्रीसूक्तिप्रतिपाद्यन्यायगोचरतामेतीति नात्र विस्तरः क्रियते।

4 'वडकलाख्यास्तु दिव्यप्रबन्धेषु विमुखा एवासन्'
'वडकलाख्यविभागान्तर्गतानां तत्रानादरश्च'

इत्यादि वदन्त एव

इतरेषु कतिपयेषु भगवन्मन्दिरेषु वङ्कलारया अमी दिव्यप्रबन्धगोष्ठीप्रवेशप्रारम्भमुखेन।

इत्यपि वदन्ति। तत्र विमुखाश्चेत् किमिति तद्गोष्ठीप्रवेशमेते इच्छन्ति। न हि बाद्यकाराणां गोष्ठीं प्रवेष्टुमेते इच्छेयुः। विप्रतिषिद्धभाषणमेषां प्रकृतिः।

5 अधिकरणेषु व्यवहारं प्रवृत्तं प्रस्तुवन्ति। श्रीशठकोपमुनिप्रभृतीन् स्वाचार्यान् निर्दिशन्तो यदेवं विवदमानाः महान्तं व्ययं कुर्वन्तः सम्प्रदायगन्धानभिज्ञैर्यैः कैश्चित् प्रशमनीयविवादाभवन्ति तत्र लज्जिताव्ये प्रमोदमाना इमे सज्जनानामतीव शोचनीयाः। अधिकरणेषु पाश्चात्यप्रक्रियया साक्षिप्रमाणीकरणेन व्यवहारदर्शिषु जयपक्षः नियमेन परमार्थावलम्बीति पराजयपक्षः नियमेन अन्यथाभूत इति च न कश्चिदिदानीं प्रत्येति। प्रत्यक्षवधकारिणो निरपराधा इति मुच्यन्त इति निरपराधास्तपस्विनः अपराधिन इति दण्डयन्त इति च वदन्ति। तस्मात् परमार्थे निश्चेतव्ये नाधिकरणनिर्णयमात्रं प्रमाणं भवितुमर्हति। अस्मत्पक्षानुकूलाश्च बहवो निर्णयाः सन्ति। राजदण्डप्राप्तिमपि निर्दिशन्ति। अत्यन्तशोच्यमेतत्। श्रीवैष्णवानां राजदण्डपर्यन्तां हिंसां कृत्वा यदि हृष्यन्ति तेषां का गतिर्भविष्यतीति शास्त्रप्रमाणका निस्सन्दिग्धं जानन्ति। य एषामिदानीं हर्षः स सर्वः पश्चात् शतसहस्रगुणदुःखात्मना परिणाममेष्यतीति चिन्तयन्तो विमनायन्ते। तत्रापि सात्त्विकं तात्त्विकार्थवादिनं भागवतोत्तमं अतिप्राम्यवृत्त्या उच्चावचं निन्दित्वा तेन कारणेन राजदण्डं प्राप्य प्रायेण मासं कालं कारागृहे उषितवन्तः सम्प्रदायश्रद्धया पक्षद्वयसाधारण्येन सम्भाव्यमानं राजदण्डमद्य एकपक्षमात्रे स्थितमिव यद्भाषन्ते तदनात्मज्ञतायाः अनृतवादादिव्यसनितायाश्च अत्यन्तमुचितम्।

6 भूतपुर्यां कृशानुमुखेन 'मुञ्चन्तः पञ्चयज्ञान्' इत्यादि वर्णयन् विश्वगुणादर्शकारो वेङ्कटाध्वरी 'तत्रत्याः श्रीवैष्णवाः सर्वेऽपि तेन्कलाख्या एवेति सुस्पष्टं प्रतिपादयति' इति यदुक्तं तत् तथा न । भूतपुरीपुर्यन्तरसाधारण्येन रामानुजसिद्धान्तावलम्बिनः श्रीवैष्णवाः कविना निर्दिश्यन्ते । न तु भूतपुरीमात्रनिवासिनः । 'तत्पथानुधाविनां मेधाविनामपि' इत्येतावन्मात्रश्रवणात् । 'भूतपुरीनिवासिनां' इत्यकथनात् । उत्तरत्र तेन्कलानिर्देशेऽपि "एतन्मतानुवर्तिनां केषाञ्चिदेषां" इत्येव श्रवणात् । न चात्र 'एषाम्' इत्यनेन तत्पुरनिवासिन एव गृह्यन्त इति शङ्कितुं शक्यम् । स्थलान्तरवासितेन्कलानां वेङ्कटाध्वरिकाले पञ्चयज्ञाद्यनुष्ठानमासीदित्यभ्युपगमापत्तेः । किञ्च 'केषाञ्चिदेषां' इत्येव श्रवणात् 'तत्रत्याः श्रीवैष्णवाः सर्वेऽपि' इत्यभिधानं अव्युत्पत्तिमूलकमेवेति ।

7 "नैषां न्याय्य इह द्विजान्वयजुषां भाषाप्रबन्धे श्रमो
वेदे विश्वपुमर्थसाधनविधौ बद्धादरे जाग्रति ।"

इति वेङ्कटाध्वरिणा कृता भाषाप्रबन्धपरिश्रमनिन्दा 'तेन्कलाजनान्' प्रत्येव कृतेति कृत्वा

"वडकलाख्यवैष्णवानां भाषाप्रबन्धादरनिबन्धना दूषणीयता नासीदिति सम्यगवगम्यते । वडकलाख्या अपि तदात्वे यदि द्राविडवेदपाठिनः स्युः तर्हि एकदेशिविषये नैव दूषणमवतीर्णं स्यादिति बालिशोऽपि ननु विजानीयात् । सोऽयं कविः स्वकीये जीवितकाले स्वचक्षुषा यां स्थितिमवैक्षत तामेव ग्रन्थतो निबबन्धेति निश्चीयते । --- तस्मिन् काले वडकलाख्या वैष्णवा द्राविडवेदवैदेशिका एवासन्निति निश्चयं निरपायमाकलयति स एष देशचरित्रप्रकाशको महाग्रन्थः ।"

इति हन्त तपस्वी पूर्वपक्षी लिखति । अव्युत्पत्तिहतत्वात् अभिनिवेशान्धत्वाच्च स्पष्टमपि स्थितं ग्रन्थार्थं ग्रहीतुं नेष्टे । तत्र हि कृशानुः "तत्पथानुधाविनां मेधाविनामपि परावमन्तृत्वादयो दोषाः प्रसिद्धाः । तथा हि" इति, सामान्यत एवोपक्रम्य "श्रीरामानुजदर्शनैकरसिकः—, किंच, नैषां न्याय्य इह— " इति श्लोकद्वयं पठित्वा ततः परं "किञ्च, एतन्मतानुवर्तिनां केषाञ्चिदेषां चेष्टा नेष्टा वैदिकानाम् । पश्य" इति विशेषतः कांश्चिन्निर्दिश्य तद्विषये "मुञ्चन्तः पञ्च यज्ञान्" इत्यादि वदति । तेन पञ्चयज्ञपरित्यागादिकमेव तेन्कलाविषयम् । ततः प्राक्तनं भाषाप्रबन्धपरिश्रमदूषणं तु वडकलासाधारणम् । 'मेधाविनामपि' इत्युपक्रमपर्यालोचनायां तु विशिष्य वडकला एव बुद्धौ स्थिता इति सुवचम् । "वेदे .... जाग्रति" इत्यस्य चायमर्थः । एते हि गर्भाष्टमे उपनीता वेदमधीत्य धारयन्ति । तेनैव अपेक्षितसकलार्थज्ञानसम्पत्तौ सत्यां किमिति वेदानधिकृतोपयोगिभाषाप्रबन्धादरमपि कुर्वन्तीति । एतेन ये वेदेऽनादरं दर्शयन्ति तेषामिह ग्रहणे औचित्यं मन्दमिति ज्ञेयम् । "वेदानामवहेलनं व्यतिहतावर्णाश्रमप्रक्रिया" इति ह्युत्तरत्र तेषां स्पर्शः क्रियते । ते हि वेदवेदाङ्गाद्यनध्ययनेन मूढाः सन्तः भाषाप्रबन्धपरिश्रमं यदि कुर्वन्ति कुर्वन्तु । इमे तु तदध्ययनेन मेधाविनः सन्तोऽपि कथं कुर्वन्तीति भावोऽत्र स्फुटः । तस्माद्ये उभयवेदान्ताचार्याः तानेवेह बुद्धौ कृत्वा भाषाप्रबन्धपरिश्रमदूषणं क्रियत इति दृढमेतत् प्रतिपत्तव्यम् । दूषणपरिहारप्रकरणपरामर्शेनापि इदमित्थमेवमिति निश्चेतुं शक्यम् । तत्रापि खलु वेदाध्ययने कृते सति दिव्यप्रबन्धाध्ययनं नोचितमिति यद्युच्यते तर्हि स्मृतिपुराणाध्ययनमपि नोचितं स्यादित्यादि समाधानं सामान्यतोऽभिधाय पश्चात् 'यश्चैकदेशिविषयदूषणोपन्यासः' इत्युपक्रम्य विशिष्य तेन्कलादूषणपरिहार उच्यते । तदिह विश्वगुणादर्शमहाग्रन्थोदाहरणं साक्षात् स्वाभिमतविपरीतसाधनतया उदाहर्तु-

रङ्गत्वसाम्राज्याभिषेकार्हन्तीमेव गमयतीति तत्त्वस्थितिः । एतेन अन्यदप्यत्र पूर्वपक्षिणोक्तं रिक्तं वच इति सुज्ञानमित्युपेक्ष्यते ।

लक्ष्मीसहस्रे भगवत्याः श्रीमहालक्ष्म्याः भगवद्वदेव विभुत्वे प्रामाणिके यत् कैश्चित् अणुत्वमुक्तं तस्य तन्महिम्नोऽत्यन्तदुर्ग्रहत्वे तात्पर्यमिति निर्वाहो वेङ्कटाध्वरिणा कृतः । न खण्डनम् । व्याख्याने 'अणुत्ववादिनः भट्टपराशरप्रभृतयः' इत्युक्तम् । भट्टपादग्रन्थेषु यत्र क्वापि लक्ष्म्या अणुत्वं नोक्तम् । प्रत्युत श्रीगुणरत्नकोशादौ तद्वैभवमेवोक्तं प्रतीयते । तस्मात् व्याख्यानेऽपि अतद्गुणसंज्ञानबहुव्रीहिरेव वाच्यः । तदिदं सज्जनाराधननाम्नि ग्रन्थे चिरात्पूर्वमस्माभिरुक्तम् । अथापि पुनरत्र लिख्यते असङ्गतमेव । निर्लज्जत्वात् । यद्वा भट्टपराशरः आदिः कूटस्थः येषां ते भट्टपराशरादयः, तेषामपि च । 'युवत्वादौ तुल्ये' इत्यादिषु स्पष्टं विभुत्वे स्वकूटस्थेन भट्टारकेण उक्तेऽपि तद्विरुद्धतया ये अणुत्वं वदन्ति तेषामपीति व्याख्यानपङ्क्तेरर्थः । अत्र "स्वरूपं स्वातन्त्र्यं भगवत इदं' इत्यादिषु प्रसिद्धस्य कूटस्थसम्प्रदायस्य विरुद्धतया क्रियमाणोऽयं विभागोऽनुपपन्नः " इति सिद्धोपायशोधनाकारसूक्तिः स्मारिता व्याख्याने इति ज्ञेयम् । अनया रीत्या प्राचां तेन्कलाख्यत्वप्रतिपादनं आशामोदकतृप्तिमात्रम् । अप्रामाणिकार्थप्रतिष्ठापनप्रसितैः समञ्जसयुक्तिप्रमाणदौर्लभ्यात् एवमेव किमपि किमपि प्रलपनीयम् । नान्या गतिरस्ति । विवेकिभिस्तु जागरूकैर्भवितव्यम् । अनृजवो हि अभिनिविष्टा असत्यनिष्ठा अतिक्रूरहृदयाः रागद्वेषवशंवदाः स्वयं नष्टाः परान् नाशयन्ति ।

8 "मद्रराजधान्यां प्रबलवावदूकपदे विराजमानाः हैकोर्ट् जड्ज् पदवीमप्यलङ्कृतवन्तो महामतयः वि. वि. श्रीनिवासय्यङ्गार् महाशयाः वडकलाख्यानां परिबृढाः स्वदेशमित्राख्यायां

द्राविडभाषामयदैनिकपत्रिकायां 22—7—1938 दिने प्रादुर्भूते अङ्के "रामानुजदयापात्रपद्यमहोत्सवः" इति कृतशीर्षकमेकं दीर्घं लेखं विलिख्य प्राचीकशन्। तत्रैषा पङ्क्तिर्विराजते—

"वडकलाख्यास्तु बहोः कालादेव द्राविडवेददिव्यप्रबन्धेषु आदरदरिद्रा वर्तन्त इति भृशं परितापास्पदमेतत्" इति।"

इति "एते वडकलाख्याः सुचिरादेव द्राविडवेदश्रद्धाविधुराः' इत्यत्र प्रबलसाक्ष्यन्तरमपि प्रदर्श्यते" इत्यवतारिकां दत्वा लिखति—'तेन्कलाख्याः चिरादेव वेदशास्त्रविमुखाः वर्तन्ते' इति तत्रैव तैः प्रकाशितम्। वेदेषु वेदान्तादिशास्त्रेषु च श्रद्धाविधुराः तेन्कलाख्या'इत्यत्र प्रबलसाक्ष्यन्तरं किलेदम्। इहापि उल्मुकेन स्वशिरःकण्डूयनमेव कृतं भवति। 'रामानुजदयापात्रम्' इतीदं तनियन्-पद्यं अर्वाचीनमिति स्थापनं हि साम्प्रतमुद्दिश्यते। तत्र देशिककाल एव इदं पद्यमुत्पन्नमिति सिद्धान्तमाश्रित्य तस्य षट्छताब्दीमहोत्सवं महता समारोहेण प्रवर्तितवतो महाशयान् प्रकृतविवादविषये प्रमाणीकुर्वतोऽस्य बुद्धिवैभवं किमिति वर्णयेम। ते हि महाशयाः वडकला एव सन्तः स्वकीयानां दिव्यप्रबन्धेषु आदरविरहं प्रति शोचन्तः स्वस्य तेषु परममादरं प्रदर्शितवन्तो भवन्ति। देशिकप्रभृतिभिः परिपालितेषु दिव्यप्रबन्धेषु पश्चात्तनैः सर्वैः महत्यादरे प्रदर्शनीये तदप्रदर्शनं प्रति शोकमाविष्कुर्वद्भिश्च "हन्तेदानीं बहवो वेदाध्ययनं न कुर्वन्ति, सुचिरादेव सन्ध्यावन्दनमपि त्यक्तवन्तः" इति शोचद्भिरिव पूर्वं तत्र परम आदर असीदित्येव स्वाभिप्राय आविष्कृतो भवति। तदिहापि परपक्षसाधनमेव तामसबुद्धित्वात् स्वपक्षसाधकतया उदाहृतमिति वेदितव्यम्।

दिव्यप्रबन्धप्रामाण्यप्रतिष्ठापनादिकारिणे भगवते निगमान्तदेशिकाय ये तत्पद्यपठनप्रतिरोधादिभिर्दुश्चेष्टितैरनवरतं द्रुह्यन्ति तेषां

पापिष्ठतमानां श्रीपराङ्कुशपरकालाद्युत्सवकरणे अनधिकारित्वात् तेषां तत्करणप्रवृत्तिः यथाशक्ति प्रतिरोद्धव्यैव धर्मत इति न तत्र काचन वाच्यता ।

9 स्वयं यद् वेदविद्वेषं बिभ्रति तत्स्थाने परेषु दिव्यप्रबन्धविद्वेषमारोपयितुं वृथा प्रयस्यन्ति । न हि तत्र प्रमाणलेशः प्रदर्शयितुं शक्यः । प्रत्युत "श्रीभाष्यं, श्रीमद्गीताभाष्यं, भगवद्विषयः, श्रीमद्रहस्यत्रयसारः" इत्यस्य ग्रन्थचतुष्टयस्य अविच्छिन्नगुरुपरम्परया अध्ययनसम्प्रदायोऽनुवर्तमानः वडकलासम्प्रदाये उपनिषद्ब्रह्मसूत्रादितुल्यमादरं तत्र प्रदर्शितं प्रस्फुटं प्रकाशयति । वडकलैकद्वेचालयेषु, गृहेषु च विवाहाचार्यजन्मनक्षत्रमातापितृश्राद्धादिकालेषु वेदपारायणादिवत् दिव्यप्रबन्धपारायणमपि अविच्छेदेन नियमेन क्रियमाणं तत्र प्रमाणं भवति । शिष्याचार्यपरम्परया अधीतदिव्यप्रबन्धाश्च सुबहवः सन्त्येव । "निमीलयतु लोचने न हि तिरस्कृतो भास्करः" । "आर्जवमीषदपि नास्त्यमीषां हृदये" इति निरस्तङ्कोचं लिख्यते । अजशिशुवृकसंवादोऽत्र स्मृतिपथमधिरोहति ।

10 श्रीशठकोपसूक्तिसहस्रस्य "अष्टादशसहस्री' इति प्रसिद्धं व्याख्यानं कृतवन्तं महापरकालस्वामिनं प्रति सत्यलेशेनाप्यमिश्रिता शुद्धमिथ्याकथा काचिदिह लिख्यते,

"विदुषामपि मोहमावहन्तो वितथैतिह्यसहस्रवर्णनेन ।
..... खलाः किलामी विजयन्ते कपटालया जगन्ति ।।"

इति वेङ्कटाध्वरिवचनस्य मुख्यविषयतामात्मन्येव ख्यापयतेव । अत्र तत्त्वं जिज्ञासमानैः मैसूरश्रीब्रह्मतन्त्रस्वतन्त्रपरकालास्थान-श्रीकार्यकर्त्रा श्रीकस्तूरि-श्रीनिवासरङ्गाचार्येण प्रकटितं "रामानुजदयापात्रपद्यतत्त्वनिरूपणं", श्रीनृसिंहप्रियायां हिन्दीभाष्यां प्रकाशितः तदनुवादश्च द्रष्टव्ये ।

अथ तद्व्याख्यानं प्रस्तुत्य

"तदुपक्रमे तेन निबद्धं पद्यमिदमवधेयम् ।

"व्याख्यानं शठकोपदिव्यवचसां यद् दाक्षिणात्यैः कृतं
श्रीभाष्यादिविरुद्धमेव तदिति ख्यातं यतः प्रायशः।
स्वारस्यं परिगृह्य तद्गतमतस्तुष्ट्यै सतां धीमतां
त्यक्त्वाऽन्यत् परकालसंज्ञयतिना तत्सङ्ग्रहो लिख्यते ॥"

श्लोकस्यास्य तावदयं भावः— सहस्रगीतेः तेन्कलाऽऽचार्यैर्विरचितं व्याख्यानमतीव रसघनं विराजते ; परन्तु तत्र सन्त्यर्थविरोधाः। तथा नाम विरुद्धानंशान् विसृज्य रसघनानंशान् परिगृह्य मदीयां व्याख्यां पूरयामि—इति।"

इति लिखति। अव्युत्पन्नस्य तात्त्विकोऽर्थो न स्फुरति, अतात्त्विकस्तु स्फुरति। तस्यैव पक्षपातित्वे सुतरां तत् तथा भवति। "यद्दाक्षिणात्यैः कृतं व्याख्यानं तत् प्रायशः श्रीभाष्यादिविरुद्धमेवेति ख्यातम्" इति श्रीभाष्यादिविरोधभूयस्त्वं पूर्वार्धे उक्तम्। रसवत्त्वं नैव सूचितमपि। "अयं तु भाववर्णने प्रवृत्तः तेन्कलाचार्यैः कृतं व्याख्यानं रसघनं विराजते" इति प्रथमं न केवलं रसं अपि तु रसघनत्वं तेन विराजनं चोक्त्वा पश्चात् अर्धहृदयेन 'परन्तु सन्त्यर्थविरोधाः' इति लिखति 'श्रीभाष्यादि' इति 'प्रायशः' इति च मूले स्थितं गजनिमीलिकयोपेक्षमाणः। एवं ग्रन्थानां स्थितमर्थं परित्यज्य अस्थितमर्थं कल्पयित्वा स्वपक्षस्थापने कृतोद्यमाः सति सौकर्ये परशिरश्छेदमपि निश्शङ्कं कुर्युरिति ज्ञेयं विवेकिभिः।

अयं तु श्लोकार्थः— "तद्व्याख्यानं भूयिष्ठं श्रीभाष्यादिविरुद्धमेवेति ख्यातं यतः, अतः यत् तथा विरुद्धतया अस्वरसं, तत् सर्वं त्यक्त्वा तत्सङ्ग्रहः व्याख्यानसङ्ग्रहः संक्षिप्तं व्याख्यानमित्यर्थः लिख्यते।

यदेवं श्रीभाष्यादिविरोधभूयस्त्वं तन्नोच्यते, यच्चव्याख्यानान्तरकरणे मया उद्यमः क्रियते न तेन एतन्मन्तव्यं यन्मम तत्र द्वेषोऽस्तीति, तेनास्थानेऽपि खण्डनसम्भ्रमः प्रदर्शयिष्यत इति। "स्वारस्यं परिगृह्य तदूतम्" । श्रीभाष्याद्यविरुद्धतया युक्तियुक्ततया च यत् तत्र स्वरसं भवति तत् सर्वमनुपेक्ष्य परिग्रहीष्याम्येवेति । एवमभिनवव्याख्यानस्य किं फलम् । तदुच्यते— "तुष्टयै सतां धीमताम्" इति । पूर्वव्याख्याने धीमतां सतां तुष्टिर्नास्ति । ये हि अधीमन्तः ते श्रीभाष्यादिविरोधग्रहणासामर्थ्यात् श्रद्धाजाड्येन तुष्येयुः । ये च असन्तः तेऽपि विरोधग्रहणे सत्यपि सङ्केतबन्धेन वा ममत्वाभिमानेन वा तुष्येयुः । ये पुनः विरोधांश्च गृह्णन्ति ऋजुत्वाच्च तत्प्रच्छादनं नेच्छन्ति तेषां तत्रासन्तोषो भवति । तेषां तोषायेदमभिनवं व्याख्यानमिति ।

एतेन संस्कृतवेदान्तमुपेक्ष्य ये दिव्यप्रबन्धमात्रनिरता भवन्ति तेषां निबन्धनानि भगवद्भाष्यकारादिसिद्धान्तविरुद्धार्थशतदन्तुराणि भवन्तीति दिव्यप्रबन्धाधिकारोऽपि मन्द एवेति सूचितं भवति ।

11–12 अत्र, निर्दिष्टपूर्वे 'रामानुजदयापात्रपद्यतत्त्वनिरूपणे' अप्रकम्प्यतया स्थापितं भूतार्थं प्रतिपादयामः । अयं अष्टादशसहस्रीकारो महापरकालस्वामी 1655* वर्षे अवतीर्णः 1676 प्रभृति 1737 पर्यन्तं आस्थानमलञ्चकार । सः स्वव्याख्याने प्रतिशतकमन्ते "मुनिवाहनमुनिकरुणालब्धद्रविडश्रुत्यर्थनिष्ठागरिष्ठचन्द्राद्रिवेङ्कटदेशिककरुणैकभाजनेन परकालयतिना" इति स्वाचार्यं चन्द्राद्रिवेङ्कटदेशिकं निर्दिशति । स वेङ्कटदेशिकः रामानुजदयापात्रश्लोकव्याख्याता ।

अयं महापरकालस्वामी श्रीपरकालमठास्थाने एकविंशः । तत्र पञ्चदशः ज्ञानाब्धिब्रह्मतन्त्रपरकालस्वामी । तस्य शिष्यः वात्स्याहो-

* अत्र वर्षसङ्ख्या सर्वा क्रैस्तुशकीया ।

बिलाचार्यः । तेन च इदं पात्रपद्यं व्याख्यातम् । स्वव्याख्यारम्भे च "द्वितीयब्रह्मतन्त्रस्वतन्त्रगुरुभिः विस्तरेण व्या यातस्य 'रामानुजदया-पात्रम्' इत्यादिश्लोकस्य सङ्क्षेपेण मया व्या या क्रियते" इत्ययमर्थो ज्ञापितः । एवं अष्टादशसहस्रीकारात् प्राचीनबहुभिर्व्याख्यातत्वात् इदं पद्यं तेन स्वामिना कृतमिति वादः केवलं मिथ्या परलोकादबिभ्य-तामेव शोभत इति मन्तव्यम् ।

अन्यदपि अत्यन्तावधेयं तत्र निदर्शितम् । कण्ठीरवनरसिंहराज-वोडयार् नाम कश्चन महाराजः मैसूर्-राज्ये 1704 प्रभृति 1714 पर्यन्तं शासनमकरोत् । तस्मिन् समये मेलकोट इत्यधुनाऽभिधीयमाने यदुगिरिक्षेत्रे तनियन्-पद्यपाठविषये कलाद्वयावलम्बिनां विवादो-ऽजायत । तत्र स महाराजः स्वनिर्णयं (1709) विरोधिवत्सरे एवं घोषयामास—

"विरोधिवत्सरज्येष्ठकृष्णत्रयोदश्यां श्रीमद्यदुगिरिक्षेत्रस्थाय चामत्याय विलेख्य प्रेषितमिदं निरूपम् । यथा यदुगिरिसन्निधौ तथा इतरसन्निधिष्वपि प्रबन्धानुसन्धानसमये राजवोडेयप्रभो-रारभ्य अस्मत्पितृपाददिनपर्यन्तं 'रामानुजदयापात्रम्' इति तनियन् श्लोकः अनुसन्धानेन यथाऽनुवृत्तः तथा इदानीमपि तयैव रीत्या 'रामानुजदयापात्रम्' इत्यादितनियन्श्लोकः अनुसन्धानेना-नुवर्तनीयः । अस्य निरूपस्य मातृकां गणककोशे लेखयित्वा रामानुजाचार्यसन्निधाविदमासञ्जनीयम् ।

श्रीः (राजमुद्रा)

इति । इदं निर्णयपत्रं मैसूर्-राज्यनिर्वाहकैः 1940 वर्षे मुद्रितप्रका-शितमास्ते । अस्मिन् निर्णयपत्रे निर्दिष्टस्य राजवोडेयर्-महाराजस्य राज्यशासनकालः 1578 वत्सरादारभ्य 1617 वत्सरपर्यन्तः ।

अस्मिन्नेव काले इदं तनियन् पद्यं श्रीयदुगिरिक्षेत्रे भगवन्मन्दिरेषु अनुसन्धीयमानमासीदिति सन्देहगन्धरहितं ज्ञायमानत्वात् 1676 वत्सरादारभ्य आस्थानमास्थितेन महापरकालस्वामिना तद्विरचितमिति अनुन्मत्तो न वक्तुमर्हतीति इदं तावदास्ताम् । अन्यत्तु इदमिह वक्तव्यम् । राजवोडयार्-कालादारभ्य स्वपितृकालपर्यन्तं अस्य पद्यस्य अनुसन्धानमासीत् इति यत् श्रीकण्ठीरवनरसिंहराजो वदति तेन तदवधि तदनुसन्धाने न कश्चिदाक्षेप आसीदिति निश्चेतुं शक्यम् । अथ तदानीं जात आक्षेपः कीदृश इति विमर्शे महाराजकृतनिर्णयपर्यालोचनया तस्य निर्धारणं सुकरम् । पूर्ववत् रामानुजदयापात्रपद्यानुसन्धानं कर्तव्यमिति निर्णयस्य दर्शनात् तत्र कर्तव्यमित्ययमाक्षेपस्तदा कृत इति सुग्रहम् । एवमाक्षेपकारिणः तेन्कलापुरुषा एवेत्येतत् अनुक्तिसिद्धम् ।

अथ चिरात्प्रवर्तमाने तदनुसन्धाने कथमष्टादशशतकोपक्रमे तस्य आक्षेपः समजनीति चिन्तनीयम् । श्रीशैलेशदयापात्रपद्यानुसन्धानं न कर्तव्यमिति वडकलापुरुषा आक्षिपन्नित्यत्र न किमपि प्रमाणमुपलभ्यते । तेन कलहारम्भकारिणः अन्य एव । एवं विषयाणां विवेचने इदमत्र अवश्यं वक्तव्यं भवति । कलाभेदमन्तरा सर्वैः श्रीवैष्णवैः देशिकपद्यमेव चिरादनुसन्धीयमानमभवत् । अथ कालक्रमाद् भेदबुद्धौ किञ्चिज्जातायां तेनकलाः तावन्तं कालं स्वैरप्यनुसंहितं देशिकपद्यं परित्यज्य वरवरमुनिपद्यमनुसन्धातुमारभन्त । सात्त्विकतया कलहमनिच्छन्तो वडकलाः तत्र मनागपि प्रतिरोधमनाचरन्तः स्वयं पूर्ववदेव देशिकपद्यानुसन्धानं कुर्वन्त आसन् । एवं कस्मिंश्चित् काले याते क्रमेण प्ररूढविषमबुद्धयः तेन्कलाः वरवरमुनिपद्यपाठानुमतिमात्रेणातृप्ताः 'मृदुर्हि परिभूयते' इति न्यायेन वडकलानभिभूय देशिकपद्यपाठनिरोधाय समनह्यन् । इदं सात्त्विकानामपि

तेषामसह्यमासीत् । तेन व्यवहारो महाराजसमीपमगच्छत्। देशिकपद्यानुसन्धानं न कर्तव्यमिति तेन्कलानां पक्षः। चिरानुवृत्तं तत् अविच्छिन्नं कर्तव्यमिति इतरेषाम् । अत्र यथापूर्वं कर्तव्यमिति महाराजो निर्णयं ददौ। वरवरमुनिपद्यपाठस्य वडकलापुरुषैरनाक्षिप्तत्वात् तत्र व्यवहारो वा निर्णयो वा नासीत। तस्मात तस्यापि अनुसन्धानमन्ववर्ततेति उभयपद्यपाठः सम्प्रति यदुगिरिभगवन्मन्दिरे दृश्यते इति।

एवं अष्टादशशतकारम्भे यदुगिरौ स्वकीयपात्रपद्यस्य प्रवेशं स्थैर्यं च जातं ज्ञातवन्तः देशान्तरवासिनः तेन्कला अपि स्वस्वक्षेत्रवर्तिभगवदालयेषु तत्सम्पत्तौ तीव्रमुद्यमं कर्तुमारभ्य अद्याप्यनुपरता महान्तं क्षोभं कुर्वन्तः देवालयान् सर्वान् प्रायो युद्धखलत्वेन पर्यणमयन्।

एवं वस्तुस्थितौ सत्यां यद्वैपरीत्येन सर्वमभिधाय आत्मवञ्चनां लोकवञ्चनां च कर्तुं अविश्रान्तं विनाऽऽलस्यं अतिसम्भ्रमेण बहु प्रलप्यते तदेवाले निरूपकाणां 'मिथ्या श्रीवैष्णवा अमी अलभ्यं परकीयं गौरवमात्मन इच्छन्तश्चेष्टन्ते' इति प्रत्ययमाधातुम । पतिव्रतानां, अभिजातानां, पण्डितानां च किल सर्वदा परिवादान् कुर्वन्तो विकत्थमानाश्च, कुलटा इति, दुर्जना इति, अपण्डिता इति च स्वस्वरूपं जगति प्रख्यापयन्ति। तथा प्रकृतेऽपि।

नाथमुनेरनन्तरं दिव्यप्रबन्धवैभवप्रतिष्ठापनेन तेषां भगवन्मन्दिरेषु पारायणव्यवस्थापनेन च श्रीदेशिकस्य यावद्गौरवं तावद्गौरवं न हि अन्यस्य यस्य कस्याप्याचार्यस्य दृश्यते। वरवरमुनिः सात्त्विको भागवत इति तावतायं सत्कारमर्हति, तं तस्मिन् कर्तुं न कोऽपि श्रीवैष्णवो मन्दायेत, परन्तु दिव्यप्रबन्धपारायणावसरे उदासीनं कञ्चित् तपस्विनं केवलं स्वकीयत्वाभिमानेन देशिकप्रतिभटतयाऽवस्थाप्य तत्पद्यं पठित्वा तावताऽप्यतृप्तैः कृतघ्नैः महोपकारिणो देशिकस्य तनियम्-पद्यपाठेन

चिरात् क्रियमाणस्य सत्कारस्य प्रतिरोधो विधीयमानः धार्मिकाणां सहृदयानां दुःसहो भवति ।

वरवरमुनिः क्वापि श्रीदेशिकोक्तिखण्डनं न करोति । प्रत्युत अभियुक्तत्वेन तमनेकत्र निर्दिशति । तत्प्रशिष्यस्य शिष्यश्च बभूव । तेन तं प्रति वडकलानां नास्ति स्वरूपमपि द्वेषकारणम् । कृष्णपाद-पिळ्ळैलोकाचार्याद्युक्तितात्पर्यस्य शास्त्राविरोधेन देशिकेन दर्शितत्वात् खण्डनं कृतमिति भ्रान्तैस्तामसैस्तेन्कलापुरुषैः देशिके प्रबलो द्वेषः क्रियते । अयमेव कुटिलप्रकृतिः उच्चावचं असकृद्देशिकं निन्दितवान् । मध्ये मध्ये अनुशयाभिनयप्रकटनं च करोति । तथापि देशिकद्वेष एवास्य देहोपादानकारणमिति इह जन्मनि तस्यापनयोऽशक्यः । अन्तर्बहिश्च आचार्यशिखामणौ एवमुत्कटं द्वेषं बिभ्राणोऽप्ययं अर्था-र्जनोपायतया देशिकदिव्यसूक्तीरुपजीवन् कालं क्षिपति । तावता च कतिपये अनेन विते जाले पतिता भवन्ति । ईदृशमेतत्स्वरूपं अगत्या सर्वजनवेद्यतया प्रकाशयत्सु अभिज्ञेषु अन्यत किमपि कर्तु-मशक्नुवन् अयं 'यूयमेव देशिकद्वेषिणः' इति वक्तुं प्रवर्तते । यथा महागजप्रतारको जम्बुकः कश्चित् कलभान् ब्रयात् यूयं महागजद्वेषिण इति तादृगिदं भवति ।

'श्रीमान् वेङ्कटनाथार्यः' इति तनियन्पद्यस्य इह प्रस्तावः केवलं मौख्र्यात् ।

13 श्रीकाञ्च्यां ताताचार्यवंशः सुप्रसिद्धः श्रीमन्नाथमुनिरस्य कूटस्थः । श्रीयामुनाचार्यश्रीशैलपूर्णकुरुकेश्वरा अस्मिन्नेव वंशे जाताः । सर्वैराचार्यगुणैः सम्पन्नाः प्रायः सर्वेषामेव देशिकसम्प्रदायस्थश्रीवै-ष्णवानां राज्ञां च बहूनां आचार्यकं कुर्वाणा बहवो महान्त इह व्यलसन् । श्रीकाञ्चीदेवाधिराजदिव्यालयकार्यनिर्वाहकैङ्कर्यभरः सर्वः

एतैरेव ऊढ आसीत्। परन्तु देशे तत्र तत्र विप्रकीर्णैः शिष्यैः स्वस्वग्रामं प्रत्यागम्य पञ्चसंस्कारोपदेशादिकरणेन वयमनुग्राह्या इति सानुरोधं सनिर्बन्धं प्रार्थिताः तत्र तत्र सञ्चरन्तः सन्तः भगवन्मन्दिर-कार्यनिर्वाहं आप्तैरन्यैः कारयन्ति स्म। विश्वासदार्ढ्यात् प्रतिनिधिभिः क्रियमाणे तस्मिन् निर्वाहे स्वयमप्रविशन्तः प्राय उदासीनकल्पा अभवन्। तथाविधेषु प्रतिनिधिषु आत्तान् जीयर् नाम कश्चित्। तस्य तेन्कलात्वेऽपि आदौ उत्कटवैषम्यदृष्टेरभावात् ताताचार्यवंश्याः तस्मिन्नपि पूर्णं विश्वासं न्यधुः। तथापि सः इतरैः सन्धुक्षितः क्रमेण भगवन्मन्दिरे स्वकीयान् पुण्ट्रान् तत्र तत्र निवेशयितुं प्रबन्धपारायण-काले स्वकीयतनियन्पद्यं अनुसन्धातुं चारभत। अत्र अतीव विमना-यितैः स्वसम्प्रदायस्थैः निवेदितवृत्तान्ता अपि ताताचार्याः दाक्षिण्य-भूम्ना उपेक्षाशीला एवासन्।

तस्मिन् समये तुरुष्कामियोगभयेन अरण्योपगूढं, 'उडयार् पालयं' नाम प्रदेशं नीत्वा गुप्तं रक्षितः श्रीदेवाधिराजस्य स्वदिव्यम-हिषीसहितस्य उत्सवदिव्यमङ्गलविग्रहः ततः प्रत्यानेतव्य आसीत्। प्रत्यर्पणं प्रार्थितः तत्प्रदेशप्रभुर्यवनः न तत् सम्मन्यते स्म। सर्व-स्मिन्नपि प्रयत्ने विफलीभूते ताताचार्या अन्ये च भक्ताः अत्यन्त विषण्णा इतिकर्तव्यतामूढा आसन्। तदात्वे स आत्तान्-जीयर् "श्रीशैलेशदयापात्रपद्यानुसन्धानाधिकारोऽस्मभ्यं प्रतिज्ञायताम्। यथा कथञ्चिदहं भगवन्तं प्रत्यानेष्यामि" इति सशपथं प्रतिश्रुश्राव। गत्यन्तरविरहात् ताताचार्याः तत्र सम्मतिं ददुः। इदं 1711 वत्सरे वृत्तम्। प्रागेवोप्तकलहबीजाः तेन्कलाः एवं दृढेऽधिकारे लब्धे सुतरां पराक्रमितुमारभन्त। यदा यदुगिरौ कलहोऽभवत् स एवायं कालः। तत्र वृत्तमेव निदर्शनं कृत्वा इमे क्रमेण चिरानुवृत्तरामानुज-दयापात्रपद्यानुसन्धाननिरोधे बद्धकच्छाः समपद्यन्त। असुरराक्षस-

चर्याचारिष्वेतेषु, दाक्षिण्यस्वभावतया अकिञ्चित्कारिषु च तातार्चार्येषु, अन्ये वडकलाः सुमहद्वैमनस्यमापेदिरे । तेषु कस्यचनायं श्लोकः कर्ण-परम्परया श्रूयते—

अन्नार्थी तातयाचार्यः अर्थार्थी च बृहद्यतिः ।
आत्तान् जीयर् च पद्यार्थी शेषाः सेवार्थिनो वयम् ॥

इति । देशिकपद्यानुसन्धानप्रतिरोधव्यसनिनोऽमी महतामनल्पां हिंसामप्यकुर्वन्निति निश्चितं ज्ञायते । अत्रापि विषये वृद्धानां मुखात् कश्चन श्लोकः श्रुतः ।

अशनिरशनिपल्लीवंशजे ब्रह्मघाति-
न्यभिपततु सुतीक्ष्णस्तूर्णमाचार्यनाम्नि ।
य इह निगमचूडादेशिकेन्द्रस्य पद्यं
न्यरुणदनघहृद्यं हन्त निर्बध्य साधून् ॥

इति । एवं किल साक्षात्कृततदानीन्तनदुरवस्थः कश्चिन्महात्मा अशो-चत् । एवं यदुगिराविव काङ्क्ष्यामपि अष्टादशशतकारम्भ एव साधि-कारतेन्कलापात्रपद्यप्रवेशो भगवन्मन्दिरे । ततः पूर्वं तु देशिकपद्या-नुसन्धानमेव चिरानुवृत्तम् । अस्य प्रतिरोधश्च तत्र विषयवेदिनो धार्मिकस्य महाराजस्य स्थितत्वादशक्य आसीत् । इह तु तादृशस्य कस्यचिद्विरहात् या काचन स्थितिर्वर्तते । कीदृशी इयं स्थितिरिति तु पश्चात् कदाचिद्विस्तरं करिष्यामः । इह हि देशिकपद्यानुसन्धान-मेव प्राचीनमित्येतन्निरूपणमेवोद्दिष्टम् ।

14 इतः 376 वर्षेभ्यः पूर्वं सिंहासनमारूढस्य राजवोडयार्-महाराजस्य काल एव देशिकपद्यं यदुगिरौ अनुसन्धीयमानमासीदिति वस्तुतत्त्वस्य निरूपितत्वात् 200 वत्सरेभ्यः पूर्वं तत् निर्मितमिति वादो मायाविनां अपुनरुदयं अगाधे गर्ते निखातः भगवता रामेण

विराध इव । अत इह आग्रहिणा अनृजुना उच्यमानं सर्वं प्रलापमात्रम् ।

यदुच्यते नाथमुनेरारभ्य वरवरमुनिपर्यन्तानामाचार्याणामेकमेव तनियन्-पद्यमिति तेन किं फलति ? किमिह अनुमानात् देशिकस्य पद्यान्तराभावः साधयितुमिष्यते ? उत तत्सामान्यात् सम्भावनामात्रं क्रियते ? नाद्यः । श्रीशठकोपसूरेराचार्यस्य सहस्रगाथार्थे बहुपद्यदर्शनात् । न चैकस्यैव तत्र तनियन्त्वम्, इतरत् सामान्यस्तुतिमात्रम् । सार्वत्रिकव्यवहारविरोधात् । 'तिरुविरुत्ता'र्थे च पुनः पद्यान्तरदर्शनात् । न द्वितीयः । शठकोपसूरेरिव देशिकस्यापि वैभवातिशयेन अनेकपद्यवत्त्वस्यात्यन्तमौचित्यादित्यलं अनभिज्ञं प्रति शास्त्रप्रक्रियाप्रसञ्जनेन ।

15 श्रीदेशिकपद्यप्राचीनत्वे अप्रकम्प्ये स्थिते वरवरमुनिपद्यकाराः किमिति पद्यान्तरच्छायां विहाय रामानुजदयापात्रमित्येतत्पद्यच्छायामेवान्वसरन्निति विमर्शोऽत्र कर्तव्यः, नान्यः, तस्मिंश्च कृते यदत्र जडमतिना परान् प्रत्युच्यते तत् सर्वं स्वशिरस्येव पतितं ज्ञास्यते । कलहकाराः परेषां शिरसि प्रहरन्त इव उच्चैः शब्दायेरन्, न तूपांशु मुणमुणायेरन् ।

16 आडम्बरसारः अज्ञसार्वभौमः केवलं पामरव्यामोहनाय उक्तमुक्तं पुनर्वदति । प्रतिज्ञातं प्रतिज्ञातं पुनः प्रतिजानीते । असङ्गतमेव बहु प्रस्तौति । अर्थशून्या एव वाचो विमुञ्चति ।
श्रीमान् वेङ्कटनाथार्य इत्यस्मिन् पद्ये विद्यमाने किमिति रामानुजदयापात्रपद्यमकुर्वन् इति विमर्शस्य को नाम सम्प्रति प्रसङ्गः ? श्रीमान् वेङ्कटपद्यमनुसन्धाय यदि वडकला भगवन्मन्दिरेषु दिव्यप्रबन्धपारायणं कुर्युः किमयं एतदीयाश्च तत्र प्रतिरोधं नाचरिष्यन्ति ?

अत्र तत्त्वमिदम् । यथा शक्यं तथा तथा देशिकपात्रपद्यस्य कुत्सनं कर्तव्यमित्यस्यासुरप्रकृतेर्नैसर्गिकं दुर्निवारं कौतुहलम् । तदर्थं श्रीमान्वेङ्कटपद्यप्रशंसामपि कर्तुमुत्सहते । यदि श्रीमान्वेङ्कटपद्यमेकमेव भगवतो निगमान्तमहादेशिकस्य तनियन् अभविष्यत् यदि च तदेव दिव्यप्रबन्धपारायणोपक्रमे अनुसन्धीयमानमभविष्यत् तदाऽपि इदमेव पद्यं रामानुजदयापात्रपद्यदशामेव एषां हस्ते प्राप्स्यत् ।

17 "समाश्रयणपरम्परायां ग्रन्थकालक्षेपपरम्परायां च तनियन्पद्यानुसन्धानप्रकरणेषु अमी रामानुजदयापात्रपद्यं मनसाऽपि न स्मरन्ति" इति लिखति । समाश्रयणगुरुपरम्परायां देशिकस्यानन्तर्भावे सति श्रीमान्वेङ्कटपद्यमपि नानुसन्धीयते । प्रसङ्गाभावात् । किं तेन । भगवद्विषयकालक्षेपावसरे रामानुजदयापात्रमित्यारभ्य तनियन्-अनुसन्धानमस्त्येव । नेति मतिविभ्रम एव ।

"प्रामाणिकाः शिष्टाश्च सर्वेऽपि वडकलाख्याः सर्वत्र श्रीमान् वेङ्कटनाथपद्यमेव ह्याद्रियन्ते" इति लिख्यते । भगवन्मन्दिरे वा गृहे वा दिव्यप्रबन्धपारायणोपक्रमे कः शिष्टः प्रामाणिकः श्रीमान्वेङ्कटपद्यं पठतीति निर्देशस्तावत् कर्तव्यः । अनृतवादस्य किमवधिरेव नास्ति ?

"श्रीशैलेशदयापात्रपद्यप्रतिद्वन्द्विभावेनैव रामानुजदयापात्रं निर्मितमिति वस्तुतत्त्वस्याभ्युपगम एव शरणमनपायम्" इति यदुक्तं तत् 'श्रीशैलेश' 'रामानुज' इत्यनयोरन्योन्यस्थानविनिमयं कृत्वा पठितव्यम् । कोटिकृत्वोऽपि आम्रेडितं अनृतं अनृतमेव । न कदाचिदपि सत्यं भवेत् ।

18 वृत्तिग्रन्थे तु जैमिन्युपरचिततया षोडशाध्याय्युपात्ता सङ्कर्षः काशकृत्स्नप्रभव इति कथं तत्त्वरत्नाकरोक्तिः ।

अत्र भ्रमः सदुक्तौ न वयमिह मुधा बाधितुं किञ्चिदर्हाः
निर्वाहस्तूपचारात् क्वचिदिह [दिति] घटते श्लोकतात्पर्ययोगः ॥

इति अधिकरणसारावल्यां देशिकः प्राचीनोक्तिषु विरोधप्रतिभाने सति कथं निर्वाहः कार्य इत्यत्र अनुसर्तव्यां दिशं दर्शयति ।

"ब्रह्मतन्त्रचतुरायोगिने
वेदमौलियुगलं ह्यपादिशत्"

इति महाचार्यश्रीसूक्तिः कुरुकेश्वरकृतषट्सहस्रीपर्यन्तभगवद्विषयग्रन्थविषया । श्रीदेशिकसन्निधावनधीत्य तत्पुत्रसन्निधौ अध्ययनोक्तिः निगमपरिमलविषयेति को विरोधः ? गुरुपरम्पराग्रन्थ एव एवं विषयविभाग उक्तः ।

19 'पुनरपि सुष्ठु विशदयाम एतत्' इति प्रतिज्ञाय तृतीयब्रह्मतन्त्रस्वामिलिखिततया किञ्चिदभिधाय अन्ते

"तदिदं लज्जाभयलेशमन्तरा कल्पितमैतिह्यमित्यत्र कस्यापि विवेकिनो हृदयं नैव विसंवदेत ।"

इति लिख्यते । हन्त ! कियद्रमणीयं, कियन्निपुणं, कियत् समञ्जसं विशदीकरणम् ! "ऐतिह्यवर्णने वयमेव अधिकारिणः, वयमेव तन्न लब्धपताकाः । तस्मादस्मामिरेव निर्लज्जैर्निर्भयैश्च भूयते । इतरैः प्रामाणिकैः कथं तथा भवितुं शक्यमिति विस्मयत इव । असत्यत्वसत्यत्वप्रत्ययाभ्यामत्र महान् विशेष इति तु घोषणमद्य कर्तव्यं मन्यामहे । 'ख्रितथैतिह्यसहस्रवर्णनेन' इति हि पताका दत्ता । अन्येषां तु असत्यत्वप्रत्यये सति नैव तन्निबन्धने प्रवृत्तिः स्यादिति लज्जाया वा भयस्य वा नास्त्यवकाशः ।

रामानुजदयापात्रपद्मस्य आलयेषु अनुसन्धानप्रतिबन्धो यद्यस्ति तेन तस्य ब्रह्मतन्त्रस्वामिकृतत्वे का क्षतिः । यस्मादिदानीं श्रीमद्रामा-

यणमनुस्मृतिकोशौ दहन्ति तेन किं तयोर्वाल्मीकिमनुकृतत्वं नास्तीति स्वस्थबुद्धिना केनापि साधयितुं प्रयत्येत ।

आळ्वारादीनां दूषणं कृतमुच्यते । शठकोपसूरिः भक्तो वा प्रपन्नो वा इति विमर्शमुपक्षिप्य अपशूद्राधिकरणन्यायसञ्चारपूर्वकं उपनिषद्विहितायां भक्तौ तस्यानधिकारात् प्रपन्न एव सः इति सिद्धान्तः षट्त्रिंशत्सहस्रीग्रन्थे कृतः सर्वलोकविदितः । किमिदं नम्माळ्वार्-सूरेः दूषणं उत भूषणम् ? इतोऽधिकं दूषणं परैः किं कर्तुं शक्यम् ? 'जन्मवृत्तादिभिर्निहीनः' इति मुनिवाहनसूरिविषये व्याख्यात्रा उक्तं चावधेयम् ।

20 पुनरिन्द्रजालान्तरमिह प्रतन्यते । द्राविडग्रन्थसम्बन्धितालपत्रकोशेषु उपक्रमे पाद्यपद्यं क्वापि न दृश्यते । अत इदं न प्राचीनमिति । क्वापि न दृश्यत इत्येतत्प्राच्यत्वदूषणानुपयुक्तम् । इदं पद्यं महापरकालस्वामिना कृतमिति ह्युच्यते । तस्य आस्थानकालः 1676 वत्सरात् प्रभृति 1737 पर्यन्तः । अत इदं पद्यं अद्य अवरतः सप्तदशाधिकशतद्वयवर्षैः प्राचीनम् । तत्र नास्ति संशयः । तस्मात् कालात् प्रभृति वडकलानां अस्मिन् पद्ये अभिनिवेशोऽस्तीति चाभिधीयते । अद्य विद्यमानाः प्रायः सर्वे तालपत्रकोशाः अस्मिन्नेव काले लिखिताः । एतेन प्रचारे स्थितमेव पद्यं कोशेषु न लिखितमासीदिति निस्सन्दिग्धं प्रतीयते । एवं सति कोशेषु तस्यादर्शनं कस्मै निर्णयाय उपयुज्यते ? अध्ययनकालेऽनुसन्धेयस्यापि कोशेषु लेखननिर्बन्धो नासीत्, यथा श्रीभाष्यादिकोशेषु शान्तिपाठादीनाम्, इत्येतदेव हि ततः सिद्ध्यति । तस्मात्कोशेष्वदर्शनमालम्ब्य विजृम्भणं अज्ञत्वविलसितस्य अपरः कश्चित् प्रकार इति ज्ञेयम् ।

अपि च स्वकीयं अपरमतिगाढमज्ञानमिह पूर्वपक्षी प्रकाशयति । न हि रहस्यग्रन्था द्राविडग्रन्थाः । मणिप्रवालरूपतया द्राविडपदसत्त्वे-

ऽपि स्मृतिवचनानामिव दिव्यप्रबन्धगाथानामुदाहरणेऽपि च श्रीभाष्याद्युक्ततत्त्वार्थविशदीकरणार्थत्वेन श्रीमदष्टाक्षरादिविवरणपरत्वेन च संस्कृतप्रधानत्वात् । मुनिवाहनभोगस्तु एकोऽत्रापवादः । सोऽपि तादृशानां भूयिष्ठानां मध्ये घटकत्वात् तथैव भाव्यते । मूलस्थगाथादशकस्य श्रीमदष्टाक्षररूपतयैव तत्राध्यवसितत्वाच्च । अत एव तद्विवरणस्य मुनिवाहनभोगस्य रहस्यग्रन्थत्वम् । न हि दिव्यप्रबन्धव्याख्यानानां सर्वेषां रहस्यग्रन्थत्वमिष्यते । तदेषु द्राविडग्रन्थत्वं कृत्वा तत्सम्बन्धिकोशेषु पात्रपद्यादर्शनेन न्यूनताभिधानं उपनिषद्भाष्योपक्रमे भक्तामृतश्लोकादर्शनकृतन्यूनताऽभिधानतुल्यमिति वेदितव्यम् ।

वस्तुतस्तु बहुषु ताळपत्रकोशेषु श्रीमान् वेङ्कटपद्येन सह च विना च पात्रपद्यं लिखितं दृश्यत एव । तिरुपतिक्षेत्रस्थश्रीवेङ्कटेश्वरप्राच्यविद्याविमर्शशालासम्बन्धिनि पुस्तकालये स्थिताः कोशा अवेक्षणीयाः । तत्र 815 सङ्ख्यावर्तिं कोशे 124 पत्रे प्रधानशतकारम्भे 'श्रीमान् वेङ्कट...सदा हृदि, रामानुजदयापात्रं... वन्दे वेदान्तदेशिकम्' इत्युभयं दृश्यते । 132 पत्रे 'रामानुजदयापात्रं... वन्दे वेदान्तदेशिकम्' इत्येतदेकमेव । 3047 सङ्ख्यावर्ति कोशे 18 पत्रे तत्त्वसन्देशोपक्रमे 21 पत्रे रहस्यसन्देशोपक्रमे च "श्रीमान् वेङ्कट...हृदि, रामानुजदयापात्रं.... देशिकम्, शीरोनरुतूप्पुल् .. वाळ्वु" इति त्रयमपि लिखितम् । परं त्विमे रहस्यग्रन्थकोशाः । प्रकृतोपयोगितया द्रष्टव्यास्तु दिव्यप्रबन्धकोशा एव । 1408, 2531, इति सङ्ख्यातयोः श्रीवेङ्कटेश्वरविमर्शशालासम्बन्धिपुस्तकालयस्थयोः 'मुदलायिर' प्रथमसहस्र) कोशयोः रामानुजदयापात्रपद्यं अन्यानि च लक्ष्मीनाथसमारम्भाम्' इत्यादीनि पद्यानि दृश्यन्ते । 3672 सङ्ख्यावति कोशे केशवार्यकृपापात्रम्, रामानुजदयापात्रम् , उभयमप्यस्ति ।

अपरो विशेषोऽत्रास्ति । 'मुदलायिर' (प्रथमसहस्र) कोश एव अन्यः कश्चिदस्ति । तत्र आन्ध्रीलिपिः । तस्य सङ्ख्या 653 अत्र उपक्रमः—

'श्रीमते रामनुजाय नमः। गुरुमुखमनधीत्य' इति।

उपसंहारश्च—

मधुरकविचरणावेव शरणम् । अस्मद्गुरुभ्यो नमः । श्रीमद्रघुनाथगुरवे नमः । वादिभीकरगुरवे नमः । तोताद्रिरामानुजगुरवे नमः।

इति । अस्य लेखकः लेखने कृतहस्तः । पार्श्वद्वये शङ्खचक्राभ्यां सह तत्तद्दिव्यसूरिरूपमपि तत्र तत्र पत्रमध्ये लिखति। अयं तेन्कलागृहादाहृतः कोश इत्यत्र नास्ति संशयस्यावकाशः । तादृशेऽस्मिन् श्रीशैलेशपात्रपद्मं वा लक्ष्मीनाथसमारम्भामित्यादिकं वा किमपि न दृश्यते । अन्ते बहूनां नमस्कारे क्रियमाणे वरवरमुनेः स नास्ति। अपरः कोशः 'तिरुवाय्मोलिव्याख्यानम्' इत्याख्यातो वर्तते । तत्रापि 'श्रीमते रामानुजाय नमः' इत्येतावन्मात्रमादौ दृश्यते ततः साक्षाद्व्याख्यानारम्भ एव । तस्मात् तालपत्रकोशेषु तनियन्-पद्यलेखननिर्बन्धः तेन्कलासम्प्रदायेऽपि नास्तीति प्रतीतेः अनभिज्ञेन अस्थान एव सम्भ्रमः पदर्श्यत इति ज्ञेयम् ।

"वेदान्तदेशिकवैभवप्रकाशिकाया मणिप्रवालमयो भागः तालपत्रलिखितः मद्रराजकीयप्राच्यलिखितपुस्तकालये वर्तते । तस्य सङ्ख्या R. No 104. H. 38–14 इत्येवंरूपा । तत्र रामानुजदयापात्रपद्यं न दृश्यते" इति विलिख्याट्टहासः क्रियते। तस्मिन् तालपत्रकोशे तनियन्-श्लोकभागस्य यद्रूपं तत् परिपूर्णतया तथैव कुतो नोच्यते ? पात्रपद्यं न दृश्यत इत्येतावन्मात्रं कथमुच्यते ? शुद्धा वञ्चना ह्येषा। वैभवप्रकाशिकाग्रन्थः अचिरातीतप्रमाथिसंवत्सराद पिप्राक्तने प्रमाथि-

संवत्सरे (1879) मुद्रितः। स इतः पञ्चसप्तत्यधिकवत्सरेभ्यः पूर्वं प्रकाशितः। स प्राचीनानेकमातृकापरामर्शेन सम्पादित इति सम्पादका वदन्ति। तत्र 130 पुटे कुमारवरदाचार्यकृतयोः श्रीमान् वेङ्कट, कवितार्किकसिंहाय, इत्येतयोर्मध्ये ब्रह्मतन्त्रस्वतन्त्रस्वामिकृतं 'रामानुदयापात्रं' इत्येतत् पिल्लैलोकाचार्यकृतम् 'श्रीरोन्रुतूप्पुल्' इत्येतच्च पद्यं दृश्यते। निर्दिष्टपूर्वे मद्रराजकीयपुस्तकालयस्थे तालपत्रकोशे कुमारवरदाचार्यीयपद्यद्वयमध्ये न केवलं 'रामानुजदयापात्रम्' इत्येतदेव अपि तु 'श्रीरोन्रुतूप्पुल्' इत्येतदपि न दृश्यते। न चैतयोरदर्शनमात्रमेव किन्तु मुद्रितवैभवप्रकाशिकापुस्तके 74 पुटे पराजितडिण्डिमकविकृतत्वेन पठितः 'घोटीघाटीकठोर' इत्यादिः श्लोकः तयोः स्थाने लिखितो दृश्यते। न चास्य श्लोकस्यात्र स्तोकाऽपि सङ्गतिरस्ति। तेन तत्र पद्यान्तरस्थितिः स्फुटमेवावगम्यते। अस्य लिखितकोशस्य या मातृका महान् श्लोकोऽयं लेखकेन लिखितो भवेत्। पूर्वपक्षिसजातीयेन वा केनचित् बुद्धिपूर्वमेव एकं तत् पत्रमपनीय विपर्यस्य प्रतिनिहितं भवेत्, तस्य कोशस्य पुस्तकालयप्राप्तेः पूर्वं वा पश्चादेव वा कथमपि। किं हि न क्रियेत साहसिकैः। यथा दृष्टं सर्वमनुक्त्वा निजाभिमतदुरसिद्धान्तानुकूलमात्रं विदुषामपि मोहावहमुच्चैः पदेपदे घोषयतां किं नाम साहसं लोके अकरणीयमस्ति।

21 अत्रापि स्वयं बलवद्व्यामुग्धः परानपि व्यामोहयितुमुद्युङ्क्ते। मुद्रणयन्त्रप्रादुर्भावात् प्राक् नैव जज्ञे देशिकपात्रपद्यमिति अत्र प्रतिज्ञायते। महापरकालस्वामिना कृतमिति पूर्वं प्रतिज्ञायते। तस्य च स्वामिनः कालस्य ज्ञातत्वात् पद्यस्यापि तद्रीत्या स एव कालः। पुनरनेन प्रतिज्ञान्तरेण किं कृतं भवति। मुद्रणयन्त्रप्रादुर्भावः किं स्वामिनः प्राचीनः उत समकालिकः उत अर्वाचीनः। आद्ये तत्प्रादुर्भावानन्तरत्वेऽपि

स्वाम्यवतारात्प्रागेव अन्येन केनापि तत्करणसम्भवात् स्वामिकृतत्व-प्रतिज्ञाहानिः । द्वितीये प्रतिज्ञान्तरवैयर्थ्यम् । अन्त्ये पुनः स्वामिकृतत्व-प्रतिज्ञाहानिः । एवं तालपत्रमुद्रायन्त्रालयादिप्रस्तावः सर्वः बुद्धिप्रसा-दात्यन्ताभावकृतः मृदुधियां व्यामोहमात्रफलकः प्रस्तोतुर्वाचामगोचर-बालिश्यव्यञ्जकः विदुषां नितान्तमुद्वेजकः ।

अत्रापि किञ्चित् स्वपक्षप्रतिकूलमेव लिखन् आत्मनि अत्यन्तं शोचनीये परान् प्रति शोकमाविष्करोति । तूप्पुल् वेङ्कटाचार्येण मुद्रिते पञ्चव्याख्यानसहिते श्रीमद्रहस्यत्रयसारकोशे आरम्भे पात्रपद्यं न दृश्यत इत्युक्त्वा, सद्यः 'श्रीमान्वेङ्कटपद्यं वा किं दृश्यत' इति स्वयमुत्तिष्ठतः प्रश्नस्य समाधानं ब्रुवन्निव 'श्रीमान्वेङ्कटनाथार्यपद्यमेव विलसति' इत्यभिधाय तत्र स्वकीयां छलवृत्तितां छादयन्

'तच्च पद्यं मुद्रणकारैर्न मुद्रितम् । अपि तु साराख्यादिनीनामक-प्रधानव्याख्याप्रणेत्रा महात्मना स्वहस्तेन लिखितं तत्पद्यमिति स्पष्टं प्रतीयते ।'

इत्यनुबध्नाति । "व्याख्याता स्वव्याख्यानारम्भे श्रीमान् वेङ्कटनाथार्य-पद्यमनुसन्धत्ते । न तु मूलारम्भे तत्पाठो दृश्यते" इत्येवोक्तं भवति । एवमेव तिरुच्चेरै-क्षेत्रमुद्रणेऽपि काञ्चीमुद्रणेऽपि च श्रीमान्वेङ्कटपद्यमपि मूलारम्भे न दृश्यते, न परं पात्रपद्यमेव । एवं च प्रामाणिकैः कृतेषु एषु मुद्रणेषु श्रीमान्वेङ्कटपद्यस्यादर्शनात् इदं पद्यं तस्मात् कालादन-न्तरमेवोत्पन्नं न ततः पूर्वमासीदिति वा प्रतिज्ञायताम् । श्रीभाष्यकार-तनियन्पद्यस्य श्रीभाष्यादिष्विव ग्रन्थेषु तनियन्पद्यस्य लेखने वा मुद्रणे वा नास्ति निर्बन्ध इति ग्रन्थमुखेऽदर्शनमात्रेण पात्रपद्यस्य प्राचीनत्वं न विहन्यत इति तदर्वाचीनत्वप्रतिज्ञाभङ्गो वाऽभ्युपगम्य-ताम् । न तृतीया गतिरस्ति ।

22 वस्तुतो रहस्यग्रन्थेषु पात्रपद्यानुसन्धानस्य नास्त्यवसर इत्युक्तं पूर्वम् । तेन तस्य कोशेष्वमुद्रणं न वाच्यत्वाय कल्पते । रहस्यग्रन्थाध्ययनावसरे अनुसन्धीयमानश्रीमान्वेङ्कटपद्यमुद्रणेऽपि नास्ति निर्बन्ध इत्युक्तम् । यदि केचित्सम्पादकास्तन्मुद्रयन्ति तत् तेषां श्रीदेशिके भक्तिप्रकर्षवशात् । अत एव हि केचित् तत्पद्यमात्रेणातुष्यन्तः पात्रपद्यं 'शीरोन्नतुप्पुल्' इति द्राविडपद्यं च मुद्रयन्ति । यथा इतः चतुःपञ्चाशद्वत्सरेभ्यः पूर्वं (शार्वरीवत्सरे) मद्र-रिप्पन्-मुद्रणालये मुद्रिते सप्तदशरहस्यकोशे इदं तनियन्-त्रयमप्यादौ दृश्यते ।

23 मुद्रायन्त्राण्यपि शकटासुरन्यायेन आविश्य रामानुजदयापात्रपद्यस्य क्वापि मुद्रणं यथा न भवेत् तथा प्रबलारभटीकरणौपयिकीं मायाशक्तिं सम्पादयितुं तपश्चर्या कुतो न चर्यते ?

"मुद्रायन्त्रं तावत् न किमपि पद्यं वाक्यं पदमक्षरं वा निरोद्धुं प्रभवति" इतीदं सत्यं वयमतिमात्रं शोचामः । अन्यथा हि ईदृशबालिशभाषितश्रवणदौर्भाग्यं विदुषां कर्णयोः कदापि परिणतं न भवेत् ।

जयपराजयौ घुष्येते । श्रीराघवावतारात् पूर्वं दण्डकारण्यवासिनामृषीणां, तन्मांसानि भक्षितवतां अन्येषां च यौ जयपराजयौ तादृशाविमाविति शास्त्राणि येषां प्रमाणं तैर्ज्ञायत एव ।

अनुपदं वर्धमानेन कलिना ध्वस्तप्रायेषु वैदिकेषु सर्वेषु धर्मेषु, घोरेषु दुराचारेषु च सर्वत्र भूयिष्ठं लब्धप्रचारेषु, 'कलौ पञ्चसहस्रान्ते विष्णुस्त्यक्ष्यति मेदिनीम्' इत्युक्तरीत्या त्यक्तवति च भगवति जगतीमिमां जय एवाधर्मलक्षणं पराजय एव धर्मलक्षणमिति न न विदन्ति विद्वांसः । किमनेन सर्वेण । पात्रपद्यस्यार्वाचीनत्वसाधनोपयुक्तं हि किमपि वाच्यम् ।

24–25 अत्यन्तमसङ्गतमेव बह्वत्र लिख्यते ।

"देशिकानां प्रभावातिशयान् तेन्कलाख्या एव ग्रन्थमुखतो ऽपि प्राकाशयन् । वडकलाख्यास्तु देशिकसम्बन्धं मध्यकाल एव स्वात्मन्यध्यारोपितवन्त इत्यस्यार्थस्य साक्षिणस्सन्ति विविधाः । तेषु चान्यतमं साक्षिणमिह निरूपयामः ।"

इति प्रतिज्ञाय

"चण्डमारुत-दोड्डयाचार्यस्तावत् तेन्कलाचार्य एव ।"

"स तु देशिकभक्त एव ।"

वेदान्तदेशिकवैभवप्रकाशिका न तत्प्रणीता । अपशब्दभूयिष्ठत्वात ।

अस्मत्कूटस्थः प्रतिवादिभयङ्कराचार्यः सप्ततिरत्नमालिकाकार इति वदन्ति । तन्न । तस्या अपि अपशब्दवत्त्वात् ।

इति ससंरम्भं निरूपयति । देशिकवैभवं तेन्कलाचार्या एव ग्रन्थमुखेन प्राकाशयन् इति प्रतिज्ञाऽत्र प्रथमं कृता । तस्याः स्थापनाय "देशिकवैभवप्रकाशकतयाऽद्य प्रसिद्धौ द्वौ ग्रन्थौ— चण्डमारुत-दोड्डयाचार्यकृता वैभवप्रकाशिका च प्रतिवादिभयङ्कराचार्यकृता सप्ततिरत्नमालिका च । इमावुभावपि कर्तारौ तेन्कलाचार्यौ" इत्युपपादनं कर्तव्यम् । इदं तु वस्तुतो देशिकस्तुतिपर्यवसायित्वान्नेष्टम् । अतः अपशब्दप्राचुर्यात् इमौ ग्रन्थौ ताभ्यामाचार्याभ्यां न कृतौ इति आन्तरस्य, आजन्मसिद्धस्य, अप्रतिविधेयस्य, अपरिच्छेद्यस्य, अनुक्षणमभिवर्धमानतया तदा तदा परिवहतः आचार्यद्वेषस्यानुरूपं भाषते । परं तु इदमेवं भाष्यमाणं तेन्कलाचार्यः कोऽपि देशिकवैभवं ग्रन्थतो न प्राकाशयत् इति विपरीतसाधकमेव भवतीति कुमतिरयं ज्ञातुं न क्षमः । एवं तावत् द्व्यंशायां प्रतिज्ञायां एकोंशः सुष्ठु स्थापितः । अथ वडकलाख्या मध्ये देशिकसम्बन्धं प्राप्ता इत्यस्यांशस्य कथं

सिद्धिः । तमंशं प्रति किमुक्तम् ? को मध्यपदार्थः ? कदा आरम्भः ? कथं तद्ज्ञायते ? शिशुरपि कश्चिदन्यः किमेवमर्थशून्यं भाषेत ?

शतदूषण्यां शठकोपसूरिदूषणं देशिकेन कृतमिति अयमेव पूर्वपक्षी बहुकृत्वो दूषितवान् । अस्याः शतदूषण्याः अतिभक्तिभरितो दोड्डयाचार्यः

तुरगवदनतेजोबृंहिताश्चर्यशक्तिः
कविकथकमृगेन्द्रः सर्वतन्त्रस्वतन्त्रः ।
जयति गुरुरबाधां वेदचूडार्यसंज्ञा-
मनितरजनलभ्यां लब्धभतो रङ्गभर्त्रा ॥

इति देशिकोत्तमं स्तुवन् चण्डमारुतनाम्नीं प्रौढविस्तृतां व्याख्यां विधाय चण्डमारुत-दोड्डयाचार्य इति प्रसिद्धो बभूव । एवं सति देशिकभक्त्या दोड्डयाचार्यः वडकलासम्प्रदायप्रविष्टो बभूवेति किं वाच्यम् , उत वैपरीत्येन देशिकः तेन्कलासम्प्रदायस्थ इति । स हि अप्पय्यदीक्षितेन सह वादे प्रसक्ते बहुदिनानन्तरं अतिविषण्णः स्वाराध्यभगवत्सन्निधौ प्रपत्तिं कृत्वा शयितः स्वप्ने प्रादुर्भूतेन भगवता सानुकम्पं 'वेदान्ताचार्यकृतां शतदूषणीमधीष्व, जेष्यसि' इत्यनुगृहीतः सम्प्रदायान्तराभिमानेन तदवधि देशिकं प्रति स्थितमौदासीन्यं परित्यज्य सानुशयः तं प्रत्यत्यन्तं प्रवणः सन् शतदूषणीं सेवित्वा वादिनं विजित्य तदाप्रभृति तद्भक्ताग्रगण्योऽभूत् । सिद्धान्तपरिपालनं प्रति किमप्यकृत्वा केवलसङ्केतमात्रेण आचार्यतया परिगृहीतान् श्रीभाष्यादिपरिश्रमविरहेण अनुचितातिवादप्रवणतया चासाम्प्रदायिकार्थवादिनश्चान्यान् प्रति

अपरिचितसम्प्रदायै-
रविदितयतिराजसूक्तितात्पर्यैः ।
अशमितकुदृष्टिगर्वै-
रलमलमन्यैरनागमान्तार्यैः ॥

इत्यभ्यधिकामवज्ञां प्रकाशयन् वैभवप्रकाशिकां च निर्ममे । तस्मात् भारद्वाजश्रीनिवासाचार्यवत् साङ्केतिकान् सम्प्रदायान्तराचारान् सर्वान् दूरतः परित्यज्य दोड्डयाचार्यः देशिकग्रन्थशिक्षितानेवावलम्ब्य परिपूर्ण-वडकलाचार्यो बभूवेति वस्तुस्थितिः । आधुनिकाः पुनरपि तेन्कला बभूवुरिति चेत तेषां तद्दौर्भाग्यम् । तत्र वक्तव्यानि अवक्तव्यानि च बहूनि कारणानि स्युः । इदानीन्तनतेन्कलाजनपूर्वपुरुषपूज्यत्वेन देशिक-स्य तेन्कलात्वसाधनं लङ्काराक्षससन्ततिभवैः स्वपूर्वपुरुषविभीषण-पूज्यत्वेन रामस्य राक्षसत्वसाधनकल्पमिति ज्ञेयम् ।

प्रतिवादिभयङ्कराचार्यश्च कुमारवरदाचार्यकटाक्षाधीनसर्ववैभव इति तस्य वडकलाचार्यत्वमप्रकम्प्यम् । तस्य च वरवरमुनेश्च न कोऽपि सम्बन्ध इत्यन्यैः मुनिरूपितमेव । इदानीन्तनास्तद्वंशजाः तेन्कला इति चेत् पूर्ववदेव बहुभिः कारणैर्जातोऽयं विपर्यास इति वाच्यम् । तद्वंशजा एते नैव भवन्ति । सगोत्रत्वमात्रेण आरोपित-तद्वंशसम्बन्धा इति वा ।

यत्तु अपशब्दा इति कांश्चित् प्रदर्श्य ग्रन्थस्य प्रसिद्धकर्तृकृतत्व-बाधने यत्नः क्रियते स स्वसम्प्रतिपन्नेपि सर्वत्र सुकरः ।

अपशब्दशतं माघे भारवौ तु शतत्रयम् ।
कालिदासे न गण्यन्ते

इति चाहुः । पिल्लैलोकाचार्यरहस्यग्रन्थेषु अपशब्दानन्वयादिदोषा अपरिमिता अन्यैर्दर्शिता एव । कूरनाथपञ्चस्तव्यां अपाणिनीयानि रूपाणि कति न सन्ति ? श्रीकृष्णपादाचार्यद्वयकृतयोः चतुर्विंशति-सहस्रीषट्त्रिंशत्सहस्रीग्रन्थयोः प्रायेण पदपदार्थवाक्यवाक्यार्थदोषाः प्रमाणग्रन्थविरोधाश्च दर्शयितुं शक्यन्ते । तस्मादयं मार्गः अत्यन्तं सापाय इति गृह्यताम् ।

न च निर्दिष्टाः प्रयोगाः सर्वथा असाधव एव। सहस्रमिति सङ्ख्यापरं, न तु सङ्ख्येयपरम्। सहस्रं सहस्रसङ्ख्या एषां पद्यानामस्तीत्यर्थे अर्श-आद्यच्प्रत्यये सहस्राणि सहस्रसङ्ख्याकानि पद्यानीति युज्यत एव बहुवचनम्। एवं क्लिष्टोऽप्ययं प्रयोगो न सर्वथा प्रयोजनशून्यः। यद्यप्येकमेव सहस्रं श्लोकानामिह वर्तते तथाप्येकैकस्य बह्वर्थगर्भतया बहूनि सहस्राणीत्येव मन्तुमुचितमित्यभिप्रायात्।

चतुःसप्ततिमिरित्यपि समञ्जसमेव। चत्वारि च सप्ततिश्चेति द्वन्द्वात्। दृश्यते चैवं प्रयोगः पश्चात्सुन्दरयतिकृतगुरुपरम्पराग्रन्थोदाहृते

संसेवितः संयमिसप्ततिभ्या
पीठैश्चतुस्सप्ततिभिः समेतः।
अन्यैरनन्तैरपि विष्णुभक्ति-
रास्तेऽधिरङ्गं यतिसार्वभौमः॥

इत्यस्मिन् श्लोके। "सप्तत्या तैश्चतुर्भिः" इति यतिराजवैभवे व्यस्तस्य च प्रयोगः। तेन विग्रहः सुग्रहः। एकं सहस्रम्। द्वे सहस्रे। त्रीणि सहस्राणि। एवं चत्वारि च सप्ततिश्च सहस्राणि। इति सुशोभनोऽयं प्रयोगः। सप्ततिः सप्तती सप्ततयः। इत्येकवचनवत् द्विवचनबहुवचने अपि भवत एव। केनोक्तं नेति। "सप्ततिपदस्य वा सहस्रपदस्य वा बहुवचनान्तता न शास्त्रसम्मता" इति गम्भीरं निर्भयं निर्लज्जं च अनाघ्रातयत्किञ्चिच्छास्त्रगन्धोऽपि शास्त्रं प्रमाणयन् घोषयति। केन शास्त्रेण तत्र बहुवचनं निषिध्यत इति हि वक्तव्यम्। 'विंशत्याद्याः सदैकत्वे' इति निघण्टोरर्थः अभिज्ञेभ्योऽधिगन्तव्यः। द्वे विंशती चत्वारिंशत्; तिस्रो विंशतयः षष्टिः; इत्यादि हि साध्वेव। यदि सहस्रपदान्न बहुवचनं तर्हि दशमे पर्वणि स्वैनैव प्रयुक्तस्य अष्टादशसहस्रिका' इति पदस्य कथं विग्रह इति हि बत पर्यालोचने नास्ति

बुद्धिप्रसरः । 'दिव्यप्रबन्धेषु आहृत्य कति गाथा इति प्रश्ने 'चत्वारि सहस्राणि' इत्येतद्विना किमन्यदुत्तरं दीयेतेत्यास्तां तावत् अव्युत्पन्नस्यातिविमर्दनम् ।

प्रौढिमपदेऽपि साधुत्वद्रढिमा दुर्निवारः । वामनेन कविभिः प्रयुक्तमिदमुपलभ्य 'अल्प इमनिच् दुर्लभः' इत्युक्तं जानद्भिरेव हि एवं प्रयुज्यते । अतः योगविभागादिना वा उदरम्भरिः इत्यादिवद्व्याकरणान्तरानुसारितया वा साधुत्वमत्र समर्थनीयमित्येषाममिप्रायः ।

26 शब्दजालेन वृथा ग्रन्थशरीरं वर्ध्यते । अणुमपि सारांशमन्तरा पुनरुक्तिमयबहुभाषणं केवलं पापफलमिति यदि बुध्येत लोकस्य क्षेमो भवेत् । पात्रपद्यकरणात् पूर्वं श्रीमान्वेङ्कटपद्यमनुसंहितमासीत् । तत्करणानन्तरं तदनुसन्धाने कर्तव्ये प्रसक्ते "श्रीमान्वेङ्कटपद्यस्थाने वा इदमनुसन्धेयम् ? समुच्चयेन वा ? तत् क्वचित् इदं क्वचिदिति व्यवस्थया वा ? इति विमर्शोऽवश्यमुत्तिष्ठेदेव । कृतस्य च पद्यस्य आचार्यानुमतिं प्राप्यैवानुसन्धेयत्वात् तत्सन्निधौ तन्निवेदनावसरे अनुसन्धानविषयं स्वसंशयमपि निवेद्य व्यवस्थयाऽनुसन्धेयमिति तन्नियमनमलभ्यतेति एवं निबद्धे वृत्तान्ते न खलु सुधियां किञ्चिदाक्षेप्तव्यमस्ति । ग्रन्थकर्तरि वृत्ते पश्चादनेकैः अनेकस्तुतिपद्यकरणे ततोऽप्यर्वाचीनैः कुत्र किमुपादेयं इत्यत्र विनिगमनाविरहात् समुच्चित्य तानि पठ्यन्तां नाम । प्रकृते तु जीवति गुरौ तद्विषये च एकस्मिन् पद्येऽनुसन्धीयमाने स्थिते कृतस्य पद्यान्तरस्य तन्नियमनानुसारेण काचन व्यवस्था सम्पन्नेति वैषम्यं महत् ।

'अपहास्यं ननु' इत्यभिधानमात्रेण तत्त्वार्थनिरासो यदि भवति स कुत्र दुष्करः ? पूर्वपक्ष्यभिमतं सर्वमत्यन्तमपहास्यमिति समये सुविशदं दर्शयिष्यामः ।

27 व्यवस्थामर्वाचीना नानुपालयन्तीति न । सर्वथा परिपालयन्त्येवेति निरूपितम् । अथ यत् श्रीमान्वेङ्कटपद्ये अस्वारस्यं पश्यन् ब्रह्मतन्त्रस्वतन्त्रस्वामी पद्यान्तरकरणे प्रावर्ततेत्युक्तमिव कृत्वा बहु जल्प्यते तदप्यस्थाने। औचित्यं तत्र निबन्धनमुक्तं, न त्वस्वारस्यम । अनयोर्यदि भेदो न गृहीतः वृद्धोपसेवनेन सोऽधिगन्तव्यः । भगवद्विषयाध्ययनावसरे भगवदनुभवौपयिकाचार्यपरम्पराकटाक्षपात्रत्वानुसन्धानमुचितमित्यभिप्रायेण तत्प्रतिपादकपद्यान्तरकरणमुच्यत इति विवेक्तव्यम् ।

विषयमगृह्णतैवास्य वर्णाडम्बरमात्रं रचनाया वैशिष्ट्यहेतुरिति मन्यमानेन यत् किमप्युच्यते तदुपेक्षामहे, अलं बधिरकर्णजापेनेति ।

"बालिशकविना केनापि कृतमिति सम्यगवधारणार्हमिदं पद्यम्" इति द्वेषाभिष्यन्दवमनं करोति । ननु भोः अबालिशकविना कृतस्य श्रीशैलेशपद्यस्य तदपेक्षया कस्मिन्नंशे को विशेष इति स्थित्वा पर्यालोच्य उच्यताम् । वर्षशतेनापि, साक्षाद्रङ्गनाथेनापि, स दुर्वच इत्यास्तामेतत् । दोषास्तु बहवः सन्ति । परन्तु प्रतीकारविधयाऽपि तदुद्घाटनमस्मभ्यं न रोचते । तदिदानीमुदास्यते । निर्बन्धे जाते पश्चादनिच्छयाऽपि तानुदाहरिष्यामः ।

"प्रादुर्भावकालात्प्रभृति आसेतुशीताचलं भूयिष्ठां प्रतिष्ठां प्राप्तं श्रीशैलेशदिव्यपद्यम्" इत्याह। अत्र ब्रूमः । ए, बि, सि, डि इत्यक्षराणि आउत्तरध्रुवात् आच दक्षिणध्रुवात् 'आच प्राच्यप्रतीच्यक्षितिधरयुगळादर्कसोमावतंसात्' आसमुद्रतलात् आच दिवः सुप्रतिष्ठितानि । देशव्याप्त्या यदि विशेषः तर्हि तान्येव सर्वोत्तमानि ।

"सर्वतः करवीरादीन् सूते सागरमेखला ।
मृतसञ्जीविनी यत्र मृग्यमाणदशां गता ॥"

28 अथ पारमार्थिकीं स्थितिं चोद्यरूपेणोपक्षिप्य पूर्वपक्षीकुर्वन् समाधानाभासं लिखति । देशिकः प्राचीन । अतः तदीयं पात्रपद्यं च प्राचीनम् । वरवरमुनिरर्वाचीनः । अत एतदीयं पात्रपद्यं पूर्वपद्यानुकारेण रचितं ततोऽर्वाचीनमेवेति कुतो न भवतीति चोद्यम् । अत्रोत्तरमाह—

यदि रामानुजदयापात्रपद्यमेकमेव वेदान्तदेशिकानां तनियन् पद्यत्वेन विराजेत, यदि च श्रीमान्वेङ्कटनाथार्यपद्यं नैव स्यात् तर्हि रामानुजदयापात्रपद्यमवलोक्य तत्प्रतिद्वन्द्विभावेनैव श्रीशैलेशदयापात्रपद्यं प्रणीतमिति कथनीयमेव । तद्वयमपि निराबाधमङ्गीकुर्याम ।

इति । अत्र प्राज्ञैर्विमर्शनीयम् । श्रीमान्वेङ्कटपद्यविरहे पात्रपद्यस्य महापरकालस्वामिकृतत्वाभिधानमुपेक्ष्य प्राचीनत्वाभ्युपगमः कार्य एवेत्ययमत्र वदति । तेन तत्र न काचिदनुपपत्तिरस्तीति सिद्ध्यति । अथ पर्यालोचनीयं श्रीमान्वेङ्कटपद्यसत्त्वं तथाऽभ्युपगमस्य कं प्रतिबन्धं कथमाचारतीति । शास्त्ररीत्या हेतुसाध्यप्रक्रियया किमपि वक्तुमत्र न शक्यते । तदयं न जानाति । देशिकस्य जीवितकाल एव तनियन्द्वयमुत्पन्नम् । तयोरेकं दिव्यप्रबन्धानुसन्धानसमयमात्रे उपयुक्तम् । इतरदितरत्र सर्वत्र । तत्र वरवरमुनिशिष्याः दिव्यप्रबन्धप्रधानत्वात् तत्सम्बन्धिपद्यानुसारेण 'श्रीशैलेशदयापात्र'मित्येव अस्य तनियन्पद्यं चक्रुरिति वस्तुस्थितौ न खलु किमप्यनुपपन्नं भवति । तस्मादयमेव सिद्धान्तः ।

श्रीमान्वेङ्कटपद्यानुकारेण कैश्चित् प्रकाशितं

श्रीमान् श्रीरङ्गनाथार्यो वेदान्तद्वयकेसरी ।
मुनिः कान्तोपयन्ता मे सन्निधत्तां सदा हृदि ॥

इति वरवरमुनिविषयं पद्यं दृष्ट्वा इदं पद्यं कृत्रिममिति, स्पर्धया कल्पि३"मिति च वयमेव प्रतिपाद्य तत्प्रचारं न्यषेधामेति वदन् स्वस्य प्रामाणिकत्वं प्रथयितुमिच्छति । का नामात्र स्पर्धा ? अस्मिन् श्लोके लब्धप्रचारे यथाऽयं श्लोकः श्रीमान्वेङ्कटपद्यानुकारेण कृतः तथैव श्रीशैलेशश्लोकः रामानुजदयापात्रश्लोकानुकारेण कृत इति स्फुटमेव सर्वैर्गृह्येतेति भीतिमारेण तन्निवारणमिति कस्येदं दुर्ग्रहम् ?

29 पात्रपद्यं परित्यज्यात्र पद्यान्तरविमर्शे प्रवर्तते ।

नमो रामानुजार्याय वेदान्तार्थप्रदायिने ।
आत्रेयपद्मनाभार्यसुताय गुणशालिने ॥

इत्यस्मदीयैरनुसन्धीयमानं निगमान्तमहादेशिकमातुलस्य तदाचार्यस्य वादिहंसाम्बुवाहार्यस्य स्तुतिपद्यम् । अस्य स्थाने तेन्कलाः

नमः श्रीशैलनाथाय कुन्तीनगरजन्मने ।
प्रसादलब्धपरमप्राप्यकैङ्कर्यशालिने ॥

इतीदमनुसन्दधते । अत्रापि पौर्वापर्यं पूर्ववदेव स्थितम् । पूर्वपक्षी तु बहुभाषित्वाऽपि अन्ततः पूर्वयुक्तिमेवाश्रित्य विपर्यासं कल्पयितुमीहते । वादिहंसाम्बुवाहस्य श्रीदेशिककृतमेव

यस्मादस्माभिरेतद्यतिपतिकथितप्राक्तनप्रक्रियोद्य-
त्कर्मब्रह्मावमर्शप्रभवबहुफलं सार्थमग्राहि शास्त्रम् ।
तं विष्वग्भेदविद्यास्थितिपदविषयस्थेयभूतं प्रभूतं
वन्देयात्रेयरामानुजगुरुमनघं वादिहंसाम्बुवाहम् ॥

इति गम्भीरं पद्यान्तरमस्ति । ग्रन्थाध्ययनकाले सर्वत्र इदमेव पद्यमनुसन्धीयते । तथा सति प्रयोजनान्तरशून्यस्यास्य नमो रामानुजार्यायेति अनुष्टुप्पद्यस्य प्रबन्धपारायणोपसंहारकाले परैः 'नमः श्रीशैलनाथाय' इत्यस्मिन् पद्येऽनुसन्धीयमाने तद्वदेवानुसन्धानसौकर्याय प्रणयनमिति ।

अत्र सिद्धान्तिभिरपि पूर्ववदेव समाधेयम्। पद्यान्तरसत्त्वेऽपि वक्ष्यमाणकारणेन कृतं 'नमो रामानुजार्याय' इतीदं पद्यान्तरं पूर्वकालादनुवृत्तमनुसृत्यैव विषमप्रकृतिभिः पश्चात् नमः श्रीशैलनाथायेत्येतत्पद्यं कृतमिति परमार्थः इति।

केन कारणेन पद्यान्तरकरणमिति तु सम्प्रति वक्तव्यम। पद्यार्थपर्यालोचनेनैव तत् सुज्ञानम। स्वविषये यथा आचार्यकटाक्षगर्भपद्यान्तरप्रवृत्तिः तथा स्वाचार्यविषयेऽपि तदावश्यकतां मन्यमानो देशिक इदं प्रणिनायेति।

नमो रामानुजार्यायेति नामग्रहणम्। वेदान्तार्थप्रदायिन इत्युपकारस्मृतिः। वेदान्तानां दिव्यप्रबन्धरूपेण परिणतो योऽर्थः तं यथावदुपदिष्टवत इत्यर्थः। अभिजनवदाचार्यसम्पत्तिः उच्यते 'आत्रेयपद्मनाभार्यसुताय' इति जन्मना विद्यया च तत्सुतायेति भावः। 'कृपया निस्पृहो वदेदित्युक्ताचार्यगुणपौष्कल्यानुसन्धानं 'गुणशालिने' इति।

30 अथ दिव्यप्रबन्धपारायणारम्भे पात्रपद्यपठनानन्तरं पठ्यमानं श्लोकचतुष्टयं प्रति यथा शीलमसमञ्जसं बह्वाह। लक्ष्मीनाथसमारम्भां, यो नित्यमच्युत, माता पिता युवतयः, भूतं सरश्च, इतीमे ते चत्वारः श्लोकाः। अत्र आद्यद्वयं कूरेशकृतम्। तृतीयं यामुनाचार्यकृतम्। अन्तिमं तु कुरुकेश्वरकृतमिति प्रबन्धानुसन्धानदीपिका। भट्टकृतमित्यन्ये। एते श्लोकाः तेन्कलानामेव स्वभूताः इतरेषां तत्सम्बन्धो नास्तीति साधनीयमित्यस्य मनोरथः। युक्तिः पुनः का ? इयम्। यो नित्यमच्युत इति द्वितीयः श्लोकः श्रीभाष्यकारविषयः। अनन्तरः माता पिता युवतय इत्ययं श्रीशठकोपसूरिविषयः। ग्रन्थकालक्षेपावसरे सर्वत्र इमौ श्लोकौ तनियन्पद्यत्वेन तेन्कलाजनैः पठ्येते, न वडकलाजनैः। एतैः 'प्रणामं लक्ष्मणमुनिः', 'यस्य सारस्वतस्रोतः' इत्यन्यावेव द्वौ श्लोकौ पठ्येते। एवं श्लोकान्तरपाठात् इमौ वडकलानां न स्वकीयाविति। इयं मध्य-

मयोः श्लोकयोः तदीयत्वे अन्येषां तत्र स्वत्वविरहे च युक्तिः । प्रथम-चरमयोस्तु "लक्ष्मीनाथ, भूतं सरश्च पद्मयोरमी वैदेशिका इति साधने नैव पृथक्प्रयत्नावश्यकता" इत्यस्योक्तिरेव तथात्वस्थापने अलम् ।

बत अविवेकदौर्जन्ययोः काष्ठा । ननु पूर्वाचार्यैः कृतान् श्लोकान् प्रति 'इमे अस्मदीयाः न युष्मदीयाः' इति प्रतिश्रवणेन किं कृतं भवति ? न हि अयं सूर्यो मदीयः न त्वदीय इत्युक्तेः कश्चिदर्थो विद्यते । "ग्रन्थकालक्षेपावसरेऽपि वयं तावुपयुञ्ज्महे, न भवन्तः । अतोऽस्माकं अधिकः सम्बन्धः" इति चेत् वयमपि भगवद्विषयकाल-क्षेपावसरे उपयुञ्ज्महे एवेत्युक्तपूर्वम् । कश्चित् कृत्स्नमहः आतप एव वर्तते । कश्चित्तु गृहान्तः स्थितः कदाचिदेव सूर्यं सेवते । किं तावता आतपस्थस्यैव सूर्यः, नेतरस्य ? वयं तयोः प्रथमो-पयोक्तारः अस्मदनुकारिणो भवन्त इति चेत् कदा भवतां तदुपयो-गारम्भः किं वरवरमुनिकालादर्वाक् उत ततः पूर्वमेव । आद्ये किं प्रमाणम् ? न किमपीति चेत् साधु । तदेव वक्तुं शक्यम् । नान्यत् । अन्त्ये देशिकतत्कुमारवरदाचार्यकाल एव तेषामनुसन्धानमासीदिति सिद्धेः उभयसाधारण्यमेवेति एकतरपक्षे प्रथमोपयोगोक्तिः प्रलापः । तदिह महता संरम्भेण वृथैव वाग्विसर्गः कृतः । अथ वा सर्वत्र एवमेव, किं विशिष्यालेति ।

31 अत्रापि विद्वेषसन्निपातज्वरोपाधिकानि प्रलपितान्येव कानि-चिदीक्ष्यन्ते । प्रबन्धपारायणोपसंहारे अनुसन्धीयमानं

सर्वदेशदशाकालेष्वव्याहतपराक्रमा ।
रामानुजार्यदिव्याज्ञा वर्धतामभिवर्धताम् ॥
रामानुजार्यदिव्याज्ञा प्रतिवासरमुज्ज्वला ।
दिगन्तव्यापिनी भूयात् सा हि लोकहितैषिणी ॥

इति पद्यद्वयम्

श्रीमन् श्रीरङ्गश्रियमनुपद्रवामनुदिनं संवर्धय
श्रीमन् श्रीरङ्गश्रियमनुपद्रवामनुदिनं संवर्धय

इत्यावृत्तमिदं वाक्यं चाधिकृत्य वडकलानां एतदनुसन्धाने सर्वथा औचित्यं नास्तीत्याह । श्रीमन् श्रीरङ्गेत्यादिकं केवलं वाक्यम् । इदं पद्यमिति भ्राम्यन्नयं महतां दूषणे प्रवर्तते, ग्रन्थलेखनव्यसनी भवति, अन्यानन्यान् सिद्धान्तान् स्थापयितुमीहत इति किमतःपरं विस्मयावहं किमप्यज्ञचेष्टितं लोके सम्भाव्येत ।

अथ को हेतुः येन वडकलानामेतदनुसन्धाने औचित्यं नास्ति ? तत्राह । इह प्रस्तुता रामानुजार्यदिव्याज्ञा भगवदालयेषु तत्कृत-विविधव्यवस्थापरिष्कारविषया । सा 'वर्धतामभिवर्धता'मित्याशं-साविषयीभवति । देवालयेषु च वडकलानां श्रद्धा भक्तिः सम्बन्धश्च नास्ति । एवं च एतद्विषयरामानुजार्यदिव्याज्ञाया मङ्गलाशासनं कथमेषामुचितं भवतीति ।

उन्मत्तभाषितमिदं गणनापदं कृत्वा प्रतिवक्तुं लज्जामहे । तथा-ऽपि आप्तानां तत्त्वं जिज्ञासमानानां कृते परमार्थबोधनमावश्यकं भवति ।

'श्रुतिः स्मृतिर्ममैवाज्ञा यस्तामुल्लङ्घ्य वर्तते ।
आज्ञाच्छेदी मम द्रोही मद्भक्तोऽपि न वैष्णवः ॥'

इति भगवदुक्तेः 'ते त्वघं भुञ्जते पापा ये पचन्त्यात्मकारणात्' इत्यत्र श्रीमद्गीताभाष्ये

"ये तु परमपुरुषेणेन्द्राद्यात्मना स्वाराधनाय दत्तान् आत्मार्थ-तयोपादाय विपच्याश्नन्ति ते पापात्मानोऽघमेव भुञ्जते । अघपरिणामित्वादघमित्युच्यते । आत्मावलोकनविमुखा नरकायैव पचन्ते ।"

इति भगवद्रामानुजोक्तेश्च अवश्यानुष्ठेयानि यानि वैदिकानि कर्माणि तानि परित्यक्तवतां अत एव पातित्यजुषां देवालयप्रवेशेऽपि नाम कोऽधिकारः, दूरे तिष्ठतु श्रीसूक्तिपारायणाद्यधिकारः। एवं च

वर्णाश्रमाचारवता पुरुषेण परः पुमान्।
विष्णुराराध्यते पन्था नान्यस्तत्तोषकारकः।

इति प्रमाणबलात् अत्यन्तं शास्त्रपरतन्त्रस्य भगवद्रामानुजस्य दिव्याज्ञापरिपालनपरा वडकला एव। तैर्वेदपारायणेन, तदुदितैर्मन्त्रैराराधनप्रतिष्ठाप्रायश्चित्तादिकरणेन, जाज्वल्यमानब्रह्मवर्चसश्रोत्रियकरस्पर्शमङ्गलाशासनादिभिश्च भगवत्सान्निध्ये समग्रे सम्पन्ने तत्र पात्रे समितैः, कर्मभ्रष्टैः दुर्विनीतैः, केवलं रथ्यासु क्षुद्रचतुष्पाद्भिरिव दन्तादन्ति हस्ताहस्ति केशाकेशि च कुर्वद्भिः क्रियमाणो घोषो घोषणकृतां आत्महानये भगवदालयानामपरिशुद्धयै च कल्पते, न तु फलान्तराय कस्मैचिदिति बाहूत्क्षेपं रोदितव्ये सति प्रत्युत आहोपुरुषिका क्रियत इति हा हन्त कलेरियं करालता कया वाचा वर्ण्यताम्।

इदमत्र सुधीभिर्विभाव्यम्— आचार्याणां तनियन्-अनुसन्धानक्रमः श्रीदेशिककालावधि कथमासीदिति पर्यालोचनं कर्तव्यम्। श्रीशठकोपसूरेः नाथमुनेश्च श्रीयामुनाचार्यकृते 'माता पिता युवतयः' 'नमोऽचिन्त्याद्भुताक्लिष्ट' इतीमे द्वे पद्ये क्रमेण तनियन्-त्वेन इदानीन्तनैः कैश्चिदनुसन्धीयेते। इमे द्वे अपि पद्ये यामुनाचार्येण तनियन्त्वेनैव कृते इत्यवधार्य वक्तुं न शक्यम्। तदीयस्तोत्ररत्नान्तर्गतत्वात्। एवमपि सौकर्यात् कर्तरि बहुमानातिशयाच्च इमे पद्ये तथात्वेन यामुनाचार्यशिष्यकोटिप्रविष्टैः परिगृहीते इति मन्तुं युक्तम्। यामुनाचार्यात् पूर्वं तु शठकोपसूरिविषये नाथमुनिप्रभृतिभिः, नाथमुनिविषये तच्छिष्यैश्च किं पद्यमनुसंहितमासीत्। एवं यामुनाचार्यस्य भगवता

भाष्यकृता श्रीमद्गीताभाष्यारम्भे अनुगृहीतं 'यत्पदाम्भोरुहध्याने'ति पद्यं तनियन् कृतम् । साक्षात् यामुनाचार्यशिष्यैस्तु तद्विषये किं पद्यमनुसंहितम् ? एवं राममिश्रपुण्डरीकाक्षयोर्विषये केन किं पद्यं कृतमिति न जानीमः। एतत्पर्यालोचने, "पद्यकरणे प्राङ्नियमो नादृतः। सामान्यतः 'अस्मद्गुरुभ्यो नमः' इति, विशिष्य 'श्रीमते शठकोपाय नमः' इति चोक्त्वा प्रणामान् कृत्वा उपदेशः श्रुतः" इत्येवं निर्धारयितव्यं भवति। इत्थमुत्थितान्येव वाक्यतनियन्-नामानि नमोऽन्तानि वाक्यानि अद्याप्यनुसन्धाने वर्तन्त इति सुवचम् । एवं यथा सम्भवं श्लोकानां वाक्यानां च पाठ इत्यनियमो देशिककालात्पूर्वं इति प्रतीयते। भगवान् निगमान्तमहादेशिकस्तु भगवता श्रीरङ्गनाथेन स्वस्य वेदान्ताचार्यविरुदप्रदेन सिद्धान्तसम्बन्धिसर्वविषयव्यवस्थापनमात्मना कर्तव्यमादिष्टं मन्यमानः अन्येषु सर्वेषु विषयेष्विव अत्रापि व्यवस्थां चकार— "श्रीमान्वेङ्कट, यस्मादस्माभिरेतत् , वन्देऽहं वरदार्यं तं, श्रीविष्णुचित्तपदपङ्कज, विख्यातो यतिसार्वभौम", ततः 'प्रणामं लक्ष्मणमुनिः' इत्यारभ्य 'कमप्याद्यं गुरुं वन्दे' इत्यन्तम् , इत्येवं तनियन्-पद्यानुसन्धानं कार्यमिति । भगवद्विषयश्रवणकाले तु ततः परं रामानुजदयापात्रं, लक्ष्मीनाथसमारम्भां, यो नित्यमच्युत, माता पिता युवतयः, भूतं सरश्च, इत्येतान्यप्यनुसन्धेयानीति च ।

अत्र लक्ष्मीनाथेत्यादीनां चतुर्णां श्लोकानां दिव्यप्रबन्धपारायणोपक्रमे पाठः भगवद्भाष्यकारेणादिष्टः । अन्ते 'सर्वदेशदशाकालेषु, रामानुजार्यदिव्याज्ञा, श्रीमन् श्रीरङ्गश्रियमनुपद्रवामनुदिनं संवर्धय,' इत्येषां च। इदं श्रीमन्नित्यादिवाक्यं भगवता भाष्यकृता स्वयं विरचय्य अनुसन्धेयतयाऽऽदिश्यत । अस्य आवृत्त्या पठनं पुनः देशिकेनादिष्टम् । एवं श्रीदेशिकेन स्वयं परिष्कारस्य कृतत्वात् स्वातिशयस्य सर्वस्य स्वाचार्यकरुणाकटाक्षाधीनत्वं स्मरता कृतज्ञतापारवश्येन 'नमो रामा-

नुजार्याय' इत्येतदप्यन्ते पठनीयतयाऽऽज्ञाप्यत। ततःपरं देशिकभक्तिभरितैः ब्रह्मतन्त्रस्वतन्त्रस्वामिप्रभृतिभिः 'रामानुजयदयापात्रम्' इत्यस्याप्यनुसन्धाने प्रार्थिते देशिकेनान्यैश्च तदनुमेने। ततः परं द्राविडगाथानां च कासाञ्चित्।

एवं देशिकाधिष्ठितायां श्रीवैष्णवशाखायां तनियन्-नियमे निष्पन्नेऽपि शाखान्तरे पूर्ववदनियम एवासीत्। ग्रन्थारम्भेष्वपि मङ्गलं वा आचार्यवन्दनं वा न न्यबध्यत। स चानियमः वरवरमुनिवार्धकावधि अन्ववर्तत। तथा हि। "रङ्गी वत्सरमेकमेवमश्रृणोद्व्यक्तं यथोक्तं क्रमात्" इति बहुदिव्यदेशयात्रानन्तरं श्रीरङ्गमधिवसन् वरवरमुनिः तत्र भगवद्विषयविवरणं सर्वहृदयङ्गमं वत्सरमेकमकरोत्। तदनन्तरं तत्र श्रीशैलेशदयापात्रपद्मं प्रादुरभवदित्युच्यते। तदवधि तच्छिष्यैः किं नाम तनियन्-पद्यमनुसंहितमासीत्? न हि पूर्वं पद्यान्तरं किञ्चिदासीदिति ज्ञायतेऽभ्युपगम्यते वा। एवं वरवरमुनेर्जीवितकाले सुचिरमस्य पद्यस्योत्पत्तिर्नाभूत्। तच्छिष्याश्च तत्सन्निधौ विद्याग्रहणकाले एतदनुसन्धानं नाकुर्वन् इति स्फुटं ज्ञायते। एतत्पद्योत्पत्त्यनन्तरमपि अस्योपयोगं प्रति वरवरमुनिनैव किञ्चिदुक्तमिति न क्वचिच्छ्रूयते। नापि दिव्यप्रबन्धपारायणोपक्रमोपसंहारयोरिदमिदं वक्तव्यमिति तेन व्यवस्था कृतेति श्रूयते। तत्र प्रष्टव्यं— पूर्वपक्षिगोष्ठ्यां दिव्यप्रबन्धपारायणोपक्रमोपसंहारयोरिदानीं यः प्रकारो वर्तते स कदा केन शिक्षित इति। देशिककालनिष्पन्न एवायं प्रकारः ऊहित्वाऽस्माभिः स्वीकृत इत्येव प्रामाणिकैर्वक्तव्यम्। न चैवं तात्त्विकार्थाभ्युपगमे काचन हानिर्भवति। न चात्र लज्जास्पदं किमप्यस्ति। वरवरमुनौ प्रावण्यातिशयेन वयमेवं ऊहं कृतवन्त इति निस्सङ्कोचं वक्तुं शक्यत्वात्।

रामानुजदयापात्रमित्यस्यानुकारेण श्रीशैलेशपद्यनिर्माणमिति भवितुमर्हत्येवेत्यभ्युपगतमेव। किन्तु श्रीमान्वेङ्कटनाथपद्यस्य स्थितत्वेन

तेन सह पद्यान्तरस्य स्थितत्वं दुर्वचमिति कृत्वा तस्यार्वाचीनत्वमाश्रीयते । अत्रेदं बोध्यम् । रामानुजपद्यं यदि पूर्वमेव नाभविष्यत् पश्चादपि नाभविष्यत् । श्रीमान्वेङ्कटपद्यस्यैवानुसन्धातुं शक्यत्वात् । यत्तु उपांशु उच्चारणसौकर्याय पद्यान्तरकरणमित्यादि तदत्यन्तमुग्धजल्पितम् । कलहाय सन्नद्धानां परध्वन्यभिभवोचितोद्घोषणप्रवृत्तेरेव स्वाभाविकत्वात् । न च द्वितीयादिषु पादेषु प्रस्फुटे भेदे प्रथमपादमात्रे अर्धस्यानुच्चारणेन अर्धस्य साम्यसम्पादनेन च आत्मा रक्षितो भविष्यतीति भीतानामाश्वासो भवेत् । अविवेकसाम्राज्यविजृम्भितेयं अत्यन्तमुपहास्या कल्पना । तस्मात् देशिकपात्रपद्यमेव प्राचीनम् । तत् परिहृत्य तत्स्थाने पठनायैव श्रीशैलेशपद्यं विरचितमिति नेदमपह्नोतुं शक्यम् ।

अथ देशिकस्य स्वयं व्यवस्थाकारित्वात् स्वकीयकृतज्ञत्वानुरूपं नमो रामानुजार्यायेति स्वाचार्यपद्यानुसन्धानादेशनं तेन कृतमिति युक्तमेतत् । एतदनुकारेण नमः श्रीशैलनाथायेति पठितमिति च । अस्य तु प्राचीनत्वे अस्य पाठ एव निर्निबन्धनः । वरवरमुनिर्यदि व्यवस्थापकः स स्वाचार्यपद्यानुसन्धानमादिशदिति युक्तम् । स तु न तथेत्युक्तम् । तदन्तेवासिषु कश्चित् व्यवस्थापक इति चेत् तेन स्वाचार्यवरवरमुनिपद्यपाठमात्रेण विरतेन भाव्यम् । न तु तदाचार्यपद्यपाठेऽपि प्रवर्तितव्यम् । अनवस्थापत्तेः । अत इयमपि अनुकारसिद्धत्वे लिङ्गम् ।

अथ या द्राविडगाथाः ताः पश्येम । यतीन्द्रप्रवणप्रभावनाम्नि (1907 वत्सरे मद्रनगरमुद्रिते) ग्रन्थे (90. पु) पञ्चवयस्कं बालं (श्रीशैलेशपद्यवक्तृत्वेन प्रतिपादितम्) प्रति 'वालितिरुनामं ब्रूहि' इत्युक्तवत्सु तत्रत्येषु सः "वाळि तिरुवायमौळिप्पिळ्ळै" "शेय्यतामरै"

"अडियार्गळ् वाळ" इति अवोचत्" इत्यासां गाथानां प्रादुर्भाव-प्रकार उच्यते। श्रीशैलेशपद्ये बालेनोक्ते तावता विस्मयविवशैः परम-तृप्तैर्हि भाव्यम्। उपरि "वाळितिरुनामं ब्रूहि" इति प्रश्नस्य का नाम प्रसक्तिः? एतेन स्फुटमेव हि ज्ञायते देशिक 'वाळितिरुनाम' संस्कारः बुद्धौ दृढप्ररूढः एवं ग्रन्थकारं लेखयतीति। एवं चायमेव ग्रन्थकारः प्रकृते विवादे तत्त्वनिर्णयं प्रति उत्तमः साक्षीति वेदितव्यम्।

वाळितिरुनामगाथाः स्वकूटस्थेन प्रतिवादिभयङ्करार्येण कृता इति क्वचित् लिखति। शिष्यैः कैश्चित् इति सामान्यतोऽन्यत्र। अप्पिळ्ळै नाम्नेति परत्र। पात्रपद्यवक्त्रा बालेन इति यतीन्द्रप्रवणप्रभाव-ग्रन्थः। इत्येवं मिथो व्याहृताः कल्पनाः दृश्यन्ते, याः अनुकारेण अर्वाचीनकल्पितत्वे दुरपलपाः साक्षिण्यो भवन्ति।

अन्यदपीदमत्याश्चर्यं किञ्चित् परामर्शनीयम्। आसु द्रमिड-गाथासु चरमायां चरमः पादः 'इन्नमोरुनूर्ण्डिरुम्' इत्युभयत्र समानो दृश्यते। "अपरमपि शतं वत्सरान् भवानिह विलसतु" इति तदर्थः। श्रीदेशिकः शतं वर्षाण्यजीवत्। तं प्रति तस्य वार्धके कतिपयवर्षन्यूनतायामपि "एकं शतं वत्सरान् अत्र स्थित्वा भवान् लोकानुग्रहमकरोत्। तथैव अपरमपि शतं वत्सरान् तिष्ठतु" इत्याशा-सनं युज्यते। वरवरमुनिः साग्रसप्ततिं वर्षाण्यजीवत्। तस्मिन्निदं नान्वेति। तस्य वार्धके क्रियमाणमाशासनं "अपरामपि षष्टिं सप्ततिं वा वर्षाणि भवान् विजयताम्' इत्येव स्वरसतो भवितुमर्हति। तस्मात् 'शतं वर्षाणि' इति इह स्थितं केवलमनुकारेणागतमित्येव वक्तव्यं, न गत्यन्तरमस्तीति देशिकपाल्पद्यघटित एव प्रबन्धपारा-यणोपक्रमोपसंहारक्रमः प्राचीनः नेतर इति।

32 'वडकलाख्या वैष्णवाः केवलं कर्मठा एव स्थित्वा दिव्यसूरिषु दिव्यप्रबन्धेषु दिव्यदेशेषु च विमुखा दूषकाश्चासन्। बहोः कालादनन्तरमेव कलहार्थमेवामी देवालयान् प्राविशन्' इत्याह।

ये मे मतमिदं नित्यमनुतिष्ठन्ति मानवाः।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्मभिः॥

इति भगवत्प्रशंसाविषयभूतानां निर्मलान्तःकरणानां कर्मयोगिनां अकृत्यकरणे कृत्यकरणे च न प्रसङ्गलेशोऽपि।

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम्।
सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः॥

इति भगवद्द्वेषविषयभूतानां कर्मभ्रष्टानां उत्तरोत्तरं मनोमालिन्योपचयात् सर्वविधानि पापानि सम्भावितानि।

दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम्।

इत्युक्तां आसुरीं सम्पदं तेषां सम्पन्नां प्रत्यक्षमीक्षामहे च। तदिह बहुषु विषयेषु विशिष्य तस्य तस्य दूषणस्य समाधानं न वक्तव्यम्। यो यो दोषः परेषु पूर्वपक्षिणा उच्यते स सर्वः परेषु अल्पशोऽपि नास्ति। तत्पक्षे तु समग्र इत्यवगन्तव्यम्। तेन-कलाचारवन्त एव स्थिताः कतिपये देवालयाः पश्चात् परैराक्रान्ता इति वदति। तत्त्वमिदं सर्वदा बुद्धौ धार्यम्। वरवरमुनिकालावधि प्रमाणवाक्याचार्यश्रीसूक्त्यादीनां तत्र तत्र योजनाभेदमात्रमासीत्। न तु सिद्धान्ते वा आचारे वा कर्मानुष्ठाने वा। तेन देवालयेष्वपि तदवधि अभिन्ना एकरूपैव प्रक्रिया अभवत्। तदनन्तरकालिकाः केचित् तेन्कलाव्यवहारमात्मनः कुर्वन्तः भेदान्, परेषु द्वेषं च वर्धयन्तः सात्विकान्

विश्वस्तांश्चाभिभूय शक्यैः सर्वैः प्रकारैर्देवालयानाक्रम्य स्वकल्पित-नूतनसम्प्रदायचिह्नानि तेषु निवेश्य प्राक्तनीं प्रक्रियां विपरिलोप्य स्वाभिमतप्रक्रियया तन्निर्वाहं कर्तुमारभन्त। अयमेषां स्वभावः, जन्मनः प्रभृति अविश्रान्तं हठात् येनकेनापि सह कलहकरणेन कटुभाषणेन विकत्थनेन पामरवञ्चनेन च कृत्स्नं कालं यापयतोऽस्य पूर्वपक्षिणो दर्शनेन सर्वैरनायासमवगन्तुं शक्यः ।

एवमेषु आक्रान्तवत्सु स्वभावत एव शान्ताः परे कलहाद् बिभ्यतः प्रायेणोदासीना एवाभवन् । अनाक्रान्तेषु केषुचिदालयेषु प्राचीना प्रक्रिया अप्रतिहताऽन्ववर्तत । काले गच्छति केचन महान्तः कांश्चन देवालयान् प्रत्याहर्तुं प्रावर्तन्तेति सत्यमेतत् । बहुत्र चोरहृतं हृतमेव भवति । क्वचित् पुनः प्रत्याहरणयत्नः कृतः कदाचित् फलति । तथा प्रकृतेऽपि द्रष्टव्यम् ।

33 दिव्यसूरीणामवतारस्थलानि सर्वाणि अधुना तेन्-कलासम्प्रदा-यानुसारीण्येवेति तपस्वी परिगणयति । ततः किं सिद्ध्यति ? धर्मक्षेत्रं कुरुक्षेत्रं प्रसिद्धम् । तदिदानीं निर्दिश्य तत्र या प्रक्रिया सम्प्रति दृश्यते सैव प्राचीना शास्त्रसिद्धा प्रामाणिकी सर्वोत्कृष्टा श्रेयस्करी इति यदि कश्चिदातिष्ठेत तत्र किमस्माभिः प्रतिपत्तव्यम् ?

आग्रहिणः अर्वाञ्चः तेन्कलाः अद्यतनमतान्तरालम्बिन इव साङ्केतिक्याः स्वप्रक्रियायाः सर्वत्र प्रचारे तथा तीव्रमुद्यममकुर्वन् यथा कायान्नस्थलशुद्ध्यादिस्थैराचारश्रवणहृष्टाः पामराः सर्वे तद्वश्या अभ-वन् । वडकलाः पुनः उपसन्नानपि सहसा शिष्यत्वेनापरिगृह्य चिर-परीक्षानन्तरं स्वीचक्रुः । एवमभियोगातिशयेन, वर्णाश्रमाचारनिर्बन्ध-विरहेण, सर्वसौकर्यभूम्ना च भूयिष्ठानां तत्र आकर्षणं सम्पन्नम् । तेन देवलयाक्रमणमपि सुकरमभूत् ।

परं तु तत्र तत्र श्रीदेशिकालयो विद्यमानः प्राचीनं स्वरूपं प्रदर्शयन्नेवास्ति । यथाऽऽळ्वार्तिरुनगर्याम् । तत्र हि देशिकः कालविशेषेषु भगवदालयस्यान्तर्नीयते सर्वैरुपचारैर्बहुमान्यते चेत्ययं क्रमश्चिरात् प्रवर्तते । स देशिकः अद्यापि वडकलापुण्ट्रमेव धारयति । स एव यदि भगवदालयस्यान्तरवर्तिष्यत चिरात्पूर्वमेव तस्य पुण्ट्रान्तरमधारयिष्यन् भगवत इव । श्रीशैलपूर्णाद्यवतारस्थलानि वडकलासम्प्रदायानुसारीण्येव दृश्यन्ते ।

34 "कियल्लिखति, किं किं लिखति, कियतः पुटान् लिखति," इति विस्मयजननेन पामरान् वञ्चयितुं बहु लिख्यते । तत्र इदमपि पर्वोदाहरणम् । किमाचार्येषु एकैकस्यापि अर्चाप्रतिष्ठा कार्येति विधिरस्ति ? निमित्तविशेषैर्भगवन्नियमने ज्ञाते तदनुसारेण केषाञ्चित् तथा अर्चापरिकल्पनं भवति । आलयोपजीविनः वृत्त्यर्थतया अर्चाविग्रहवृद्धौ यदि श्रद्दधते इतरेषां तत्र का वाच्यता ?

35 श्रीविष्णुचित्ताचार्यः, तद्वंशजाः पेरियवाच्चान्-पिळ्ळै-पर्यन्ताः सर्वे च अमिश्रशुद्धवडकला एव । विपर्यासोऽत्यर्वाचीनः । अर्वाचीनस्थित्या पूर्वपुरुषस्थितिकल्पनं शुष्कपर्णपटलपतनकलुषकषायक्षुद्रग्रामपल्वलपानीयगुणानुरोधेन वर्षधारानीरगुणकल्पनकल्पमिति ज्ञेयम् ।

36 अत्रोक्तमपि दत्तोत्तरम् । निर्बन्धादेव कृतपुण्ट्रविपर्यासाः सर्वे श्रीरङ्गदेवस्थानपुरुषाः । इदं तत्क्षेत्रसम्बन्धि ऐतिह्यं अनुवर्तते । श्राद्धे निमन्त्रितैः किल भोजनान्ते तृप्तिकथनावसरे भगवदालयकुक्षिकासु दत्तास्वेव तृप्तोऽस्मीति कथयिष्याम इति श्राद्धकर्तारं निर्बध्य तस्मात् देवस्थाननिर्वाहाधिकार आच्छिन्न इति । अन्यच्चेदमवधेयम् । अद्य श्रीरङ्गे भगवन्मन्दिरे दिव्यप्रबन्धगाथागायिनः 'अरैयर्' नामभाजः तेन्कलापुण्ट्रधारिणः सन्ति । तेषां ज्ञातयः पुनः भगवन्मन्दि-

रसम्बन्धरहिताः वडकलापुण्ट्रमेव धारयन्ति । एतेषां ज्ञातित्वापलापे प्रवृत्ता गायकाः वंशावलीनिरूपणेन ज्ञाततत्त्वैरधिकारिभिः शिक्षिता अभूवन् । एतेन हि स्फुटमेव ज्ञायते निर्बन्धात् जीविकाहेतोः पुण्ट्रविपर्यासं कार्यन्त इति । बहूनां तेन्कलीभवने इदमेव ईदृशमेव च कारणमिति तत्त्वमिदं न कदाचिद्विस्मर्तव्यम् ।

37 गृहस्थेषु निर्बन्धपरवशेषु सन्न्यासिनः कुतो न भविष्यन्ति ? सकृद्विपर्यासे जाते तद्वंश्याः सन्न्यासिनोऽपि हि विपर्यस्तामेव पद्धतिमनुसरिष्यन्ति । किमेषां पृथङ्निर्देशेन ?

पात्रपद्यचरित्रं लिखामीत्युपक्रम्य स्वबुद्धिविभ्रमचरित्रं लिख्यते परेण ।

38 वरवरमुनिस्तुतत्वेन तत्स्तोतृत्वेन च श्रीरङ्गनाथस्य बिरुदावली पठ्यत इत्याह । तेन किं प्रकृतस्य । देशिकस्तुतत्वेन, बिरुदप्रदानादिभिः तद्बहुमन्तृत्वेन च रङ्गनाथो न स्तूयत इत्यभिधाने तात्पर्यमिति चेत् ततोऽपि किम् ? प्राञ्चो बहव आचार्याः । तैः सर्वैः तुतत्वं नोच्यते । तथा देशिकस्तुतत्वमपि नोच्यताम् । को विशेषः । अन्ये आचार्याः सन्तु नाम । युष्मत्पक्षपूज्यो देशिकः । अस्मत्पक्षपूज्यो वरवरमुनिः । अस्मत्पक्षपूज्यस्तुतत्वाभिधानाद् वयं विजयिन इत्याकूतमिति चेत् अस्य क्वत्र पर्यवसानमिति सम्यक् परामृश्यताम् । ममतायां पर्यवसानमिति गृह्यताम् । तादृशबिरुदावलीपाठेन देवो रङ्गनाथः किं मन्यते, देशिकः किं मन्यते, वरवरमुनिरेव वा किं मन्यत इति सर्वमिदं शास्त्रमुखेनैव अवधार्यम् । पठतां तु स्वकीयत्वाभिमानादेव तत्र तृप्तिः । आत्मोत्कर्षपरनिकर्षबुद्धिगर्भोऽयममिमानः रामानुजार्यदिव्याज्ञाभङ्गलक्षणम् ।

39 श्रीरङ्गक्षेत्रे अर्चका अनादिकालात् वडकला एव । प्रधानकैङ्कर्यकारिणां एषां स्थितिः पर्याप्ता प्राचीनां देवालयस्थितिं यथावद-

वगमयितुम्। प्रैरः कृतो बलवानपि निर्बन्धो न तेषां विषये फलेग्रहिरासीत्। परं तु अधुना तेषां विषये निर्बन्धं कर्तुं तेन्कला आरब्धवन्तो भवन्ति। सकृदेव तैः प्रणामः कार्य इति निर्बध्नन्ति। सेवार्थिनोऽपि जनान् नूनं इतःपरं तथा निर्बध्नीयुः। अयं व्यवहारोधिकरणं गतः। प्राड्विवाकः अवैष्णवः अशास्त्रज्ञः। 'सकृत्प्रणामः शास्त्रसम्मतो न वा, नाहं किमपि जानामि। यस्मात् देवालयः तेन्कलासम्प्रदायानुसारी तस्मात् सकृत्प्रणाम एव अर्चकैः कार्यः' इति निर्णयमकरोत्। वडकलाः सन्तोऽर्चकाः यत्र पूजां देवस्य कुर्वन्ति तत्र तेन्कलासम्प्रदायानुरोधित्वं नाम किम्। एवं सति कुम्भघोणे वडकलासम्प्रदायानुरोधिनि भगवदालये स्थितैः तेन्कला-अर्चकैः असकृदेव प्रणन्तव्यं न सकृदिति आपतति, इतीदं सर्वं तस्याधिकरणिकस्य बुद्धौ न भातम्। अन्यैरपि न सम्यगुपपादितमिति भाति। सम्प्रदायविषयव्यवहारेषु प्राय एवंविध एव निर्णयः। तदस्तु। क्रमेण इमे बलात्कारात् परान् स्वसम्प्रदायानुरोधिनः कुर्वन्तीत्यत्र प्रत्यक्षप्रमाणमेतद्भवतीति सर्वैरवगन्तव्यम्।

"भगवद्रामानुजमुनीन्द्रः स्वविरचिते नित्यग्रन्थे भगवदाराधनोपक्रमे सकृत्प्रणाममेव समशिक्षयत्।" इति लिखति। "मूलमन्त्रेण दण्डवत् प्रणम्य" इति तत्र वाक्यम्। तत्र सकृदिति न श्रुतम्। तस्मात् 'सकृत्प्रणाममेव समशिक्षय'दिति मिथ्यैवोच्यते लोकवञ्चनार्थम्। ननु असकृदित्यपि नोक्तमिति चेत् सत्यं नोक्तम्। तावता सकृत्त्वनिर्धारणं कथम्। असकृत्त्वनिर्धारणं कथमिति चेत्— "प्रदक्षिणप्रणामांश्च युग्मानेव तु कारयेत्। नैकस्मिन्पञ्चसप्तादिगणनाविषमं हि यत्।" इति विधिनिषेधाभ्यामिति ज्ञातव्यम्। तथा चाशास्त्रज्ञेन अधिकरणिकेन कृतो निर्णयः प्रागृतोः कन्याप्रदानप्रतिषेधिराजशासनतुल्य इति स्थितिरित्यलमधिकेन।

40 रामानुजार्यदिव्याज्ञेति, श्रीरङ्गश्रीः इति च किमुच्यत इत्यजानन् अव्युत्पन्नः आधुनिककलहोद्धुरसयूथ्यगोष्ठीमेव बुद्धौ कुर्वन् किमप्याह । रामानुजार्यदिव्याज्ञेति प्रथमश्लोके तस्याः सर्वदेशकाल-व्यापित्वं प्रार्थितम् । द्वितीयश्लोके तदनूद्य तथा प्रार्थनायां हेतुरुक्तः— सा हि लोकहितैषिणीति । यस्मादियमाज्ञा सर्वलोकहितैषिणी तस्मात् तस्या दिगन्तव्यापित्वं प्रार्थनीयमिति भावः । एतेन सर्वस्यापि लोकस्य यत् हितं तद्विषयेयमाज्ञेति असन्दिग्धं प्रतीयते । किं तत् सर्व-लोकहितम् ? प्रपदनमेव । 'पशुर्मनुष्यः पक्षी वा' इत्यादिना हि सर्वनिःश्रेयससाधनत्वं तस्य प्रसिद्धम् । "अर्चारूपेण सर्वसुलभतया सर्वचक्षुर्गोचरतया अवतिष्ठमानं सर्वेश्वरेश्वरं श्रीमन्नारायणं शरणमुप-गम्य दायधनक्रमात् प्राप्तव्यं भगवच्चरणारविन्दयोर्नित्यकैङ्कर्यसाम्राज्यं सर्वे प्राप्नुवन्तु । तथा अभिज्ञा प्रयतन्ताम्" इत्येवंरूपा सा रामानु-जार्यदिव्याज्ञा । भगवन्तं यथाविधि आराध्य संस्कृतद्राविडस्तोत्रैः स्तुत्वा प्रीणितस्य तस्य सन्निधौ तस्या एवाज्ञायां दिगन्तव्यापित्वं प्रार्थ्यते । "दिगन्तवासिनोऽपि जनाः भगवतो महिमानं वात्सल्य-सौलभ्यादिकं चावगम्य भक्तिवदुष्करत्वरहितां शरणागतिमनुष्ठाय उज्जीवन्तु । तथा हे भगवन् त्वं दयस्व" इति प्रार्थनातात्पर्यम् ।

श्रीमन् श्रीरङ्गश्रियमित्यादेरयमर्थः । दिव्यदेशस्य श्रीर्द्विधा— भगवत आराधनोत्सवादिप्रवर्तनकृता तत्त्वज्ञानसम्पन्नश्रोत्रियस-मृद्धिकृता च । इयमुभयी श्रीर्वर्धताम् , वृद्धिरपि उत्तरोत्तरमभ्यधिका भूयादिति प्रार्थ्यते । तत्रापि प्राधान्यं अनुपद्रवामित्यस्य । बौद्धादि-मतान्तरविजृम्भणेन राजदोषेण देशक्षोभेण जनानां वर्णाश्रमाचार-भ्रंशेन वा दिव्यदेशश्रिय उपद्रवो भवेत् । तादृशोपद्रवरहिता श्रीरङ्ग-श्रीर्वर्धतामिति । अत्रापि श्रीरङ्गे उक्तविधया श्रिया दीप्यमाने सर्वे जना भगवन्तं सेवित्वा परमं श्रेयः प्राप्नुयुरित्येव तात्पर्यम् ।

एवं सति ये शरणागतिमार्गं विध्वंसयितुमुद्युक्ताः तेषां च रामानुजार्यदिव्याज्ञायाश्च वध्यघातुकभावं विना कोऽन्यः सम्बन्धः ? तद्वृद्धिप्रार्थने च कोऽधिकार इति विवेकिनो विवेक्तुमर्हन्ति। केवलमनुकारेणैव एभिरेतदनुसन्धानम्।

श्रीरङ्गे भगवत्सन्निधौ प्रपदनं कुर्म इत्यभिसन्धाय यदि वयं गच्छामः न तत्कार्यमिति तत्रत्याः तेन्कलाः सम्प्रति प्रतिषेधन्ति। कियदुत्तमाः श्रीवैष्णवाः, कियद् दिव्यसूरिसूक्तिसारज्ञाः, कियद् रामानुजार्यदिव्याज्ञापरिपालका इति सुव्यक्तं तावदेतेन ज्ञातुं शक्यम्।

दिव्यप्रबन्धानां भाषा यद्यपि द्राविडी तथाप्यर्थः कात्स्न्र्येन वैदिक एव। तं सर्वथा परित्यक्तवन्त इमे तेन्कलाः वस्तुतः तेन्कला अपि न भवन्ति। वेदमार्गविद्वेषिण इत्यस्मिन्नर्थे तु स शब्दः सम्प्रति सङ्क्रान्तः।

41 "वाळितिरुनाम'गाथाविषये प्रकृतोपयोगितया यद्वक्तव्यं तद्वयमुक्तपूर्विणः। वेदान्ताचार्यविषयगाथासु दौस्थ्यमस्तीत्याह। अस्य बुद्धिदौस्थ्यमेव तासु दौस्थ्यं भासयति न तु परमार्थतः तत्र तदस्तीति अन्यत्र उक्तवन्तः स्मः।

42 तेन्कलाजनैराक्रमणशीलैराक्रान्तानां स्थलानां पुनर्वैदिकत्वनिष्पत्त्यै प्रत्याहरणं हि न्याय्यमेव। तत्र श्रीकृष्णताताचार्याः कञ्चन यत्नमकुर्वन्। स फलेग्रहिरासीत्। देवालयप्रतिष्ठापूजनादि राजराष्ट्राभिवृद्धिफलकतया आगमेषु विधीयते। तन्नास्तिकैराक्रान्तं क्रीडनस्थानतां यदि नीतं तत्र कस्य आस्तिकस्य लोकयोगक्षेमप्रणिहितमतेः शोकाय न भवेत्।

काञ्च्यां भगवतो देवाधिराजस्य मन्दिरे परं तथा पूर्णमाक्रमणं तेषां न शक्यमासीत्। तेन स भगवान् अद्यापि शास्त्रीयेणैव ऊर्ध्वपुण्ड्रेण विराजते।

देशिकपात्रपद्यानुसन्धानाधिकारो वर्तत एव वडकलानाम् । परं तु कलहमनिच्छन्तस्ते न तत्र प्रवर्तन्ते ।

सादेः सर्वस्य सान्तत्वात् दिव्यसूरीणामाचार्याणां च भक्तिश्रद्धाभूयिष्ठेन आदरातिशयेन जातो भगवन्मन्दिराणां विशेषः सम्प्रति अतिप्रवर्धमाने कलौ एवंविधानां कर्मभ्रष्टानामुन्मर्यादैश्चेष्टितैर्विनष्ट इति वैमुख्यमेव सात्त्विकानां शोभते । परन्तु प्रतिपक्षविजृम्भणेन उद्दीपितक्रोधाः तथा शान्तिमधिगन्तुं न प्रभवन्तीति सत्यं महत् शोकस्थानमेतत् ।

तत्र तत्र प्रवृत्तान् व्यवहारान् निर्णयान् तदनुसारि अनुष्ठानं च प्रति पश्चाद् विस्तरेण लेखिष्यामः ।

43 अपूर्वमिह किमपि नोच्यते । उच्यमानमपि व्याहतमुच्यते । "श्रीशैलेशदयापात्रपद्यानुसन्धाने यत्र कुत्रापि वा प्रतिरोधः सञ्जातो वेति विमृश्यताम्" इत्यभिधायानुपदमेव "येषु कतिपयेषु दिव्यदेशेषु वडकलाख्याः कालदेशादिवैगुण्यवशादाक्रमणमकुर्वत तत्र नूतनपात्रपद्यादिकमसौ स्वल्पकालात् प्रभृति कथयन्तीति प्रागेवोक्तमेतत् । नैतदपलपामः" इत्याह । एषु दिव्यदेशेषु तस्य प्रतिरोधः समजनीति ह्यभ्युपगम्यते । एवं सति सामान्यतः यत्र कुत्रापि वा प्रतिरोधः सञ्जातो वेति विमृश्यताम्" इति कुतः प्रतिज्ञायते ? आक्रमणं तु कैरिति ज्ञायत एव ।

"तेषु कतिषुचन दिव्यदेशेषु तेन्कलाचार्याणां वर्सातविरह एव एतादृशक्षोभकारणमभूदिति नैतद् विस्मर्तव्यम्" इत्याह । 'क्षोभ' इत्येतत्स्थाने 'क्षेम' इति कृत्वा पठ्यमानं यथार्थमेतद् भवेत् । तेषां केषांचित् तत्र वासे हि कलहोऽभविष्यदेव । एवञ्चान्यत्र यत्र यत्र ते वसन्ति तत्र तत्र तन्मूल एव क्षोभ इति भूतार्थोऽयम् । अत्र अन्ते पुनरपि लिखति—

"नन्विदमेव प्रतिष्ठापितं भवति— वडकलाख्या दिव्यसूरिषु दिव्यप्रबन्धेषु दिव्यदेशेषु च अनादेः कालात् विद्वेषिणः स्थिता अर्वागेव एतेषु प्रवेशमुपचक्रमिरे ।"

इति । पूर्वप्रलापानां अस्य च साध्यसाधनभावं देवो जानाति । अस्माकं गुरुपरम्परा—

श्रीभाष्ये

1 देशिकः
2 ब्रह्मतन्त्रस्वतन्त्रस्वामी
3 वरदाचार्यः
4 आदिवण्शठकोपस्वामी
5 वरदविष्ण्वाचार्यः
6 महादयाधीशः
7 अहोबिलाचार्यः
8 षष्ठपराङ्कुशस्वामी
9 पञ्चमतभञ्जन-तातार्यः
10 अनन्ताचार्यः
11 रङ्गरामानुजस्वामी
12 रङ्गनाथार्यः
13 वीरराघवगुरुः
14 रङ्गनाथार्यः
15 रङ्गनाथार्यः
16 वेदान्तलक्ष्लणमुनिः
17 गोपालदेशिकः

भगवद्विषये च

1 देशिकः
2 कुमारवरदाचार्यः
3 ब्रह्मतन्त्रस्वतन्त्रस्वामी
4 वरदाचार्यः
5 आदिवण्शठकोपस्वामी
6 पराङ्कुशः
7 पराङ्कुशः
8 श्रीनिवासाचार्यः
9 श्रीनिवासाचार्यः
10 अनन्ताचार्यः
11 मुनिवाहनः
12 वेङ्कटेशः
13 रङ्गनाथार्यः
14 वेदान्तलक्ष्मणमुनिः
15 पादुकासेवकरामानुज-स्वामी
16 गोपालदेशिकः

इत्येवंरूपा विभाति । अन्येषां चान्यरूपा । यथा श्रीभाष्यादिकं तथा भगवद्विषयमपि अधीतवतामेव वडकलानां अध्यात्मग्रन्थकालक्षेपपूर्ति-

भवति । लेखप्रतिलेखेषु 'उभयवेदान्तग्रन्थकालक्षेपातिशय' इति निर्देशक्रमश्चिरादनुवर्तते । एषु चाचार्येषु बहवः दिव्यप्रबन्धव्याख्यातारोऽपि । तस्माद् वडकलानां दिव्यप्रबन्धादिविद्वेषवचनं श्रीरामपुत्रयोः कुशलवयोः रामायणविद्वेषवचनकल्पमित्यास्तां तावदेतत् । "आर्तोपच्छन्दनं गद्यं भाष्यं तु पररञ्जनम्" इति स्वकीयं भगवद्भाष्यकारतदीयश्रीभाष्यादिविद्वेषं घण्टाघुष्टं कृतवतां परेष्वपि तादृशं किञ्चिद्वाच्यं कल्पनीयमित्यभिनिवेश एव एवं परिवादकरणे निदानमिति को न जानाति ?

दिव्यप्रबन्धस्थासु तत्तद्दिव्यदेशस्तुतिषु तत्रत्यानां श्रोत्रियाणां वेदाध्ययनतत्प्रतिपाद्यकर्मानुष्ठानादिकृतो विशेषो भक्तिश्रद्धापुरस्सरं दिव्यसूरिभिर्वर्णित इति तद्विद्वेषिण एत एव दिव्यप्रबन्धादिविद्वेषसाम्राज्यभाज इति तत्त्वम् ।

44 पुनरप्यसम्बद्धप्रलाप एव ।

"वडकलानां देशिकेन सह सम्बन्ध आदितो नासीत । मध्ये केवलमावाहितोऽभूदित्यमुं परमार्थं प्रकारद्वयेन प्रतिष्ठापयामः । 1. भगवदालयेषु देशिकविग्रहानुभवे अमी चिरादेव विमुखा अभूवन् 2. देशिकदिव्यसूक्तिषु अनुगृहितानामर्थविशेषाणां अत्यन्तविपरीतानेवार्थान् प्रायशोऽमी आद्रियन्ते— इत्येवं प्रकारद्वयं प्रामाणिक्या पद्धत्या प्रतिपादयामः,"

इति प्रतिज्ञाय प्रथमं प्रकारमुपपादयितुं प्रवृत्तः "श्रीरङ्गे देशिकालयस्य मुखविटङ्के तेन्कलापुण्ट्रः अस्तीति, तेन देशिकविग्रहेऽपि स एव पुण्ट्र आसिदिति सिद्धमेवेति, वडकलापुरुषैस्तद्विपर्यासः कृत इति, तदानीं कलहोऽभवदिति, अद्य वडकलापुण्ट्रधारणेन अनुभूतपूर्वसर्वबहुमानहानिरभूदिति च लिखति । अत्र बुद्धिमद्भिः पर्यालोचनीयम् ।

देशिकालये स्वाधीने सत्येव हि वडकलाजनैः पुण्ट्रादिविपर्ययः कर्तुं शक्यः। तेन तत्र देशिकविग्रहस्थापनकालात्प्रभृति वैडकला एव तन्निर्वाहकारिण आसन्निति स्वयमयमभ्युपगच्छति। तथा च "भगवद्दालयेषु देशिकविग्रहानुभवविमुखाः" इत्यस्याः प्रतिज्ञायाः साक्षाद्विपर्ययसाधक एव हेतुरुपन्यस्तो भवति।

अथ पुण्ट्रकथां पश्येम। बहिः पुण्ट्रान्तरदर्शनेन कोऽर्थोऽनुमीयते। आक्रमणशीलाः तेन्कलाः बहिर्देशावधि विक्रियामुत्पाद्य अन्तर्गन्तुमनिच्छन्तो वा कथमप्यशक्ता वा अन्तः स्थितं तथैवामुञ्चन् इत्येतदनुमीयते। अत्र तत्त्वं जिज्ञासमानानां सविधे इदं विनिवेदयामः। श्रीरङ्गे भगवतो रङ्गनाथस्य आराधनकारिणोऽर्चकाः अनादेः कालात् वडकला एव। अद्यापि ते तथैव वर्तन्ते। आदौ भगवतः श्रीवेङ्कटाद्रीश्वरस्येव कलाद्वयसाधारणं कञ्चिदूर्ध्वपुण्ट्रं समार्पयन्। ततः परं १८९४ वर्षे तमपनीय बलिष्ठाः तेन्कलाः स्वकीयं शूलपुण्ट्रं धारयन्ति स्म। तत्र उत्तमाधिकरणपर्यन्तं व्यवहारे प्रवृत्ते नवीनपुण्ट्रापनयनमादिष्टमासीत्। तथाऽपि वडकलानां सान्त्विकत्वात् इतरेषामत्यभिनिवेशत्वाच्च तैः कृतो विपर्यासोऽनुवर्तते।

अथ तत्रैव श्रीरङ्गे भगवदालयान्तर्गते कस्मिंश्चिदालये श्रीशठकोपसूरिः श्रीपरकालसूरिः मधुरकविसूरिः इत्येषां त्रयाणां विग्रहाः सन्ति। तत्र आद्यस्य उत्सवविग्रहे अधो दर्शिताकारः पुण्ट्रः ललाटे

दृश्यते। स न गर्तरूपः, अपि तु ललाटतलादुद्गतः उत्सेधात्मा। एवं तत्रैव अन्तर्गतालयान्तरस्थे भगवद्रामानुजविग्रहे ललाटे

एवमाकारः पुण्ट्रः । उभाविमौ पुण्ट्रौ व्यवहारविशेषे श्रीरङ्ग-डिस्ट्रिक्ट्-मुन्सीप्-कोर्ट्-अधिकरणिकेन 1-2-1908 दिने स्वयमागत्य प्रतिकृतिग्रहणेन प्रकटिताकारौ। एवं प्राचीने वडकलापुण्ट्रे अनपनेयतया स्थितेऽपि अद्य तत्रोभयत्र तदुपरि घनमृत्तिकलेपेन शूलपुण्ट्रमेव धारयन्ति । इदमलं तेषामाक्रमणशीलतां सत्यापयितुम् । तस्माद् देशिकदिव्यमङ्गलविग्रहस्य एव चिरन्तनः पुण्ट्रः । स बहु निर्बन्धेऽपि देशिकभक्तैः कथमपि रक्ष्यत इति ।

श्रीवैष्णवानां अभ्यर्हिततमेषु त्रिषु दिव्यदेशेषु श्रीरङ्गे उक्तरीत्या अतिसन्निहितकाल एव तेन्कलापुण्ट्रो भगवतो ललाटे धारितः । तिरुपतिक्षेत्रे भगवतः श्रीनिवासस्य पुण्ट्रः सर्वविदित एव । स न तेन्कलापुण्ट्रः । श्रीकाञ्चीपुरे प्रधानतमस्य भगवतो देवाधिराजस्य पुण्ट्रः अद्याप्यपरिलुप्तो देदीप्यते । महाप्राज्ञैः श्रोत्रियैरनधिष्ठितेषु क्षेत्रान्तरेषु आग्रहिभिः विपर्यये कृते मूढजनाः तमेव क्रममनुवर्तयन्ति ।

45 आचार्येषु भगवता रङ्गनाथेन वेदान्ताचार्यबिरुदप्रदानेन सम्भाव्य सिद्धान्तस्थापनेऽभिषिक्तत्वात् देशिकस्य सर्वप्राधान्यम् । तेन तस्य विभवदशायामेव तत्सन्निहितकाल एव च बहुषु दिव्यदेशेषु तद्विग्रहप्रतिष्ठाऽकारि । काले गच्छति तेन्कलाजनाः स्वाक्रान्तेषु आलयेषु क्वचित् तस्य विग्रहमेवापनिन्युः । क्वचित् नामान्तरमकुर्वन् । क्वचिच्च पुण्ट्रान्तरं धारयित्वा परिभवन्ति । तेन खेदभाजो देशिकभक्ताः स्वभक्तिपरिवाहभूतं तदाराधनोत्सवादिकं कर्तुकामाः जनान्तरोपद्रवरहितं पृथगालयं निर्माय मनोरथं पूरयन्तः तृप्यन्ति । बहिर्भूमिनिविष्टानपि अनुद्रुत्य पीडयन् घुर्घुरायमाणो जन्तुः शोचनीयः । शान्तं पापम् ।

यथाऽनार्याक्रान्तत्वात् आर्यावर्तो नेदानीं पूर्ववत् तथात्यन्तं सतामावासयोग्यः तथा नास्तिकाक्रान्ता दिव्यदेशा अपि । "सा काशीति

न चाकशीति" इति ह्यत्रापि निष्कर्षं कृतवानेव देशिकसार्वभौमः ।

46. "प्रायः सर्वेषु च आळ्वाराचार्याणामवतारस्थलेषु निराबाधं भ्राजमानाकार एव पुण्ट्रः देशिकेन विभवकाले स्वाङ्के धृतः" इति कल्पनापाण्डित्यं प्रकाशयन्नाह । अनयैव रीत्या अद्य यतः प्रायः सर्वे दिव्यदेशवासिनः देवालयसम्बन्धिनश्च जनाः अनधीतवेदाः अकृतसन्ध्योपासनाः तथैव देशिक आसीत् अन्ये चाचार्या इत्यनुमाने किमुत्तरम् ?

देशिकस्य लोकोत्तरमहिमासहतया अवस्थाद्वयकल्पनादिमुखेन पात्रपद्मापलापपरिवादादिमुखेन च कुलपरम्परया ये तस्मै द्रोहमाचरन्ति तैराहृतः पुण्ट्रो न देशिकेन धृतो भवितुमर्हतीति तु सुखेनात्र निश्चयः कर्तुं शक्यः, कार्यश्च ।

47 अद्य मुखे ध्रियमाणस्य तेन्कलापुण्ट्स्य अत्यर्वाचीनत्वात् परकालसूरिकाल एव सत्त्वं न कश्चन श्रद्धास्यति । अभिनिविष्टैर्बलिष्ठैः साहसिकैः यत्किमपि कर्तुं शक्यत इति न स्तम्भेषु गाधमहापुण्ट्दर्शनमपि तत्प्राचीनत्वप्रत्यायनायालम् । श्रीरङ्गदेवालयस्थश्रीशठकोपसूरिभाष्यकारादिविग्रहदर्शनेन प्राचीनपुण्ट्तत्त्वे निर्णिते सर्वमन्यत् तदनुरोधेन निर्णेयम् । रायगोपुरे अन्तः पार्श्वे शिलायामेव उट्टङ्कितो महान् वडकलापुण्ट्रो दीप्यते । स एव प्राचीनः । भगवद्भाष्यकारावतारस्थलभूतश्रीभूतपुरीस्थतद्विग्रहे स्थितं पुण्टाकारं अयमेव पूर्वपक्षी श्रीरामानुजपत्रिकायां प्रकाशितवान् ।

नासामूले अङ्गुल्या मृदो विन्यसनकालेकिञ्चिद्वैशाल्यमवर्जनीयम् । तदेवात्र वर्तते । अयं वडकलापुण्ट्र एव । न तु तेन्कलापुण्ट्र इति स्फुटं पश्यामः । किमत्र ततः परं विवादेन ?

48 देशिकद्रोहेणैव स्वायुषि एकैकमपि क्षणं गमयन् अयं स्वकीयेषु दुराचारेषु देशिकमेव प्रमाणीकरोतीत्यतिशोचनीयमेतत् । कुतः कृष्णपादं लोकाचार्यं अन्यं वा कञ्चित् प्रमाणतया नाश्रयति ? "अस्माकं विभ्रमाय विनाशाय च दिव्यप्रबन्धादिविवरणव्याजेन केचिदतिवादाः परं तैः कृताः । अवश्यज्ञातव्येष्वपि अन्येषु सर्वेषु विषयेषु ते मूका एवाभवन् । तस्माद्देशिक एव नः शरणम्" इत्येव अनेनोत्तरं देयम् । तत्र देशिको यदाह तद् यथावद् ज्ञात्वाऽनुष्ठेयम् । न तु स्वेन दुराग्रहगृहीतो योऽर्थः स देशिकसूक्तिषु निधेय इति प्रतिबोधयामः ।

49 अयमस्माकं पुण्ट्राकार इति देशिकं विना अन्यो यः कोऽप्याचार्यो नोक्तवान् । देशिकश्च पुण्ट्रप्रस्तावे भगवद्रामानुजशिष्यपरम्परासु क्वापि पुण्ट्रभेद आसीदिति न सूचितवानपि । यदि कश्चन भेदोऽभविष्यत् स नूनं तं प्रत्यपादयिष्यदेव । तथा प्रतिपादनविरहात् सर्वेषां देशिककालवर्तिपर्यन्तानां एकरूप एव पुण्ट्र इति निस्सन्दिग्धमेतत् । एवमेव ललाटे अङ्गान्तरेषु च विन्यस्यमानस्य पुण्ट्रस्य यदि तदा आकारभेदोऽभविष्यत् तं स नियतं प्रदर्श्य प्रमाणमपि तत्र उदाहरिष्यत् । तदनुदाहरणात् तदपि वैरूप्यं नासीदिति निश्चीयते ।

50-51 दीपशिखाद्याकारपुण्ट्रापेक्षया हरिपादाकारपुण्ट्र एव परमैकान्तिनां प्रशस्त इति श्रीसच्चरित्ररक्षायां देशिक आह । तत्र वडकला-

पुण्ट्रस्य शूर्पाकारतां पूर्वपक्षी दर्शयति । तत् केवलं दौर्जन्यात् । शूर्पस्याकारः अयम्—



हरिपादाकारश्चायम्—

शूलस्य एवमाकारं दर्शयति ।



तदपि स्वपुण्ड्रस्य तदाकारत्वात् परिरक्षणतृष्णाविजृम्भितम् । शूलमिति ह्यायुधविशेष उच्यते । तस्य त्सरुरप्यवयवः । उपरि त्रिशिखः अधः पुङ्खघटितः आयुधविशेषः शूलमित्युच्यते ।



इत्ययमेव तस्याकारः ।

तदेवं वडकलापुण्ड्र एव विशिष्टाधिकारिधार्यतया सच्चरित्ररक्षासम्मतः, न तेन्कलापुण्ड्रः ।

52–53 अद्यतनस्वकीयपुण्ट्राकारस्य प्रामाणिकत्वसिद्धये बह्वीः कल्पनाः करोति। "हरेः पादद्वयाकृतिम्" इति वचनं न देशिकेनोपात्तम्। अत इदमविश्वसनीयम्। "हरेः पादाकृतिमात्मनो हिताय" इति, "दीपाकारं ततश्चापि वेणुपत्रसमाकृतिम्" इत्युपक्रम्य "मम पादाकृतिं तथा" इति च वचनोदाहरणं सच्चरित्ररक्षायां दृश्यते। न च द्विवचनान्तेनेह समासः। प्रथमातिक्रमे कारणाभावात्। दीपाकारवेणुपत्रादिसममिव्याहाराच्च। न हि दीपद्वयाकारत्वं वेणुपत्रद्वयाकारत्वं वा इष्यते। तस्मात् 'हरिपादद्वयाकृति'मिति केवलं कल्पितमिदं वचनम्। नेत्रोपरोधितया अशक्यार्थविधायकत्वाच्च इदं वचनमप्रमाणम्। शक्यत्वे च नेत्रोपरोधमपि सोढ्वा यथाविध्येव धारणं कार्यम्। अङ्गान्तरपुण्ट्रवैरूप्यपरिहारार्थं च।

यत्तु 'प्राकारमण्टपगोपुरादिषु नेत्रोपरोधवार्ताप्रसक्त्यभावेऽपि मुखे विलसत आकारस्यैव मुख्यत्वमिति हेतुना मुखधार्यमाणपुण्ट्राकार एव प्राकारादिषु प्राचीनैः पर्यकल्प्यत' इति तद् बालिशभाषितम्। तस्य विकलत्वेनामुख्यत्वात्। अविकलत्वेनाङ्गान्तरवर्तिनामेव मुख्यत्वात्। कलहोचितस्य प्रस्फुटपुण्ट्रभेदस्य तत्रैव स्थितेः परहृदयतापजननमुद्दिश्य तस्यैव प्राकारभित्त्यादिषु विनिवेशनमितितु युक्तम्। पादयोरधस्तात् नेत्रावारकभागमात्रपरित्यागे इत्ययमाकारो निष्पद्यते।

तत्र श्रीचूर्णस्य उपरिनयनम्, तस्य अधस्तात् पादांशद्वयान्तरालपूरणम्, एवं पूरितस्य पाद इत्यभिधीयमानस्य भागस्य अधोभागपार्श्वद्वये अश्रिद्वयं विलोप्य

इत्याकारकल्पनम्,

इति सर्वमिदं विनैव प्रमाणं स्वेच्छयैव क्रियते । इदं सर्वमस्य पुण्ट्रस्यार्वाचीनत्वे लिङ्गम् ।

54 'हरिपादद्वयाकृतिम्' इति वचनं कल्पितमित्यवोचाम । कल्पनमपीदं अत्यन्तमसमर्थस्येति प्रतीयते । पुण्ट्राकारे ज्ञातव्ये येषां वस्तूनामाकारो लोके व्यवस्थितः प्रसिद्धः तेषामेव दृष्टान्ततया प्रदर्शनं न्याय्यम् । दीपशिखावेणुपत्रपद्ममुकुलादीनां व्यवस्थितमेव रूपम् । न च दीपशिखाया वातविक्षेपणेनान्यथाऽपि रूपं भवतीति शङ्कयम् । तस्यौपाधिकत्वात् । निवाते स्थितस्य स्वाभाविकस्यैव रूपस्य ग्राह्यत्वात् । अन्यथा अजादिभिः अर्धजग्धस्यापि वेणुपत्रस्य दृष्टान्तत्वापत्तेः । न चैवं पादद्वयस्य व्यवस्थितं रूपं किञ्चिदस्ति । अवस्थाने आसने शयने सञ्चरणे वा सर्वदा पादद्वयस्य इच्छानुसारेण विविधसन्निवेशं स्थाप्यमानत्वात् । अयं सन्निवेशः स्वाभाविक इति दुर्वचत्वात् । इदं तावदसामञ्जस्यमेकम । अन्यदुक्तं पूर्वम्—

इत्येव पुण्ट्राकारः स्यात् ।

न तु एवमिति । अत्र प्रतिविधाने· च्छया "कुण्डलीकृतसर्पस्य-हरिपादद्वयाकृतिम्" इति कल्पनान्तरं कुर्वन्ति । दीपशिखाद्याकारान्तरस्य न खलु आधारनिर्देशोऽस्ति । तेन अत्र परं यद्विशेषतस्तन्निर्देशः क्रियते तदपरं नवीनपुण्ट्रसृष्टिप्रयासस्य लिङ्गम् । अत्राप्यसामर्थ्यमेव कल्पकस्य दृश्यते । सर्पस्य कुण्डलीकरणमात्रं ह्युच्यते । तत्र फणोद्धारः कथं प्रदर्श्यते । अविस्तृतफणस्य शिरसोऽपि कुण्डलसङ्गितया अपृथगुपलम्भ एव सम्पाद्यः ।

तस्य च कुण्डलस्योपरि कृत्स्नपादद्वयनिधाने इति अन्य एव कश्चिदाकारः सम्पद्यत इति नेष्टसिद्धिरिति। एवमुत्फुल्लकमलस्य अष्टमीन्दुकलायाश्चाधारत्वकल्पनेऽपि कृत्स्नस्य पादद्वयस्य तदुपरि निधानं न्यायतः कर्तव्यम्।

अथ च आधारस्यापि सान्तरालत्वं कार्यम्। 'द्विजः पुण्ट्रमृजुं सौम्यं सान्तरालं तु कारयेत्', 'विमलान्यूर्ध्वपुण्ट्राणि सान्तरालानि यो नरः', 'निरन्तरालं यः कुर्यादूर्ध्वपुण्ट्रं विमोहितः' इति पुण्ट्रत्वावच्छेदेन सान्तरालत्वविधानात्, निरन्तरालत्वनिषेधाच्च। एवं अहिकुण्डलं वा कमलं वा अर्धचन्द्रं वा पर्याप्तं आधारं परिकल्प्य तदुपरि पादद्वयं कृत्स्नं सान्तरालं निधाय आधारस्यापि सान्तरालत्वे कृते एकहरिपादस्य य आकारः स एव सम्पद्यत इति घट्टकुट्यां प्रभातम्। वृथा परिश्रमो महानूरीकृतः। अविकलस्यार्धचन्द्रस्योपरि पार्श्वद्वये कृत्स्नपादद्वयनिधाने अर्धचन्द्रस्य अन्तरालविरहेऽपि वडकलापुण्ट्र एव भवतीत्यपि ज्ञेयम्। 'तदेवं हरिपादसंस्थानत्वं सान्तरालत्वं च सोपबृंहणश्रुतिसिद्धम्' इति निष्पन्नाकारस्य कृत्स्नस्य पुण्ट्रस्य हि हरिपादसंस्थानत्वं श्रीसच्चरित्ररक्षायामुच्यते।

श्रीदेशिककालात् चिरात्पूर्वमेव पृथग्भूताः सोमाशि-आण्डान्वंश्याः वल्लभसम्प्रदायस्थाः अन्ये च गोपीचन्दनधारिणः कीरनामधारिणो मतान्तरस्थाः इति सर्व एव वडकलापुण्ट्रमेव बिभ्रतीति प्राचीनत्वमस्य अप्रकम्प्यम्। अतो वैपरीत्यात् पुण्ट्रान्तरमत्यन्तमर्वा

चीनमित्येतदपि तथैवाप्रकम्प्यम्। तदद्यतनतेन्कलापुण्ट्रसन्निवेशानुग्राहकं नकिमपि प्रमाणमस्तीति वेदितव्यम्।

परं तु कदा कथं तस्य प्रादुर्भाव इति जिज्ञासा सर्वेषां बलवती वर्तते। तत्र कैश्चित् कथ्यमानमिदं विश्वसनीयं मन्यामहे। वरवरमुनिकाले ततः परं वा स्थिताः केचिदाचार्याः अवरजातिजनानपि वैष्णवान् कुर्वन्तः ब्राह्मणश्रीवैष्णवेभ्यस्तेषां झटिति वैलक्षण्यप्रतीतये पुण्ट्रस्याधस्तात् किमपि चिह्नं न्यधापयन्। तत् तैः पुण्ट्रावयवत्वेन गृहीतं क्रमेण साम्प्रतिकतेन्कलापुण्ट्राकारनिष्पत्तिहेतुर्बभूव। शिष्याणां पुण्ट्रे तदाकारे निष्पन्ने पश्चात् अन्यादृशाकारपुण्ट्रधारिण आचार्याः तेषामविश्वसनीया भवन्तीति। पश्यन्त इमे स्वयमपि तमेव धारयितुमारभन्तेति। तिरुपतिदेवालयगजानां मुखेषु मूले समरेखावतः पुण्ट्रस्याधः वर्तुलं चिह्नमेव साम्प्रतमपि दीयते।

श्रीमद्भागवते कालियसर्पं प्रति "स सुपर्णस्त्वां नाद्यान्मत्पदलाञ्छितम्" इति भगवद्वचनं श्रूयते। सर्पाणां शिरसि यद् वर्तते तत् हरिपदरूपं लाञ्छनमिति अनादेः कालाद् व्यवहृतमासीदिति निस्संशयमितो जानीमः। तदाकारश्चेत्थम्—

तस्मात् हरिपादाकृतिमिति पुण्ट्राकारे उपदिश्यमाने एकपादाकार एव आधाररहितः पुण्ट्रस्यआकारोऽभिमत इति प्राज्ञैरवगन्तव्यम्।

55 अथ सूर्यकिरणानां सूर्येण सम्बन्धो नासीदिति वदन् राहुबन्धुजन इव वडकलानां देशिकसम्बन्धो नासीदिति प्रतिजानानोऽयं देशिकग्रन्थोक्तार्थविरुद्धार्थवादिनो वडकला इति लोकस्य भ्रममुत्पादयितुं प्रवर्तते। चिरादयमेवं वदन्नास्ते। तत्त्वमत्र शतकृत्वो

निरूपितं च अस्माभिश्च अन्यैश्च । तथाऽपि निर्लज्जं तदेव पुनर्मुद्रयित्वा प्रकाशयति । कथमेवं क्रियत इति पर्यनुयोगे 'भवन्तोऽपि भवदुक्तं पुनर्मुद्रयित्वा प्रकाशयन्तु, को निवारकः ?' इति प्रतिवक्ति । देशिकश्रीसूक्तिभ्यः तेन्कलासम्प्रदायार्थप्रतिष्ठापनोद्यमः श्रीभाष्यात् अद्वैतसिद्धान्तस्थापनोद्यमतुल्य इति विदाङ्कुर्वन्तु विद्वांसः ।

56-57 1 तेन्कलाचार्या अपि

सर्वज्ञोऽपि हि विश्वेशः सदा कारुणिकोऽपि सन् ।
संसारतन्त्रवाहित्वाद्रक्षापेक्षां प्रतीक्षते ॥

इतीदं प्रमाणवचनमुदाहृत्य रक्षापेक्षामावश्यकीं वदन्ति । तस्मादुभयेषां भगवद्दया स्वरूपे निर्हेतुका । फलसिद्धौ तु व्याजसापेक्षेत्येव मतम् । अस्मासु यं कमपि यत्नं विना भगवत्कृपैव स्वयं फलं दिशतीति न कस्याप्याचार्यस्य मतम् । पूर्वपक्षिणा उदाहृते परमपदसोपानग्रन्थेऽपि 'व्याजतयोपादाय' इत्यस्ति । 'उन्निनीषाधो निनीषयोर्निर्हेतुकत्वे परमात्मनो वैषम्यनैर्घृण्यप्रसङ्गात्' इति श्रुतप्रकाशिका ।

'अव्याजोदारभावात्' इत्यत्र यशोलिप्सादिव्याजशून्यमौदार्यमित्ययमेवार्थः । न तु प्रार्थनाराहित्येऽपि फलप्रदत्वमिति ।

2 प्रपत्तिर्नोपाय इति, मुमुक्षोः प्रपत्तिरनपेक्षितेति, न केऽपि तेन्कलाचार्या आतिष्ठन्ते । श्रीशठकोपसूरिः प्रपन्न इति स्पष्टं ते आचक्षते । प्रपत्तिरधिकारिविशेषणमिति पिल्लैलोकाचार्य आह । देशिकस्तु "प्रपन्नादन्येषां न दिशति मुकुन्दो निजपदम्" इति श्रीमद्रहस्यत्रयसारे सावधारणमाह । न्यायसिद्धाञ्जने प्रपत्त्यनुष्ठानकाले तस्या उपायत्वेन प्रतीतिर्न भवतीत्याह । न तूपायत्वं नास्तीति । "भक्त्या परमया वाऽपि प्रपत्त्या वा महामुने । प्राप्योऽहं नान्यथा प्राप्यः" इति प्रमाणशतसिद्धत्वात् तस्य ।

3 एकलाभोक्तौ इतरलाभस्यापि तत्रान्तर्गतत्वात् एकव्यवच्छेदेन इतरावधारणं अविवेककृत्यमिति श्रीदेशिकचरणाः कण्ठरवेण कथयन्ति ।

अत्र स्वलाभापेक्षाऽपि स्वामिलाभावसायिनी ।
स्वामिप्रयोजनापेक्षाऽप्यतः स्वानन्दहेतुका ॥

इति श्रीमद्रहस्यत्रयसारे मूलमन्त्राधिकारश्रीसूक्तिः । चत्वारः पुरुषार्था इत्यतिप्रसिद्धमेतत् । यदि मोक्षः ईश्वरस्यैव पुरुषार्थः इतरेऽपि तस्यैव कुतो न भवन्ति ? अथवा किं त्रय एव चेतनस्य पुरुषार्थाः ? 'रसꣳ ह्येवायं लब्ध्वाऽऽनन्दी भवति' इति कस्य लाभः कस्योच्यते । 'तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्' इत्यत्र 'मत्प्राप्तिलक्षणं योगम्' इति भाष्यम् । 'मत्प्राप्तीति अलब्धलाभो योगः' इति तात्पर्यचन्द्रिकायां श्रीदेशिकः । 'स्वलाभं मत्वा' इत्यनेन इतरलाभो न व्यवच्छिद्यत इति तपस्वी न जानाति ।

4 स्वगतपरगतस्वीकारविमर्शोऽपि पूर्ववदेव । चेतनेन स्वीकृतो भगवान् तं स्वीकरोति । तदिदं स्पष्टमुक्तं 'अनन्यचेताः सततम्' इति गीताष्टमाध्यायश्लोकभाष्ये । तथाहि—

"एवमैश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्यानुगुणं भगवदुपासनप्रकार उक्तः । अथ ज्ञानिनो भगवदुपासनप्रकारं प्राप्तिप्रकारं चाह"—

इत्यवतारिकाऽत्र दत्ता । उपरि च

सततं सर्वकालं अनन्यचेता यः स्मरति अत्यर्थमतिप्रियत्वेन मत्स्मृत्या विना आत्मधारणमलभमानो निरतिशयप्रियां स्मृतिं यः करोति, तस्य नित्ययुक्तस्य नित्ययोगं काङ्क्षमाणस्य योगिनोऽहं सुलभः, अहमेव प्राप्यः न मद्भाव ऐश्वर्यादिकः ; सुप्रापश्च ।

इति विवक्षे। यथा ऐश्वर्यार्थी कैवल्यार्थी च तदुपायभजनविषयतया भगवन्तं स्वीकरोति तथैव मोक्षार्थी ज्ञान्यपि स्वीकरोतीति अवतारिकायां भाष्यकृदभिप्रायः सुस्पष्टः। 'अनन्यचेताः सततं योमां स्मरति' इति श्लोके च स्वगतः स्वीकारः स्पष्टमुक्तः। भाष्ये च 'यः स्मरति तस्य नित्ययोगं काङ्क्षमाणस्य' इत्यनेन ग्रन्थेन स स्पष्टतरः कृतः। एवं कृतभगवत्स्वीकारस्य पुरुषस्य कथं भगवान् सुलभो भवतीत्येतदुपपादयन् भाष्यकारः

> तद्वियोगमसहमानोऽहमेव तं वृणे। मत्प्राप्त्यनुगुणोपासनविपाके तद्विरोधिनिरसनं अत्यर्थमत्प्रियत्वादिकं च अहमेव ददामीत्यर्थः। 'यमेवैष वृणुते तेन लभ्यः' इति हि श्रूयते।

इत्याचष्ट। अत्र अवतारिकायां श्लोके तद्भाष्ये च कण्ठोक्तं मोक्षार्थिनः स्वगतव्यापारं सर्वथा उपेक्ष्य श्लोकतात्पर्यविवरणाय अन्ते भाष्यकृता उक्तं 'अहमेव तं वृणे' इत्येवमादिकं 'परगतस्वीकार एव रक्षकः' इति स्वाभिमतदुरर्थोपपृष्टम्भकतया उदाहरतः वञ्चनापरत्वं सर्वसुगमम्। षट्त्रिंशत्सहस्रिकायां च

> "अधिकारिणो लाभेऽपि उपायस्य सिद्धत्वेऽपि च स्वीकारविरहे जीवनाभावात् तस्य स्वीकारस्य स्वरूपं 'चरणावेव शरणं कृतवत्' इति, साङ्गानुष्ठानकाले 'चरणयोरधस्तात् निभृतं प्रविष्टोऽस्मि' इति च प्रत्यपादयत् श्रीशठकोपसूरिः।"

इति स्वगतस्वीकारः श्रीशठकोपसूरिणा स्वयमनुष्ठिततया उक्तः। तदिहापि पूर्वपक्षिणोक्तं सर्वपूर्वाचार्याभिप्रायविरुद्धम। तात्पर्यचन्द्रिकायां 'उक्तस्यातिवादत्वशङ्काव्युदासाय श्रुतिमूलतामाह' इति देशिकश्रीसूक्तौ 'उक्तस्य' इत्यस्य कृतभगवत्स्वीकारं पुरुषं स्वीकर्तुं भगवान् स्वयं यतत इत्युक्तस्येत्यर्थ इति न कश्चिद्विरोधः। नायमात्माश्रुतिः—

प्रियतम एव हि वरणीयो भवति । यस्यायं
निरतिशयप्रियः स एवास्य प्रियतमो भवति ।

इति श्रीभाष्ये चेतनगतभक्तिगर्भतयैव व्याख्यातेति परगतस्वीकारमात्रे तस्याः प्रमाणतयोदाहरणं साक्षात् भाष्यकारतिरस्कारसाहसमवलम्ब्यैव कृतम् ।

5 "प्रपत्तिमपराधकोटिप्रविष्टां वदन्तु । परमं दोषं वदन्तु । स्वभावविरुद्धं वदन्तु । एवमन्यदपि बहु वदन्तु । 'प्रपत्तिरनुष्ठेया' 'मुमुक्षोः सा अनपेक्षिता" इति वदन् यः कोऽपि वरवरमुनिपर्यन्तेषु आचार्येषु किमस्ति ? तत्पर्यालोच्यताम् । मुमुक्षुप्पडि-रहस्ये "तस्य स्वीकार एव रक्षकः । अन्येषामुपायानां निवृत्तिर्दोषः । अस्य प्रवृत्ति-र्दोषः" इति वदन्नेव पिल्लै-लोकाचार्यः अत्र 'इदं सर्वमुक्तिप्रसङ्गपरिहा-रार्थम्' इति, परन्दपडिरहस्ये 'अतः पूर्वार्धे ... स्वीकारप्रकारं स्वीकारं चाह'इति , तनिचरमरहस्ये 'अयं चोपायः (भगवान्) एकेनाकारेण सापेक्षः अपरेणाकारेण निरपेक्षश्च भवति । कथमिति चेत् आश्रयणकाले अधिकारिसापेक्षः, फलप्रदाने इतरनिरपे-क्षश्च' इति, तत्रैव 'तस्मात् त्यागविशिष्टः स्वीकारः, स्वीकारविशिष्टोऽ-धिकारः, गुणविशिष्ट उपायः इत्युक्तं भवति ।' इति च आह । तस्मात् मुमुक्षुभिः प्रपत्तिरनुष्ठेयेत्यत्र तेन्कलाचार्याणामपि नास्ति विप्रतिपत्ति-लेशोऽपि । सर्व एव तदनुष्ठानं आवश्यकं मन्यन्ते । अन्यथा सर्वमुक्ति-प्रसङ्गात् । अनुष्ठीयमाना प्रपत्तिस्तु किं रूपाऽस्माभिर्भावयितव्येत्यत्र विप्रतिपत्तिरस्ति । तद्विमर्शेन नास्ति नः प्रकृते किमपि फलम् । एवं चानुष्ठेयत्वे सिद्धे तत्रापराधत्ववचनतात्पर्यं बुद्धिमद्भिरुपलब्धव्यम् । 'चैतन्यस्वभावः आत्मसमर्पणं विना न तिष्ठेत्' । 'यथावत्प्रतिपत्तिरूपं समर्पणं सर्वप्रायश्चित्तरूपं स्वरूपलाभश्चे'ति प्रमाणान्तरेषु दृश्यम् ।'

'निरुपाधिको यागः आत्मसमर्पणम्' इति तन्निप्रणवान्तेसमर्थितं लोकाचार्येणैव ।

"कैङ्कर्यप्रार्थनाया अपराधत्ववादिन्याः देशिकश्रीसूक्तेस्तात्पर्यं धिगशुचिमविनीतं ... ... तव परिजनभावं कामये कामवृत्तः" इति यामुनाचार्यस्तोत्रश्लोकस्य तेन यत् तात्पर्यमुक्तं तदेवेति नाद्य अस्माकं तत्र किञ्चिदभिधातव्यमस्ति ।

6 कर्मज्ञानभक्तीनां स्वरूपविरुद्धत्वं नैव सम्भवतीति श्रीमद्रहस्यत्रयसारे साध्योपायशोधनाधिकारे

"तस्मादात्मस्वरूपं प्रति उपासनादीनां नाशकत्वासम्भावितत्वानर्थावहत्वविरहेण स्वरूपविरोधप्रसङ्गो नास्ति"

इति कण्ठोक्त्या श्रीदेशिक आह । एवमस्य कण्ठोक्त्युपलम्भात् तद्विरुद्धाभिप्रायानुमानं अव्युत्पत्तिविजृम्भितमिति सज्जनाराधने उक्तवन्तः स्मः । एवं स्वरूपविरुद्धत्ववादखण्डनमात्रेण न विश्राम्यति देशिकः ।

'इत्थं यथाधिकारं शास्त्रविहितेष्वपि उपासनादीनि स्वरूपविरुद्धानीति केचिदाहुः एतेऽपि प्रपत्तिप्रशंसार्थं अतिवादं कृतवन्त इत्येतावदेव ।'

इति तेषां तात्पर्यकल्पनेन एकाभिप्रायत्वमेव स्थापयतीत्यपि द्रष्टव्यम् ।

7 पुरुषकारभूता च श्रीमहालक्ष्मीः उपायभूता चेति स्फुटमाह देशिकः । सिद्धोपायशोधनाधिकारे

'केचित् द्वयमन्त्रे पूर्वखण्डे श्रीमच्छब्द उपलक्षणपर इति उत्तरखण्डे श्रीमच्छब्दो विशेषणपर इति च विभक्तमाचचक्षिरे । अत्र शब्दे एकरूपे स्थिते स्वारस्यबाधके चासति 'स्वरूपं स्वातन्त्र्यं भगवत इदम्' इत्यादिषु प्रसिद्धकूटस्थसम्प्रदायविरोधेन क्रियमाणो विभागोऽनुपपन्नः ।'

इत्थं प्रपत्तिविद्यायां तत्तन्मन्त्रानुसारतः ५
विभुः पत्न्या गुणाद्यैश्च विशिष्टो विषयोऽत्र नः ॥

इति च तदुक्तिः प्रसिद्धा । पूर्वपक्ष्युदाहृते रहस्यरत्नावलीवाक्ये च 'पुरुषकारभूता सती चेतनानां शरणमित्यत्र पुरुषकारत्वं शरणत्वापरपर्यायमुपायत्वं च पृथगुक्तमिति व्युत्पन्नानां सुग्रहम् । 'केचिदाचार्याः' इत्यादिना देशिकपक्षोऽयं तनिप्रणवे लोकाचार्येणापि स्थिरीकृतः।

8 प्रतिवस्तु पूर्णत्वं भगवतः शास्त्रेपूच्यमानं शतकृत्वो बोधितमपि नायं ग्रहीतुं शक्नोति । घटत्वगोत्वादिरूपाया जातेः तस्यां तस्यां व्यक्तौ पूर्णत्वं यादृशं तादृशमेव पूर्णत्वं भगवत एकैकस्मिन् वस्तुनि भगवता भाष्यकारेण प्रत्यपादि । इदमेव दिव्यप्रबन्धव्याख्यातारो देशिकश्च स्वस्वग्रन्थेषु निरूपितवन्तः । अत्र प्राचामाचार्याणां वैमत्यमेव नास्ति । अर्वाञ्चस्तु तेन्कला दुर्ग्रहत्वादिमं विषयमन्यथा गृह्णन्तः 'कृत्स्नं भगवतः स्वरूपं एकैकस्मिन् वस्तुन्यन्तर्भवति । एकस्यान्तर्भूतं चेत् अन्यत्र कथं वर्तेत, तस्यैव वस्तुनो बहिर्वा कथं वर्तेत, इति चेत् अघटितघटनासामर्थ्येन तत्सर्वमुपपद्यत' इत्यप्रामाणिकं बहु वदन्ति । एवं चेत् जातिदृष्टान्तो भाष्यकारेण दत्तः कथं घटेतेत्यपि बत न पर्यालोचयितुमीशते। सर्वशक्तिनामके ग्रन्थे इदं विततय निरूपितवन्तः स्मः ।

9 एकस्मिन् जन्मनि जातिविपर्ययः वरवरमुनिपर्यन्तेषु आचार्येषु यस्य कस्यापि न सम्मतः। आजन्मनो विलक्षणज्ञानभक्तिसम्पन्नस्य श्रीशठकोपसूरेरपि विषये अपशूद्राधिकरणन्यायं सञ्चारितवतां षट्त्रिंशत्सहस्रीकारप्रभृतीनां अभिप्रायस्तत्र व्यक्त एव । आचार्यहृदयग्रन्थे अभिप्रायान्तरमापाततः प्रतीयत इव । तत्रापि सूक्ष्मेक्षिकायां क्रियमाणायां धर्मशास्त्रव्यवस्थाभञ्जनप्रवृत्तिर्नास्तीत्येव निश्चेतव्यं भवति । परन्तु ततो भ्रान्ताः केचित् विपरीतसिद्धान्तस्थापनप्रवणा आसन्निति

देशिकश्रीसूक्त्याऽवगम्यते । स हि श्रीमद्रहस्यत्रयसारे प्रभावव्यवस्थाऽधिकारे तेषां पक्षं निरस्यति । 'सुरभेरपि सत्याः गोत्वं नापैति' इति 'शारीरगुणविशेषमूलतया व्यवस्थिताः शारीरजातिविशेषाः उत्पत्तिसिद्धा मरणान्तं स्थिरा भवन्ति ।' इति,

चातुर्वर्ण्यं चतुर्विधाश्रममुखे भेदे यथावस्थिते
वृत्तं तन्नियतं गुणानुगुणया वृत्त्या विशिष्टं श्रिताः ।

इति च आह । तदियं जातिविपर्ययवार्ता पामरवशीकरणाय अहृदयमेव अर्वाचीनैः तेन्कलाजनैरुच्यते । विपरीतपक्षावलम्बित्वसाधकतया 'शिलादेः स्त्रीत्वादि'रित्यादिं देशिकश्रीसूक्तिमुदाहरन् जातिशब्दार्थमेव न जानातीत्यास्तामेतत् ।

10 'परदुःखदुःखित्वम्' इत्येष व्यवहारः भगवतो विषये सहस्रनामभाष्ये कृतः । अस्य 'परदुःखदर्शनेन स्वयं दुःखभाक्त्वम्' इत्यर्थमल्पप्रज्ञा गृह्णन्ति । वस्तुतस्तु परदुःखाभिन्नदुःखवत्त्वमिति तत्र विवक्षितोऽर्थ इति तं ग्रन्थं पश्यतां सुधियां सुगमम् । अस्माकं जातं दुःखं स्वकीयमेव भावयति भगवानिति तात्पर्यम् । इदं वयं उद्यानपत्रिकायां विशदमुपपादितवन्तः स्मः ।

"दया हि नाम स्वार्थनिरपेक्षा परदुःखासहिष्णुता' इति रचनानुपपत्त्यधिकरणे श्रीभाष्यम् । 'जीवानुप्रवेशेषु शाकादयो जीवांशगताः । साक्षादवतारेष्वभिनयमात्रम् ।' इति अन्तराधिकरणश्रुतप्रकाशिकायां सिद्धान्तितम् । तदिह परदुःखजन्यदुःखवत्त्वं दयेति श्रीभाष्यश्रुतप्रकाशिकादिस्थितो निर्णय इति कथनं वञ्चनामात्रम् । ईदृशं परदुःखदुःखित्वं देशिकः विरोधपरिहारनार्म्ना रहस्यग्रन्थे

सर्वकर्ता सर्वज्ञः सर्वशक्तश्च सन् ईश्वरः स्वयमेव परदुःखमुत्पाद्य तदवलोकनेन स्वयमेव शोचतीत्येतत् जरद्गवादिवाक्यतुल्यम् ।

इति निराचकार । 'जातनिर्वेदा' इति दयाशतके भगवद्दयाविषयः प्रयोगः औपचारिकः । औपचारिकोऽयं न दुःखविषयः । निर्वेदस्य दुःखादर्थान्तरत्वात् । प्रतिबोधितोऽप्ययं पूर्वपक्षी यत् पुनरपीदमवाह तत् केवलं निर्लज्जत्वात् । वचनार्हविषयान्तरदरिद्रत्वाच्च ।

11 वात्सल्यं प्रत्यपि पिष्टपेषणमेव कर्तव्यं भवति । अस्य रूपं श्रुतप्रकाशिकायां त्रिषु स्थलेषु जिज्ञासाधिकरणान्ते सामान्यतः "दोषानवभासः दोषेषु गुणबुद्धिः' इति । समन्वयाधिकरणे दोषेष्वपि गुणत्वबुद्धिः यथा धेनोर्वत्से' इति । अन्तरधिकरणे 'दोषानादरहेतुः स्नेहः, यथा मातुः पुत्रे' इति । अत्र दोषेषु गुणत्वबुद्धेर्भगवत्यसम्भवात् औपचारिक्येव भगवति तद्रूपवात्सल्योक्तिरिति स्पष्टं देशिकः श्रीमद्रङ्गभाष्ये आह । प्राचां तथा वात्सल्यस्वरूपं लक्षयतां लौकिकपुरुषवात्सल्यमेव बुद्धौ स्थितमिति नात्र अभिप्रायभेदे अभिनिवेष्टव्यम् । दोषेषु गुणत्वबुद्धिः भ्रमरूपा प्रमारूपा वा भगवति दुर्वचेत्यन्यत्र विस्तरो द्रष्टव्यः 'दोषो यद्यपि तस्य स्यात्' इति रामायणश्लोकस्य देशिकोक्तमभिप्रायमन्यथा गृह्णन् पूर्वपक्षी यत् किञ्चित् कथयति, तदभिज्ञैः सर्वथा उपेक्ष्यम् ।

12 "आचार्यसन्निधौ पञ्चसंस्कारोपलम्भकाले द्वयोच्चारणानूच्चारणेन प्रपत्तिः सिद्ध्यतीति तेन्कलाचार्याः" इति लिखति । पूर्वं "प्रपत्तिर्नोपायः" इति "प्रपत्तिरपराधकोटिप्रविष्टा" इति तेन्कलामतमाह । तादृश्याः प्रपत्तेः सिद्धिः किमर्थमिहोच्यते ? व्याहतं ह्येतत् । कथं च द्वयोच्चारणानूच्चारणेन प्रपत्तिसिद्धिः ? पञ्चसु संस्कारेषु मन्त्रसंस्कारोऽप्येकः । तत्र यथा श्रीमदष्टाक्षरमन्त्रस्य चरमश्लोकस्य च गुरूच्चारितस्यानूच्चारणेन शिष्यस्य तद्ग्रहणं भवति तथैव द्वयस्यापि । तत्र प्रपत्तेः कः प्रसङ्गः ? 'श्रीभाष्यकारैणैवानुष्ठिता नास्माभिरनुष्ठेया

प्रपत्ति'रिति चाह। द्वयोच्चारणानूच्चारणं पञ्चसंस्कारकालिकमपि दत्त-जलाञ्जलि स्वपक्षे स्यादिति विवेक्तुं न शक्नोति।

तेन्कलासम्प्रदायसमाश्रयणप्रयोगे तापपुण्ड्रनाममन्त्रयागरूपपञ्च-संस्कारसमाप्त्यनन्तरं आचार्यः शिष्यमादाय भगवत्सन्निधिं गत्वा तत्र प्रपत्तिं कारयेदित्यपि लिखितं दृश्यते। एतन्मूलकः समाश्रयण-काल एव प्रपदनमिति प्रवादः। तमिमं अयं विपर्यस्तमतिः अन्यथा गृह्णातीति स्पष्टमेवैतत्। देशिकग्रन्थस्यार्थश्च यथाशीलं दुर्गृहीतः।

13 प्रणामचर्चा कृतपूर्वा। विषमप्रणामो देशिकेन श्रीपाञ्चरात्र-रक्षायां प्रतिषिद्ध इति चोक्तम्। तदत्र देशिकसम्मतिवचनं अनृतभय-राहित्यमूलकम्। स्तोत्रभाष्ये नमो नम इत्यत्र 'पौनःपुन्यमलङ्कृतिः' इत्येतदुदाहृत्य यदुक्तं तत्र 'आवृत्तिः शब्दालङ्कारमात्रमेव न पुनरनुष्ठाने आवृत्तिं सहते' इति हि तदभिप्रायः' इति लिखति। कथमेतत्? यत्रैकत्वं सिद्धं सर्पचोरादौ तत्र सर्पः सर्पः चोरश्चोरः इति शब्दा-वृत्तिमात्रम्। यत्र क्रियया प्रीतिव्यञ्जनं तत्र तस्याः क्रियाया आवृत्ति-र्भवत्येव। 'चम्बुज्जइ सतहुत्तं' चुम्ब्यते शतकृत्वः इत्यारभ्य प्रिये जने नास्ति पुनरुक्तम्' इत्यालङ्कारिका उदाहरन्ति। तदिह नमस्कारस्याप्या-वृत्तिरभिमतैव। भाष्यकारस्य साक्षाच्छिष्यैः वङ्गिवंशेश्वरैः स्वकारि-कासु मन्त्रासनप्रकरणे 'पादुकाग्रये प्रदायाग्रे प्रणम्य च पुनः पुनः।' इति, अलङ्कारासने 'दत्त्वा शुभानि पुष्पाणि प्रणम्य च पुनः पुनः' इति पूजासमाप्तौ 'देवपार्श्वमुपागम्य प्रणम्य च पुनः पुनः' इति, क्षमा-प्रार्थनायां 'समुत्थाय ततस्तस्मै भूयो भूयः प्रणम्य च' इति, पर्यङ्कासने 'प्रणम्य दण्डवद् भूमौ भूयो भूयः पुरो हरेः' इति चोच्यते। अन्यत्र सामान्यतः 'प्रणम्य' इत्युक्तस्य विशदीकरणमेतत्। तस्मात् सर्वत्र पुनः पुनः प्रणाम एव विहित इति ध्येयम्। भाष्य-कारैरेव श्रीवैकुण्ठगद्ये "दूरादेव भगवन्तं शेषभोगे श्रिया सहासीनं

वैनतेयादिभिः सेव्यमानं" "समस्तपरिवाराय श्रीमते नारायणाय नमः' इति प्रणम्योत्थायोत्थाय पुनः पुनः प्रणम्य" इत्यगद्यत । अद्धायं पूर्वपक्षी अपार्थं कञ्चित् कथितवान् । अन्ये तं निरस्तवन्तश्च ।

भगवता निगमान्तदेशिकेन प्रदक्षिणप्रणामान् युग्मानेव सभाचरणीयान् कथितवता विस्तरेण शङ्कासमाधानाद्यकरणात् तस्य काले केषामपि तत्र विप्रतिपत्तिर्नासीदिति, सर्व एव आचार्या युग्मप्रणामानेव कुर्वन्त आसन्निति च असन्दिग्धं प्रतीयते । एवं विषमप्रणामनिषेधवादिनं देशिकं एकप्रणामपक्षानुकूलतया निदर्शयतः हृदयं कीदृशमिति प्रायः सर्वे जिज्ञासेरन् ।

58 उपरि कृतैर्निरूपणैः पूर्वपक्षितुल्या भूयिष्ठा अद्यतनास्तेन्कलाः न परं वेदान्तदेशिकद्रोहिणः अपि तु तेषामेव स्वकीयत्वेनाभिमता ये भट्टारकप्रभृतयो वरवरमुन्यन्ता महान्त आचार्याः तदुक्तानेवार्थान् अनादृत्य मूढग्राहेण अभिनिवेशेन सङ्केतेन च अशास्त्रीयान् उन्मर्यादान् पण्डितजुगुप्सावहान् लोकक्षोभहेतुभूतान् दुरर्थान् कल्पयन्तः तद्द्रोहिणोऽपि भवन्तीति स्फुटीकृतं भवति ।

वस्तुत इमे न तेन्कला अपि । अपि तु सर्वशास्त्रमर्यादातिलङ्घित्वात् केवलं अकला विकला निष्कला वा ।

59 यथा यथा निरूपणं क्रियेत तथा तथा वडकलासम्प्रदायस्य प्राचीनत्वं अन्यस्यात्यन्तार्वाचीनत्वं च स्थिरीकृतं भवेदित्यत्र नास्ति सन्देहगन्धोऽपि ।

60 परैरन्याय्यमाक्रान्तस्य भगवन्मन्दिरस्य प्रत्याहरणमेव श्रीमदहोबिलमठस्वामिभिः कृतमिति परमार्थे स्थिते किमिदानीं तद्विषयेण रोदनेन ?

61 प्रत्यक्रियमाणानन्तरं पुनः प्रवृत्तमाचारं नवीनं कृत्वा ततः प्राक्तनः आक्रमणकारैः प्रवर्तित आचारः प्राचीनत्वेन निर्दिश्यते पूर्वपक्षिणा । ततोऽपि प्राक्स्थितमाचारं पश्येति तत्र प्रतिवचनं श्रीमदास्थानसम्बन्धिनो दित्सन्ति ।

62 "यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः ।
तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः ॥"

इति मनुः अनर्घमुपदेशं करोति । तमवधाय अनृतं अहङ्कारममकारौ परहिंसारुचिं लोकवञ्चनाऽभिसन्धिं अनार्जवं च दूरतः परित्यज्य विषयाः परामृश्यन्ताम् । तदा यद्बुद्धौ भाति तत्पारमार्थिकं भविष्यति । तत् तत्त्वमिति निश्चेतुं शक्यम् ।

इत्थमुत्तरमदायि तात्त्विकं
क्षुद्रबुद्धिकृतदूषणोच्चये ।
तुष्टिरत्र भविता न दुर्मते-
र्यत्र एष सफलः सतां मुदा ॥

इति

मीमांसार्णव, मीमांसाकेसरि, पूर्वोत्तरतन्त्रप्रदीप देशिक-
दर्शनधुरन्धर, पण्डितराज श्रीशैलताताचार्यस्य न्याय-
मीमांसाशिरोमणेः प्राच्यविद्येश्वरस्य
कृतिषु सम्प्रदायप्रदीपे
प्रतिवचनकाण्डः ।

परिशिष्टकाण्डः । (तृतीयः)

1 अप्रतिष्ठा

आत्मस्तुतिसौकर्याय भूमिकान्तरमवलम्ब्य पूर्वपक्षी 'पाञ्चपद्य-चरित्रप्रतिष्ठा' नामकं कुग्रन्थान्तरं प्रकाश्य पुनरपि यथाशीलं श्रीदेशिकदूषणसंरब्धो दुर्वचांसि विसृष्टवान् । तत्र यदवश्यं समाधेयं तत्समाधानमात्रपरा इह किञ्चिदभिदध्महे । अत्र पर्वणामुपक्रमे स्थिता सङ्ख्या अस्मदीया अत्रत्यपर्वक्रमबोधिका । अन्ते स्थिता तु पूर्वपक्षिग्रन्थपर्वसम्बन्धिनी ।

1 'तिरुनारायणपुरे (यादवाद्रौ) कुमारवरदाचार्या भगवद्विषयप्रबन्धं देशिकप्रणीतव्याख्यया सह स्वतातपादसन्निधावध्येतुमारभन्त । तदात्वे ब्रह्मतन्त्रस्वतन्त्रस्वामी तत्र नान्वितः' इति तृतीयब्रह्मतन्त्रस्वामिकृतगुरुपरम्पराग्रन्थे उच्यते । श्रीमहाचार्यकृतवैभवप्रकाशिकायां निगमपरिमलावतारकथनात् पूर्वं

ब्रह्मतन्त्रचतुराय योगिने ... ...
वेदमौलियुगळं ह्युपादिशत् ।

इति देशिकेन ब्रह्मतन्त्रस्वतन्त्रस्वामिने कृतः उभयवेदान्तोपदेश उच्यते । भगवद्विषयस्य षट्सहस्रीप्रभृतिकं यद् प्राचीनं व्याख्यानान्तरं तद् ब्रह्मतन्त्रस्वतन्त्रस्वामी देशिकाज्ञाग्राहेति वैभवप्रकाशिकायामुच्यते । यत्तु देशिककृतं निगमपरिमलाभिधानं व्याख्यानं तत् न देशिकात् अधिजगाम, अपि तु कुमारवरदाचार्यादिति गुरुपरम्परायामुच्यत इति नास्ति विरोधगन्धोऽपीति प्रागेवोक्तम् । इदं ज्ञातुमशक्तोऽव्युत्पन्नः वृथा बहु जल्पति । मूलग्रन्थस्य एकत्वेऽपि आचार्यशिखामणिनाऽनुगृहीतस्य

*

अभिनवस्य विपुलस्य गुरुमुखादेव ग्रहणमिच्छन् स्वामी प्रावण्याति-शयेन कुमारवरदाचार्यमेव तत्र गुरुत्वेन वव्रे । तदुपक्रमे च अध्येष्य-माणाभिनवात्यद्भुतव्याख्याननिर्मातारं देशिकं स्तोतुकामः स्वयमभिनवं तनियन्-पद्यं कृत्वा पितापुत्रयोरुभयोर्गुर्वोः सविधे विज्ञाप्य तदनुमत्या-ऽनुसन्दधे । इति वस्तुस्थितिः । अत्र को बाधः कथं वक्तुं शक्य इति संरम्भं विहाय पर्यालोच्यताम् । किं देशिकचरणारविन्दा-पचारोपचयैकफलेन बहुना वाग्विसर्गेण ।

अस्मदादीनां श्रीभाष्यश्रीमद्गीताभाष्यश्रीमद्रहस्यत्रयसारसम्बन्धि-गुरुपरम्परायां कुमारवरदाचार्यो नान्तर्भवति । भगवद्विषयसम्ब-न्धिन्यां तु तस्यां देशिकब्रह्मतन्त्रस्वतन्त्रस्वामिनोर्मध्ये स वर्तते । तस्मात् न केनापीदमपह्नोतुं शक्यं यत् कुमारसकाशादपि भगवद्विषयग्रन्थ-मधीत्य ब्रह्मतन्त्रस्वामी तस्य शिष्यो बभूवेति । 6—9

2 पुनरपि श्रीमद्वेदान्तदेशिकवैभवप्रकाशिकाग्रन्थदूषणे प्रवर्तते ।

सम्यक् श्रुत्वा वैभवं तस्य सूरेः
सत्कारार्थं पत्रिकां प्रीतियुक्तः ।
विद्यारण्यः प्रेषयामास यस्मै
त्रय्यन्तार्थं सन्ततं भावये तम् ॥ ४१ ॥

अव्युत्पन्नमूर्धाभिषिक्तत्वात् अत्र अन्वयक्रममजानन् प्रत्युत दोषमाह । महतीं वाक्यविन्यासचातुरीमत्र कविर्दर्शयति । तस्येति ततः पूर्वमुक्तं सर्वं विशेषं परामृशति । तादृशवैशिष्ट्यशालिनः सूरेः वैभवं सम्यक् श्रुत्वा सत्कारार्थं विद्यारण्यः प्रीतियुक्तः पत्रिकां प्रेषयामास । इति वाक्यसमाप्तिः । ततः 'सत्कारार्थं' इत्यादिकमावर्त्य 'यस्मै एवं सत्का-रार्थं विद्यारण्यः प्रीतियुक्तः पत्रिकां प्रेषयामास तं त्रय्यन्तार्थं भावये' इति वाक्यान्तरम् ।

'गुरुमुखमनधीत्य' इत्यस्मिन् तनियन्-पद्ये यच्छब्दो नास्ति । तच्छब्दः परं श्रूयते । तत्र न्यूनपदत्वं दोषः । यत्तदोर्नित्यसम्बन्धात् तल्लाभ इति न न्यूनपदत्वमिति चेत् तर्हि 'यो निश्चिकाय मनवै मुनिवाहनं तम्' इत्यत्र अधिकपदत्वं दोषः । स्वयं लभ्यस्य कण्ठतः प्रयोगानपेक्षणात् । कोऽभिसन्धिरिति न ज्ञायत इति चेत् कथं ज्ञायेत ? सावधानं श्रूयताम् । यच्छब्दमुपाददानाः कवयः तद्घटितवाक्यार्थं प्रागेव विदितं मन्यन्ते । तस्यानुवादद्योतकत्वात् । तमनुपादाय तु पूर्ववाक्यं घटयन्तः तदर्थमज्ञातज्ञाप्यं मन्यन्ते, आस्वादविशेषार्थम् । 'गुरुमुखमनधीत्य प्राह वेदानशेषान्' इत्यज्ञातमिव ज्ञापयित्वा अद्भुतरसं स्वयमनुभवन् श्रोतृनप्यनुभावयति । तदनन्तरं उत्तरार्धे तच्छब्दं घटयन् तद्बलेन यच्छब्दमध्याहृत्य 'य एवं गुरुमुखमनधीत्य अशेषान् वेदानाह तं विष्णुचित्तं नमामि' इत्यावर्त्य अन्वयं विवक्षितं ज्ञापयति । अत इह न परं न्यूनपदत्वदोषो नास्ति किन्तु यच्छब्दानुपादानं गुण एव भवति । अर्थविशेषप्रतीत्यौपयिकत्वात् । एवं प्रकृतेऽपि वाक्यभेदेनार्थविशेषं वक्तुमिच्छति प्राज्ञः कविः । मतान्तरस्थोऽपि यथाऽत्यन्तमावर्जितः स्यात् तथा विशिष्टवैभव आसीदिति पृथगयं वाक्यार्थोऽनुभाव्यतया इष्टः । अन्यथा हि 'तस्य' इत्यस्य स्थाने 'यस्य' इति प्रयुज्य एकवाक्यता सुकरेति सूक्ष्मेक्षिका कार्या । गुरुमुखमित्यत्र यच्छब्दमनुपादायैव वाक्यभेदं ज्ञापयति कविः । प्रकृते तु तमुपादायापि भिन्नविभक्तिकत्वं कृत्वा ज्ञापयतीति विशेषः । वाक्यार्थप्रतीतिप्रकारस्तु उभयत्र समानः । एतेन

विद्यारण्यो विविधं
वेङ्कटसूरेर्विशोध्य वैराग्यम् ।
यं विष्णोरवतारं
मेने सेवे तमागमान्तगुरुम् ॥ ४३ ॥

रङ्गपतिना सभायां
दृष्ट्वा व्याख्यानकौशलं सूरेः।
वेदान्तदेशिकत्वं
दत्तं यस्मै तमाश्रये नित्यम् ॥ ५३ ॥

इतीमावपि श्लोकौ व्याख्यातौ। आद्ये 'सूरेर्वैराग्यं विशोध्य (तं) विष्णोरवतारं मेने' इति पृथग्वाक्यम्। 'यमेवं मेने तं सेवे' इत्यन्यद्वाक्यम्। अन्त्ये, दत्तमित्यत्र वाक्यसमाप्तिः। 'यस्मै दत्तं तमाश्रये' इति वाक्यान्तरम्। एषां श्लोकानां विषये अव्युत्पन्नो लिखति— "प्रदर्शितेषु त्रिष्वपि स्थलेषु शोधनमत्यावश्यकमेवेति काव्यपाठिनो विद्यार्थिनोऽपि ननु विजानीयुः। श्लोकानां स्थितिः सर्वथाऽप्यन्यथयितव्या भवेत्। स्थितानां पदानामुद्वापं नवीनानां पदानामावापं च विना साङ्गत्यं नैव घटते। तथा सति श्लोकानां शरीरमेव सत्यं सुबहु विपर्यस्येत्।' इति। सर्वमिदं वाक्यतत्त्वानधिगमाधीनमहामोहविलसितम्। श्लोकत्रयेऽपि एकस्य यच्छब्दस्य स्थाने तच्छब्दकरणे मूढानामपि सुग्रहार्थः पाठो भविष्यति। इदमेकस्मिन् श्लोके विशदीकुर्मः।

रङ्गपतिना सभायां
दृष्ट्वा व्याख्यानकौशलं सूरेः।
वेदान्तदेशिकत्वं
दत्तं तस्मै तमाश्रये सततम् ॥

इति स्थिते सति अतिजडोऽपि न किञ्चन सङ्कटमनुभवेत्। परं तु 'तमाश्रये' इत्यस्य तच्छब्दस्यान्वयाय 'यस्मै दत्तं तं' इति कल्पनमावश्यकम्। अयं यच्छब्द इह कविना कण्ठत उक्त इति।

एवं अतिसुकरस्य तच्छब्दप्रयोगस्याकरणात् यच्छब्दवत एव वाक्यविन्यासस्य एवं त्रिःकरणाच्च कविरत्र न प्रमत्त इति, बुद्धिपूर्व-

मेव भावविशेषव्यञ्जनाय विलक्षणं निरवद्यं प्रौढं च विन्यासविशेष-माद्रियत इति च सुस्पष्टमवलोकयामः ।

"अधुना वयं... विपुलं निरूपयामो वैभवप्रकाशिकाग्रन्थस्य तस्य सर्वतोमुखमसामञ्जस्यम् । .... सद्वारकमद्वारकं वा परिहरन्तु ते मितमतीनामस्मादृशां मनःकालुष्यम् ।"

इत्यहङ्काराक्षराण्युद्गिरति । जडस्य मनःकालुष्यपरिहाराय यत् कर्त-व्यम्, तत्परैः क्रियमाणमेव वर्तते । न तु तत् कदाचिदपि निवर्त्स्यति । तथा प्रबलत्वात् । सज्जनाराधने

यो द्वेषो निगमान्तदेशिकमणौ यश्चास्य पादाम्बुजे
कृत्वा भक्तिमनुत्तमामधिगतप्रज्ञाधने सज्जने ।
सर्वं तं व्यवधूय सौम्यचरितं गृह्णेत जन्मान्तरं
भूयश्चेद् भविताऽऽप्तमुक्तिषु रसास्वादप्रमोदः पृथुः ॥
सर्वतन्त्रस्वतन्त्रश्रीवैरविप्लुष्टचेतसाम् ।
स्थिता सर्वेषु तन्त्रेषु स्थिरा व्युत्पत्तिरिक्तता ॥

इति यदुक्तवन्तः स्मः तद् दृढं बुद्धौ ध्रियताम् । 10—13

3 प्रीतेन रङ्गपतिना बहुमानपूर्वं
वेदान्तयुग्ममनिशं प्रतिपाद्य सम्यक् ।
अत्रैव सौम्य वस नित्यमितीरितो य-
स्तं वेदमौलिगुरुमन्वहमाश्रयामः ॥ ५० ॥

इत्यस्मिन्नपि श्लोके अव्युत्पन्नो दूषणचापलं करोति । 'प्रतिपाद्य प्रीतेन' इत्यन्वयं कृत्वा, 'देशिकनिष्ठेन हि भगवत्प्रीतिहेतुना प्रतिपादनेन भवितव्यम् । न भगवन्निष्ठेन अतो भगवन्निष्ठतया तदुक्तिरसङ्गते'ति चोदयति । तथाऽन्वये उभयणिजन्तमिदं रूपमिति ग्रहीतुमस्य योग्यता

इह जन्मनि दुर्लभा। देशिकः वेदान्तयुग्मं प्रतिपादयति। एकणिजन्तोऽयं प्रयोगः। रङ्गपतिः देशिकेन वेदान्तयुग्मं प्रतिपद्यति। णिजन्तणिजन्तोऽयं प्रयोगः। रूपं तु समानमेव। अस्मात् ल्यपि 'प्रतिपाद्य' इतीदमपि रूपं समानमेव। तथा च 'देशिकेन प्रयोज्यकर्त्रा वेदान्तयुग्मं प्रतिपाद्य प्रीतेन' इत्यर्थलाभात् न काचिदनुपपत्तिरिति स्वकीयानभिज्ञताप्रकाशनं विना नात्र अन्यत् किमपि कृतं भवति। 'मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा' इति रघुवंशश्लोके एवं समाहितं वैयाकरणैः। अयमेकः समाधानप्रकारः।

प्रतिपाद्येति एकणिजन्तमेव। देशिकनिष्ठमेव प्रतिपादनम्। अन्वयस्तु ईरितोऽभूदित्यत्र। प्रतिपाद्य ईरितोऽभूत्। केन? रङ्गपतिना। कथम्भूतेन? प्रीतेन। केन हेतुना प्रीतः सः? सम्यक्प्रतिपादनेनेत्यर्थाल्लभ्यते। न तु शब्दतः। 'सुभगां मालामुपहृत्य प्रसादं लेभे' इतिवत्। अत्र प्रसादहेतुत्वं मालोपहरणस्यार्थमेव न शाब्दम्। इति द्वितीयः।

प्रतिपाद्य वसेत्यन्वयः। न च प्रतिपादनवासयोरेककालत्वात् पूर्वकालतावाचिनो ल्यपोऽनुपपत्तिः। क्वचित्तस्य पूर्वकालतावाचित्वविरहात्। यथा मुखं व्यादाय स्वपितीति। इति तृतीयः।

चिरन्तने मुद्रणे 'प्रतिपादयानः' इति पाठः। तत्र वर्तमानतैवेति न सङ्कटं किञ्चित्। न च कथं प्रतिपादयान इति। प्रतिपादयमान इति हि भाव्यमिति वाच्यम्। 'आगमानुशासनस्यानित्यत्वेन 'आने मुक्' इति विहितस्य मुकोऽत्राकरणात्। आहुश्च वैयाकरणाः— "कथं 'अपि शाकं पचानस्य' इति। उच्यते। आगमानित्यत्वान्न मुगिति न्यासः" इति। चिरन्तनः काव्यालङ्कारसूत्रकारो वामनश्च —'कामयानशब्दः सिद्धोऽनादिश्चेत्' इति। सोऽयं चतुर्थः प्रकार इति।

'स्थानानि विष्णोः' (37) इत्यस्मिन् श्लोके 'तेषां हितार्थानवदत् तमीडे' इत्येव प्राचीनमुद्रणे पाठः । १४

4 'हस्तिगिरिवैभवं यो
गाथारूपार्थपञ्चकं रम्यम् ।
वेङ्कटनाथाचार्यो
व्यतनुत तमहं विभावये नित्यम् ॥ २६ ॥

इत्यस्मिन् श्लोके गाथारूपमिति व्यस्तपदेन भाव्यम् । तस्य च श्लोकोपक्रमेऽवस्थानं युक्तम् । अर्थपञ्चकवत् हस्तिगिरिमाहात्म्यमपि गाथारूपमेव खलु । अन्यथा प्रतिपत्तिं जनयन्नसौ शब्दविन्यासः समञ्जसो नैव ।' इति गम्भीरमिव लिखति ।

आजग्मुषस्तव गजोत्तमबृंहितेन
पादं परामृशुपोऽपि च का मनीषा ।

इति श्रीकूरनाथश्लोकं प्रति किं वक्ष्यति जड इति न जानीमः । किमत्र गजोत्तमबृंहितेन आगतो भगवान् अन्वस्य कस्यचित् पादं परामर्शेति विवक्षितम् ? गजोत्तमस्यैवेति चेत् कथं तल्लाभः ? समासमग्नो हि गजोत्तमः । स कथमन्यत्र गच्छेत् ? अत्रापि असमञ्जसत्वं वा घुष्यताम् । स्वकपोलताडनं वा क्रियताम् । वाक्यन्यायानभिज्ञो बत नियन्तुरभावेन दूरं विजृम्भते ।

अन्यदाश्चर्यमिह सर्वजनानुभाव्यं दृश्यते । "अर्थपञ्चकवत् हस्तिगिरिमाहात्म्यमपि गाथारूपमेव खलु ।" इति निश्शङ्कं लिखतो भ्रान्तिग्रन्थि किमिति वर्णयेम ? गाथागद्योभयमयः चम्पूरूपो वा नाटकप्रायो वा स ग्रन्थः सर्वविदितः सर्वैरनुसन्धीयमानो वर्तते । अत्रत्या गाथाः सङ्कलय्य हस्तिगिरिमाहात्म्यनाम्ना 'देशिकप्रबन्ध'नाम्नि देशिकानुगृहीतसर्वद्राविडगाथासङ्कलनात्मके ग्रन्थे अन्तर्भाविता इति

सत्यमेतत्। तावता किं देशिकानुगृहीतो हस्तिगिरिमाहात्म्यग्रन्थो गाथारूपो भवति? सर्वेषु रहस्यग्रन्थेषु स्थिताः सर्वा गाथाः तत्र सङ्कलिताः। किं तेन सर्वे रहस्यग्रन्था गाथारूपा वाच्याः। क इदानीं अन्यथा प्रतिपत्तिं लोकस्य जनयतीति सम्यक् परामृश्यताम्। एवंविधभ्रमप्रमादोपहतो जनः तमेव विषयमाश्रित्य महतां दूषणे संरभत इति नूनं कलिविभवविजृम्भितमाश्चर्यमेतत्।

अपरमतिमहान्तं विषयमाह—'दीपप्रकाशभगवद्विषयिण्या देशिकानुगृहीतायाः स्तुतेर्दीपप्रकाशस्तुतिरिति नाम पामरा एव जना व्यवहरन्ति। शरणागतिदीपिकेत्येव देशिकानुगृहीतं नाम। तदनभिज्ञेन केनचित् प्रणीतमिदं काव्यमिति सुनिश्चयम्।' इति। अत्र इमं पण्डितं तत्रापि उत्तमोत्तमं पृच्छामः— ननु देशिकानुगृहीतं नाम शरणागतिदीपिकेत्येवेति कथमत्रभवता ज्ञातम्? "शरणागतिदीपिकाख्यां स्तुतिम्' इति स्वयं देशिकः अन्ते वदति। अतो ज्ञातम्" इति चेत् किं तावदेव स वदति? 'दीपप्रकाशशरणागतिदीपिकाख्यां स्तुतिम्' इति हि तत्र श्रुतम्। तत्र शरणागतिदीपिकेत्येतद् विहाय दीपप्रकाशस्तुतिरिति व्यवहरन्तो यदि पामराः, दीपप्रकाशपदं विहाय शरणागतिदीपिकेति केवलं व्यवहरन् कथं पण्डितो भवितुमर्हति? एवं व्यवहारे न्यासतिलकादिवत् भगवदन्तरविषयताऽपि शङ्केत। दीपप्रकाशस्तुतिरिति व्यवहारे तु सा शङ्का नैवावकाशं लभत इति अस्यैव पण्डितव्यवहारार्हत्वं प्रतीयते।

अनसूयुभिरादरेण भाव्या परमार्थस्तुतिरन्वहं प्रपन्नैः।

इति स्तोत्रान्तरस्य देशिकेन परमार्थस्तुतिरिति नाम्नि स्पष्टमभिहितेऽपि वैभवप्रकाशिकायां

समरपुङ्गवसंस्तुतिमद्भुताम्। २९

इत्यन्यथाऽभिधानं दृश्यते। अत्र हि स्तुतीनां मिथो व्यावृत्त्यै स्तुत्यभग-

वद्रूपस्य विशेषतः प्रत्यायनं कविश्चिकीर्षतीति बुद्धिमतां न दुर्ग्रहम् । तथा प्रकृतेऽपि । अपि च शरणागतिदीपिकेति नाम्नि घटकं दीपिकापदमवदधानः कविः

दीपप्रकाशस्तुतिदीपभासा दूरीकृतो येन हृदन्धकारः । २८

इति दीपरूपणं करोतीति सूक्ष्मेक्षिकां कृत्वा रसातिशयेऽनुभवनीये अरासिक्यघुटिकायमानो महिषवृत्तिरेवं रूक्षं शब्दायत इति परमं शोकस्थानमेतत् ।

आत्रेयरामानुजदेशिकेन्द्रा-
दवाप्य वेदान्तयुगं विभुर्यः ।
मन्त्रं च गारुत्मतमाप तस्मात्
तमाश्रये वेङ्कटदेशिकेन्द्रम् ॥ १२ ॥

इत्यस्मिन् श्लोके द्वितीयपादे अवाप्येति व्यर्थमित्याह । हठादाकृष्टानां कतिपयपदानां रचयितारो महाकवीनां सूक्तिषु रसपारवश्येन अहमहमिकया आपततां पदानामर्थानां च विलक्षणव्यापारशालितां न प्रतिपत्तुं प्रभवन्तीति सहजमेतत् । तत्रैव तु दोषं वक्तुं प्रवृत्तान् कुमतीन् दृष्ट्वा न शक्यं परमशान्तेनापि अज्वलितहृदयेन भवितुम् ।

विद्यते गोषु सम्पन्नं विद्यते ब्राह्मणे दमः ।
विद्यते स्त्रीषु चापल्यं विद्यते ज्ञातितो भयम् ॥

इति वाल्मीकिः किमिति विद्यते पदं आवर्तयति ।

विद्यते गोषु सम्पन्नं ब्राह्मणेषु तथा दमः ।
तथैव स्त्रीषु चापल्यं ज्ञातितश्च भयं तथा ॥

इति वक्तुं किन्नु स न जानाति ।

एवमुक्त्वा हृषीकेशं गुडाकेशः परन्तपः ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥

इति भगवद्गीताश्लोके उक्त्वेति द्विर्दृश्यते ।

न यौत्स्ये चेति गोविन्दं ततस्तूष्णीं बभूव ह।

इति कवयितुं किमत्र कविर्नेष्टे ? प्रकृते च अभाण्येत्यस्य स्थाने अधीत्येति प्रयोगः किं दुष्करः। अतोऽत्रापि

उदेति सविता ताम्रस्ताम्र एवास्तमेति च

इत्यत्र आलङ्कारिकोक्तन्यायेन साभिसन्धिकमेव कविः शब्दार्थोभयावृत्तिं करोतीति स्थितम्। अत्र सर्वत्र कोऽभिप्राय इति तु नेदानीं वक्तुमिच्छामः।

अस्मिन् श्लोके द्वितीयपादान्ते 'विभुर्यः' इत्यत्र 'पुनर्यः' इति प्राचीनमुद्रणे पाठः। सोऽप्यत्र अत्यन्तमवधेयः।

इत्युक्तपक्षे नृपतेः समक्षं यः प्राक्षिपत्तं गुरुवर्यमीडे।

इति पूर्वोदाहृते श्लोके निरसनार्थे 'प्राक्षिपत्' इत्येतदसाधु, इत्याह। 'प्रक्षेपो नाम प्रवेशनमेव, न तु निरसनम्। प्रक्षेपोत्क्षेपाविति व्यवहारोऽवधीयताम्' इति तदुपपादयन्नाह। अत्रोच्यते। यदि अनेन व्यवहारेण प्रक्षेपः प्रवेशनमेव, तर्हि उत्क्षेपोऽपि कस्माच्चित् कस्यचित् निष्कासनमेव। तत्र कथं 'बाहूत्क्षेपं क्रन्दितुं च प्रवृत्ता' इति महाकविप्रयोगसाङ्गत्यम्। उत्क्षेपणादीनि पञ्च कर्माणीति कर्मविभागसामञ्जस्यं च ? ऊर्ध्वदेशसंयोगानुकूलो व्यापार उत्क्षेपणमिति च लक्षणमाहुः।

अथ प्रक्षिपतिमेव पश्येम। 'क्षिप्तप्रत्यर्थिदृष्टिः' इति केवलस्य क्षिपतेर्निरसनार्थे प्रयोगो दृश्यते। तत्र प्रोपसर्गयोगे कथं तस्यार्थस्यापायः। प्रक्षिपतेः प्रवेशने रूढत्वादिति चेत् तत्र किं प्रमाणम् ? न हि लोष्टं प्रक्षिपतीत्युक्ते परास्यतीत्यर्थं विना क्वापि प्रवेशयतीत्यर्थं केचन प्रतियन्ति। प्रक्षिप्ताः श्लोका इत्यत्र तत्प्रतीतिर्भवतीति चेत् श्लोकपदसममिव्याहारबलात् सेति स्पष्टमेतत्। अतः स्वभावतः प्रक्षिपतेः स्वस्थानात् प्रच्यावनमेवार्थः। तदेव निरसनमपीति न कोऽपि दोषः।

उक्तं च मीमांसकैः षष्ठतृतीये 'न देवताग्निशब्दक्रियम्' इत्यस्मिन्नधिकरणे – 'न हि पूर्वदेशविभागानुकूलव्यापाररूपप्रक्षेपमात्ररूपस्य होमस्याधारापेक्षाऽस्ति' इति ।

तदिदं वस्तुस्थितिकथनम् । यदि च प्रक्षेपः प्रवेशनमेव स्यात् तदाऽपि काऽनुपपत्तिः ? परपक्षं प्राक्षिपत् । कुत्र ? पराजये । इमे श्लोकाः प्रक्षिप्ता इत्युक्ते यथा यथार्हं ग्रन्थविशेषप्रतिपत्तिः तथा प्रकृते वादिपक्षः प्रक्षिप्त इत्युक्ते तदुचितमधिकरणमर्थतो लभ्यत इति ।

किञ्च अज्ञा अज्ञानात् असमञ्जसानि पदानि वाक्यानि च प्रयुज्य परिहास्या भवन्ति । प्राज्ञास्तु तादृशानीव तानि प्रयुज्य स्वकीयं प्रौढिविशेषं प्रकाशयन्ति । न च वाच्यतां भजन्ति । 'अप्राप्य मां निवर्तन्ते मृत्युसंसारवर्त्मनि' इति गीताश्लोके 'नितरां वर्तन्ते' इति भाषितम् । अस्मिन्नर्थे किं निवर्तन्त इति साधु । किमत्र कविरसमर्थः उत व्याख्याता ? 'तमुद्वहन्तं पथिभोजकन्याम्' इति कालिदासः । 'उद्वहन्तं नयन्तम्' इति मल्लिनाथः । किमयं श्लोकः अकालिदासीयः । अथ वा पथि पुनः विवाहान्तरं वृत्तमिति व्याख्यातव्यम् । 'लक्ष्म्या निमन्त्रयाञ्चक्रे तमनुच्छिष्टसम्पदा' इति स एव महाकविः । श्राद्धभोजनाय ब्राह्मणवरणं निमन्त्रणं प्रसिद्धम् । इह तु अभिषेकाय श्रीराघवस्य वरणं विवक्षितम् । इत्यलं अरोचकिने क्षीरान्नदानप्रयासेन उन्मत्ताय उपनिषदर्थोपदेशव्यसनेन च । इत्युक्तपक्षं नृपतेः समक्षं यः प्राक्षिपत्' इति अयत्नोपनतः क्षकारावृत्तिकृतोऽनुप्रास इह रम्यः ।

प्रथमश्लोके 'कविवादिशिरोरत्नम्' इति स्थितं यथावत् प्रतिपत्तुमक्षमोऽव्युत्पन्नः दूषयन् अन्ततः स्वस्य अनभिज्ञशिरोमणितां प्रकाश्य एतद्ग्रन्थदूषणप्रकरणमुपसंहरति । 'शिरोरत्नमिति श्रेष्ठ उच्यते । तत्र कविश्रेष्ठो देशिक इति युज्यते । वादिश्रेष्ठ इति तु कथम् ? काऽत्र अनुप-

पत्तिरिति चेत्, वादिमत्तेभकण्ठीरवो ह्ययम्। स स्वयं कथं वादी स्यात्? वादिशब्दः सर्वत्रापि दुर्वादिविवक्षयैव प्रयुज्यते।' इत्याह। अत्र बालशिक्षा कर्तव्या भवति। क्रियते। 'सञ्चारयन् जयति नः कविवादिसिंहः' इति चण्डमारुतश्लोकं पूर्वमुदाहार्ष्म। अत्र सिंहपदं किं श्रेष्ठवाचि उत विध्वंसकवाचि?

आद्ये कविश्रेष्ठत्वमिव वादिश्रेष्ठत्वमप्युक्तं भवति। अन्त्ये वादिश्रेष्ठत्वमिव कविश्रेष्ठत्वमपि नोक्तं स्यात्। एवं च अत्रभवता सर्वधिक्कारकारिणा लोकोत्तरपण्डितेन 'कवितार्किकसिंहः' इत्यस्यार्थोऽद्यावधि अनवगत इत्येतदिह प्रकाशीभवति। अस्यानर्थस्य मूलं वादिशब्देन दुर्वादिन एवोच्यन्त इति गाढतमो भ्रमः। यो वादं करोति स सर्वो वादी, पूर्वपक्षी वा सिद्धान्ती वा। तत्र विशेषविवक्षायां प्रतिपक्षावलम्बिनः प्रतिवादिन इत्युच्यन्ते। पक्षयोः सामीचीन्यासामीचीन्यपरामर्शेन सुवादिनो दुर्वादिन इति च। 'को वा चक्षुरुदञ्चयेत् ... वादेषु नः' इति वदन् देशिक आत्मनो वादित्वं ख्यापयति। श्रीमति सङ्कल्पसूर्योदये द्वितीयेऽङ्के "आर्य, श्रूयते किल प्रतिभटवादिनां प्रगल्भवादः" इति सेनापत्युक्तथनन्तरं शिष्येण यतीश्वरसरस्वती' इति श्लोके पठिते, ततः परं "भगवन्, अभङ्गुरस्वामिभक्तेरवसरोपपन्नं हनूमत इवेदमार्यस्य विकत्थनम्" इति राज्ञा उक्ते, गुरुः "... महाराज,

श्रुतिसिद्धान्तशूरस्य तद्विरुद्धान्निरुन्धतः।
वल्गितं वावदूकस्य कृतिनः किं न शोभते॥"

इति ब्रवीति। अत्र वावदूकः भगवद्रामानुजशिष्यः साक्षाद्देशिक इति स्थितम्। अन्येऽत्र प्रतिवादिन इति, प्रतिकथा इति, प्रतिभटवादिन इति च निर्दिश्यन्ते। तस्मादस्ति वादित्वं देशिकस्य। तत्र कविवादिसिंह इत्यत्र सिंहशब्दस्य श्रेष्ठार्थत्वे कविश्रेष्ठः वादिश्रेष्ठश्चेत्यर्थः। तत्र वादिश्रेष्ठत्वं "वादः प्रवदतामहम्" इत्युक्तप्रश-

स्तवादनिष्ठत्वात् । अयमेवार्थः 'कविवादिशिरोरत्नम्' इत्यत्राभिसंहितः । यदा तु सिंहशब्दस्य निवारकत्वादिरर्थः तदा कवीनां वादिनां च भञ्जक इत्युक्तं भवति । तत्र वादिशब्देन प्रतिभटवादिन इव कविशब्देनापि प्रतिभटकवय एवाभिधीयन्ते । तदिदं स्पष्टं 'कविकथकघटाकेसरी-वेङ्कटेशः' इति गरुडपञ्चाशत्सूक्तौ । न हि तत्र कवीनां केसरी श्रेष्ठः, कथकघटायाः केसरी क्षेप्ता, इति विवक्षा युज्यते । सकृत्प्रयुक्तः शब्दः सकृदेवार्थं गमयतीति न्यायेन अर्थद्वयाभिधानानुपपत्तेः । श्रीवैभव-प्रकाशिकायामेव 'श्रीरङ्गे शरदः शतम्' इति श्लोके (१५३) 'कविघटा-कण्ठीरवः' इति प्रयुक्तं पर्यालोचनीयम् ।

अपदिश्यैवमज्ञस्य प्रतिबोधनमञ्जसा ।
कवितार्किकसिंहेति विरुदव्याक्रिया कृता ॥

तदत्रापि मुष्टिभिः नभः कदर्थनमेवेत्यलम् ।

5 श्रीवेदान्तवैभवप्रकाशिका आचार्यभक्तिरसमयो ग्रन्थः । एकै-कस्मिन्नपि श्लोके स परिवहति । तत्र तत्र रसपरिपोषकारिणः विभावा-नुभावसञ्चारिभावाः शब्दार्थगता गुणालङ्काराश्च सहृदयैः सुमतिभि-रुपलब्धुं शक्याः ।

शुभनयनकपोलं शुभ्रयज्ञोपवीतं
कमलसदृशपाणिं कान्तबाहान्तरालम् ।
उचितपदनिविष्टानूर्ध्वपुण्ट्रान् दधानं
श्रुतिशिखरगुरुं तं सूरिवन्द्यं भजेऽहम् ॥ १५४ ॥

वेदान्तदेशिक विभो विनयोपपन्न
घण्टावतार करुणाकर शान्तिसिन्धो ।
श्रीवेङ्कटेशगुरुवर्य कवीशसिंहे-
त्येवं पठन् तरति संसृतिवारिराशिम् ॥ १५५ ॥

इति यः कथयितुं क्षमते तस्य योग्यता कीदृशीति परमार्थतो ये विद्वांसः त एवावधारयितुं प्रभवन्ति ।

अनादिकालसञ्चितपापराशिवशसमुन्मेषोऽपारो देशिकद्वेषः तत्स्तुतिपरेऽस्मिन्नत्तमकाव्ये अविद्यमानानपि दोषान् दर्शयन् महति गर्ते अपुनरावृत्तये निपाताय एनं सन्नाहयति ।

6 इयं वैभवप्रकाशिका एतत्कर्तुर्महाचार्यस्य शिष्येण 'वात्स्यमहार्यदास' नाम्ना भागवतोत्तमेन मणिप्रवालभाषया महता विस्तरेण विवृता । अयमत्र बहुभ्यो ग्रन्थान्तरेभ्यः श्लोकान् गाथाश्चोदाहरति । तेषु ग्रन्थान्तरेषु देशिकभक्ताग्रगण्यप्रतिवादिभयङ्करार्यकृता देशिकस्तुतिरूपा सप्ततिरत्नमालिकाऽप्येका । अत्रापि अस्य कुबुद्धेर्द्वेषो महान् । तेन एवंविधैः कुवादैः तामपि अर्वाचीनयत्किञ्चित्कृतां वदन्नस्ति । स्वकिरणमालापरिष्कृताम्बरतलं निरस्तनिखिलतमोनिकुरुम्बमेतमम्बरमणिं प्रति आतपतप्तः सर्वदरिद्रः सर्वात्मनाऽन्धः कश्चन यथा ब्रूयात् "नायं देवः सूर्यः । महानयमङ्गाररराशिः" इति तादृगिदं भवति ।

श्रीभाष्ये कतिपयान् दोषानभिधाय नायं श्रीमद्रामानुजकृतो ग्रन्थो भवितुमर्हति । सः अद्वैत्येव । तन्नाम्ना अल्पमतिनाऽर्वाचीनेन केनचिदयं ग्रन्थः कृतः, इति वदतः अस्य च पूर्वपक्षिणो नास्ति कश्चन विशेषः ।

7 भगवद्घण्टावतारः । श्रीरङ्गराजदिव्याज्ञालब्धवेदान्ताचार्यपदः । तद्दिव्यमहिषीप्रसादासादितसर्वतन्त्रस्वतन्त्रविरुदः । भगवद्रामानुजसिद्धान्तप्रतिष्ठापनाचार्यः । श्रीशठकोपदिव्यसूक्तिरसविदग्रेसरः । अद्यापि अस्मत्सिद्धान्ते परैराक्षिप्ते शरणीकरणीय एकः । एवंविधमाचार्यचूडामणिं प्रति येनकेनापि यथाकथमपि यत्किमपि पद्यं वा अन्यद्वा कृतं श्रीरामानुजीयस्य सर्वस्य परमादरास्पदं भवितुमर्हति । एवं सति

एतद्वैपरीत्येन तस्य, तद्ग्रन्थानां, तद्विषयतया अन्यकृतग्रन्थानां च दूषणैकपरत्वेन कालं नयतां असकृत् तत्त्वबोधनेऽपि आर्जवमनवलम्बमानानां प्रत्युत दौर्जन्यमेव अत्यूर्जितमाश्रित्य गर्जतां विषये वस्तुत इतिकर्तव्यताकुला वयं स्मः।

'न साम रक्षस्सु गुणाय कल्पते' इतीदं महर्षिवचनं स्वानुभवेन यथार्थं विदन्तः 'यथाऽयं पूर्वाचार्येषु ग्रन्थेषु च स्वपरविभागं कृत्वा परकीयत्वेनाभिमतान् दूषयति तथा तदीयत्वेन तदभिमतेषु किञ्चिद् ब्रूयाम। तेन कदाचित् प्रतिबुद्धः शाम्येत् ।' इति मत्वा सज्जनाराधने 'प्रतिप्रश्नान्' कांश्चन अकुर्म । तान् पुनः स्मारयन्तः तादृशमेकं विषयमिह प्रस्तुमः अत्यन्तमनिच्छया, कथमपि जातविवेकोऽयं पूर्वाचार्यग्रन्थदूषणव्यसनात् आत्यन्तिकीमुपरतिं भजतामित्याशया च ।

पिळ्ळैलोकाचार्यस्य तनिचरमनाम्नि रहस्यग्रन्थे व्रजपदार्थविवरणावसरे

> यथा— "स्वर्गसाधनभूते ज्योतिष्टोमे सप्तसु अहस्सु विहिते सति, तस्मिन् यागे अन्तर्भूतमग्निहोत्रं आप्रयाणं अहरहरनुष्ठेयं भवति।"

इत्यभिहितं दृश्यते। अत्यन्तमसङ्गतमेतत्। वैदिकप्रक्रियायां अल्पिष्ठपरिचयोऽपि जनः न कदाचिदेवं ब्रूयात् । यथा ज्योतिष्टोमः तथा आधानानन्तरकालात् प्रभृति अनुष्ठीयमानं अग्निहोत्रमपि स्वतन्त्रं कर्म। तस्य तदन्तर्भूतत्ववचनं परिहास्यम्। तत्रापरो विषयः अग्निहोत्रं यावज्जीवं प्रत्यहं सायम्प्रातरनुष्ठेयम। यदा पुनः यजमानः ज्योतिष्टोमाय दीक्षितो भवति तदा प्रभृति नित्यमपि तदग्निहोत्रं स नानुतिष्ठति। "दीक्षितो न जुहोति' इति निषेधात् । अवभृथानन्तरं तु उदवसानीयेष्टिं कृत्वा ततः परं पुनरनुतिष्ठति। 'एतया पुनराधेयसम्मितया इष्ट्या

इष्ट्वाऽग्निहोत्रं जुहोति' इति श्रवणात्।" तत्रापि केनापि कारणेन पञ्चमे सप्तमे वा दिने अनुष्ठातुमशक्यतया अवभृथस्य दिनान्तरविलम्बे सति तावन्तं कालं अग्निहोत्रं नानुष्ठेयम्। एवं दीक्षाकालात् प्रभृति अवभृथादिकं यावत् ग्रामं गच्छन् तृणं स्पृशतीत्यनयाऽपि रीत्या ज्योतिष्टोमाग्निहोत्रयोः सम्बन्धविरहात् सकृत्कर्तव्यप्रपत्त्यन्तर्भूतस्य महाविश्वासस्य यावत्प्राप्ति अनुवर्तनीयत्वे ज्योतिष्टोमान्तर्गताग्निहोत्रनिदर्शनमिदं सर्वथा न युज्यते।

अत्र का स्थितिरिति महामेधाविनं पृच्छामः। किमयं रहस्यग्रन्थोऽर्वाचीनेन केनापि कृतः, न लोकाचार्येण। एवमितरेऽपि रहस्यग्रन्थाः। ततश्च तेन्कलासम्प्रदायः यतीन्द्रप्रवणपिल्लैलोकयतिकालादनन्तरमुपक्रान्तः। प्राचीनो लोकाचार्यः वडकलासम्प्रदायस्थ एवेत्यभ्युपगम्यते? अथ वा आचार्यो भ्रान्त एवेत्युच्यते? अथ वा

अत्र ब्रूमः सदुक्तौ न वयमिह मुधा बाधितुं किञ्चिदर्हाः

इति देशिकोपदिष्टा सरणिरेव शरणमित्याश्रीयते? अत्र कञ्चन निष्कर्षं कृत्वा ततः परं परग्रन्थदूषणे प्रवृत्तिः क्रियमाणा शोभेतेति। श्रीकृष्णाय नमः। १४-१६

8 कुमारवरदाचार्यसन्निधौ निगमपरिमलमध्येतुं प्रवृत्तो ब्रह्मतन्त्रस्वतन्त्रस्वामी तत्प्रणयनेन देशिककृतं महोपकारं स्मरन् तदवसरोचितविशेषणघटनेन तद्विषयं पद्यान्तरं निर्माय आचार्यानुमत्याऽनुसन्दधे इत्युच्यते। अत्र

यद्येष यतिर्योग्यः स्यात् यदि च स्वाचार्यभक्तिभूमभूषितश्च
स्यात् तर्हि तत्प्रणीतं श्रीमान्वेङ्कटपद्यमवधीर्य पद्यमन्यत्
प्रणेतुं न मनसाऽपि विचिन्तयेत्।

इत्यूहस्य चोद्यस्य वा का प्रसक्तिः? 'यदि रामानुजो योग्यः स्यात्, यदि

च परमाचार्ययामुनेयभक्तिभूमभरितश्च स्यात् तर्हि तस्मिन् श्रीभाष्यं स्वयमकृतवति कथं तमतिक्रामन् ततोऽपि पण्डिततरमात्मानं मन्यमानः श्रीभाष्यं कर्तुं मनसाऽपि विचिन्तयेत् ।' इति पृच्छन्तं प्रति किमुत्तरम् ?

शठकोपगाथासहस्रोपक्रमे चतस्रो द्राविडगाथाः तनियन्-रूपेणानुसन्धीयन्ते । तत्र चरमे द्वे भट्टारककृततया प्रथेते । कथं भट्टारकः योग्यः भागवतोत्तमश्च सन् पूर्वगाथा अवधीर्य स्वयं गाथान्तरकरणे प्रावर्तत ? कुमारवरदाचार्यान्तेवासी प्रतिवादिभयङ्करार्यः कथं स्वाचार्यमुपेक्ष्य देशिकं सप्ततिरत्नमालिकया स्तौति स्म ?

बत युक्तेर्बालिशभाषितस्य च विशेषो नावगम्यते ।

भक्तिप्रेरितः पद्यान्तरकरणे प्रावर्तत । तत्र यद् विशेषणं प्रयुक्तं तदनुसारेण तस्याभिप्रायः कल्प्यते । अत्र इदं कुतो नोक्तम्, तत् कुतो नोक्तमिति प्रश्नस्य कोऽवकाशः ? वरवरमुनेर्भगवद्विषयग्रन्थप्रवचनवैलक्षण्यदर्शनजनितपरमानन्देन श्रीरङ्गनाथेन श्रीशैलेशपद्यं पठितमिति कल्पयद्भिरपि भगवद्विषयप्रस्तावस्तत्र कुतो न कृत इति चोद्य परिहर्तव्यमिति कथं न गृह्यते । १७

9 सर्वदिव्यप्रबन्धसाधारण्यस्याभिप्रेतत्वात् पात्रपद्ये विशिष्य कश्चिन्न निर्दिष्ट इति तत्त्वम् । १८

10 विभवः शुक्ले वेति प्रधानतमदेशिकावतारवर्षनिर्णय एव दुष्करे सति पद्यविशेषस्य निष्कृष्य प्रादुर्भावकालनिर्देशः किमर्थ इति पृच्छति । तस्य अस्य च कः सम्बन्धः ? कैश्चित् अथवा भूयिष्ठैः विभव इति निर्दिष्टे अन्यैः कैश्चित् शुक्ल इत्युक्तत्वात् निर्णायकसामग्र्याः अद्याप्यनधिगमाच्च तत्रालपः संशयः कामं भवतु । कुमारवरदाचार्यानुग्रहलब्धसर्वयोग्यताकस्य प्रतिवादिभयङ्करार्यस्य वरवरमुनिसम्बन्धसृष्टिप्रवणैः तदवतारकालः षष्ट्या वर्षैर्डोलायमानः कृतः । स संशयो

दुःपरिहरः पूर्वपक्षिण उभयसम्प्रदायभ्रष्टतायां पर्यवस्यन् महतोऽनर्थस्य हेतुर्भवति । विभवः तदनन्तरः शुक्लो वेति देशिकावतारवर्षानिर्णयेन कस्य का हानिः ? दिव्यसूरीणां कालं गुरुपरम्परासु निर्दिष्टं न कश्चिदिदानीं प्रत्येति। अर्वाचीनमेव कालं परीक्षकाः कल्पयन्ति। तेन का हानिरस्माकम्। न हि तदीयं वैभवं कालायत्तम्।

यत्तु पाञ्चपद्यप्रादुर्भावकालस्य तिथिवारादिविशेषपूर्वकनिर्देशत एव तज्जन्मतत्त्वं सुगममिति तन्न तथा । तदसहमानेन यत् सर्वदा तदेकध्यानेन, कथं कथं तद्दृष्यमिति चिन्तापरेण, कदाचिज्जुगुप्सया ग्लानिं, कदाचित् क्रोधेन ज्वलनं, कदाचित् द्वेषेण गर्हाप्रावण्यं, अविरतं आतुरभावं च चित्ते भजता भूयते तेन स्पष्टमेव देशिकपाञ्चपद्यवैभवं कंसेनेव भगवन्माहात्म्यं अपारं ख्याप्यते।

इदं चात्र वक्तव्यम्। यतीन्द्रप्रवणप्रभावनाभिधे ग्रन्थे वरवरमुनिकृतस्य भगवद्विषयप्रवचनस्य उपसंहारकालः तन्मुखेन श्रीशैलेशपद्यप्रादुर्भावकालश्च वर्षमासदिनतिथिवारनक्षत्रादिसर्वविशेषवर्णनपुरस्सरं निर्दिष्टः । अयमनुकारोऽलं प्राक्तनस्य रामानुजदयापात्रपद्यस्य प्रादुर्भावकालो विशिष्य निर्धारितः सर्वविदित आसीदित्येतन्निरूपयितुमिति।

'यथा श्रीमान् वेङ्कटपद्ये प्रादुर्भूते सति ततः पूर्वमनुसंहितं ब्रह्मतन्त्रस्वतन्त्रस्वामिकृतं

नमः पदमिदं भूयात् तस्मै वेङ्कटसूरये ।
यद्वागमृतसेकेन सञ्जीवितमिदं जगत् ॥

इति पद्यमनुसन्धानात्प्रच्युतं तिरोहितमासीत्। तथा श्रीमान् वेङ्कटपद्यमपि तिरोहितमभविष्यत् यदि देशिकजीवनकाल एव रामानुजदयापात्रपद्यं प्रादुर्भूतमभविष्यत्।' इति तर्कविद्याकुशल इवोर्जित-

माचष्टे । यस्मै यस्मै कार्याय 'नमः पदमिदं भूयात्' इति-पद्यस्योत्पत्तिः तस्मै तस्मै कृत्स्नाय कार्याय श्रीमान्वेङ्कटपद्यमुत्पन्नमिति सर्वत्र देशिकादिसर्वसम्प्रतिपत्त्या तत्स्थानापन्नेनानेन तस्य निवृत्तिर्युक्ता । रामानुजदयापात्रपद्यं तु उत्पद्यमानं दिव्यप्रबन्धसेत्रनविषयतयैवोत्पन्नमिति कथं पूर्ववदनेन तस्य आत्यन्तिकी निवृत्तिर्भवेदिति विविच्य ग्रहणे विवेकिनां कः क्लेशोऽस्ति ? २१

11 तनियन्-पद्यं एकैकस्य आचार्यस्य एकैकमेवेति निर्निबन्धनं नियमं परिकल्पयन् असाधारणं तनियन्-पद्यं साधारणानि स्तुतिपद्यानीतराणीति अश्रुतपूर्वं विभागं कञ्चन कल्पयन् किमप्याह । तत्तद्दिव्यप्रबन्धोपक्रमे अनुसन्धीयमानानां सर्वेषामेव श्लोकानां गाथानां च अविशेषेण तनियन्-व्यवहारोऽस्ति । 'नालायिर-तनियन्' इति नाम्ना पृथगपि ते सङ्कलिताः सन्ति । अनध्ययनकाले आनुपूर्व्या अनुसन्धीयन्ते च । तदास्ताम् । गोदादेवीकृतस्य 'तिरुप्पावै-प्रबन्धस्योपक्रमे नीलातुङ्गेति संस्कृतश्लोकः तत उपरि द्राविडगाथाद्वयं चानुसन्धीयते । तया देव्या रचितं यत्प्रबन्धान्तरं नाच्चियार्. तिरुमोळि' इति प्रसिद्धं तदुपक्रमे अन्या द्राविडगाथा पठ्यते । इयं गाथा तनियन् न वा ? आद्ये गोदाया अनेकतनियन्-पद्यवत्त्वं सिद्धम । अन्त्ये किं प्रमाणम् ? न किञ्चिदित्येव वाच्यम् तनियन् इति हि संस्कृतं गाथारूपं वा तत्पद्यमुच्यते । यत् अधीयमानग्रन्थानन्तर्गतं ग्रन्थकारस्य उपदेष्टुर्वा स्तुतिरूपं भवति । तदेकस्य वा अनेकस्य वा तुल्यं लक्षणमिति नास्ति विशेषः । एवं अन्येषामपि बहूनां दिव्यसूरीणां तत्तत्प्रबन्धमात्रव्यवस्थिता नानातनियन् गाथाः सन्ति । तस्मादेकस्या व्यक्तेः एकमेव तनियन्-पद्यमिति नियमो नास्ति । तेन श्रीभाष्यादिकालक्षेपोपक्रमोपसंहारयोः श्रीमान् वेङ्कटः, श्रीमद्रहस्यत्रयसारोपक्रमोपसंहारयोः तेन सह 'शीरोन्रुतूप्पुल्' इति गाथा च, स्तोत्रपाठानामुपक्रमे श्रीमान् वेङ्कटः, उपसं-

हारे कवितार्किकसिंहाय श्लोकः, भगवद्विषयकालक्षेपोपक्रमोपसंहारयोः श्रीमान् वेङ्कटेन सह पाल्लपद्यम् लक्ष्मीनाथेत्यादिश्लोकचतुष्टयं च, दिव्यप्रबन्धपारायणोपक्रमोपसंहारयोः पाल्लपद्यमन्यच्च, इत्येवं व्यवस्थया देशिकस्य बहुतनियन्-पद्यानुसन्धानं क्रियमाणं सुशोभनमिति वेदितव्यम् । यद्यपि अहोबिलसन्निधौ वा मुनित्रयशास्त्रान्तरे वा कश्चन भेदो भवेत् तथापि अस्मिन् वा ईदृशे वा अनुसन्धानक्रमे दूषकस्य दूषणपदं न किमप्यस्ति।

श्रीभाष्यादिसेवावसरे स्वाचार्यादिभगवत्पर्यन्ततनियन्-पद्येषु पठितेषु पुनः उपकारविशेषस्मरणेन देशिकादीनां पद्यानि पठ्यन्ते। तत्र देशिकस्य श्रीमान्वेङ्कटपद्यमेव । भाष्यकारव्यासयोः श्रुतप्रकाशिकाचार्यकृते पद्ये । इयं सर्वा व्यवस्था श्रीदेशिककालात्प्रभृति अविच्छिन्नया परम्परया अस्मदवधि आगतेति निस्सन्दिग्धं प्रतीयते। तत्र यथा शीरोन्नतूत्पुल्, कवितार्किकसिंहाय, इति पद्यान्तरपाठः, न ह्यनयोर्विषये अन्यानुकारशङ्काऽस्ति, तथैव रामानुजदयापात्रपद्यपाठोऽपि तदा प्रभृति व्यवस्थितोऽनुवर्तत इति प्रामाणिकाः प्रतीयुः। २२

12 पूर्वपक्षी लिखति—'प्रकृतपाल्लपद्यविवादो यत्र यत्र दिव्यदेशेषु ('दिव्यदेशे' इति युक्तम्) जातस्तत्र तत्र तेन्कलाचार्या एव नीतिस्थलेष्वभियोगपत्रं प्रापय्य कलहास्पदम् अस्मदीयध्यानविरोधि च नवीनं कृत्यमिदं प्रतिरोद्धव्यमित्याचुक्रुशुः।' इति । पाकिस्थानिन एव सर्वदा सर्वमाक्रोशं कुर्वन्तीति प्रत्यक्षमिदानीमीक्षामहे। वाचामगोचरं सर्वमन्याय्यं कुर्वन्ति । कुर्वन्त एव 'अहो बत अन्याय्यं पीड्यामहे। अस्मान् अभावं नेतुं भारतीयाः सन्नह्यन्ति, इति गगनस्पृशं दिगन्तप्रतिध्वानिनं भूकम्पकारिणं आक्रोशं कुर्वन्ति। एतेन सात्त्विकता प्रतिपक्षस्य सिद्ध्यति । न आक्रोष्टृपक्षस्य न्याय्यता ।

आलयेषु पूर्वपक्षिप्रभृतिभिः क्रियमाणं ध्यानमिदमिति सर्वविदितमेव 'येनापन्नपते साधुरसाधुस्तेन तुष्यति।'

'स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः ।
अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥'

इति नीत्या सर्वानपि भगवदवतारान् प्रति प्रार्थयितारो ह्यमृतान्धस एव न परे" इति च लिखति । अत्र न कस्यचिद् विप्रतिपत्तिः । किन्तु को रावण इति निर्णेतव्यम् । देव्या रामतुल्यं वैभवं असोढ्वा सामिनिवेशं आत्मतुल्यं जीवविशेषभावं य इच्छति, यः साधुजनान् बाधते, यो यज्ञानुष्ठानं निरुन्धे, यः कपटवेषं धारयति, यो भगवत्प्रपदनं द्वेष्टि स हि रावणः । किमतःपरमपि विवरणीयम् । 'किन्न चित्रमत्र चैद्यरावणानुसारिणाम् ।' इति चिरन्तनी पताका स्थितैव ।

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥

इति दैवप्रकृतीनां

दम्भो दर्पोऽतिमानश्च क्रोधः पारुष्यमेव च ।
अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥

इत्यन्येषां च विभज्य लक्षणं साक्षाद्भगवता उक्तम् । किं वृथा लोकवञ्चनोद्यमेन ।

पौराणिके श्रीमुष्णक्षेत्रे अभिनवं श्रीशैलेशपद्यपाठमारभ्य साधूनुपद्रुत्य कथञ्चित् तदनुमतिं लेभिरे । क्षेत्रान्तरेष्विव चिरन्तनं पात्रपद्यान्तरपाठं निरोद्धुं नाशक्नुवन् । क्षेत्रान्तरेषु वडकलाः देशस्य अराजकप्रायतया बन्धनताडनादिभिरपि घोरकर्मभिः परैरतिमात्रं पीडिताः सात्त्विकतया भीरुतया च मध्ये कञ्चन कालं तूष्णीं स्थिताः । पश्चात् राज्ये सुप्रतिष्ठिते व्यवहारपद्धतौ च विश्वासदायिन्यां जातायां पुनः प्राचीनपद्यपाठे प्रवृत्ताः मध्ये पाठविच्छेदेन व्यवहारेषु दुर्बलपक्षा अभवन्निति प्रतीमः । विस्तरं परस्तात् करिष्यामः ।

तिरुचिरापल्ली-डिस्ट्रिक्ट्-मुन्सीप्-अधिकरणे श्रीरङ्गदेवाल-यार्चकप्रणामसम्बन्धिनं व्यवहारमधिकृत्य 10-1-1950 दिने दत्ते निर्णये १२०तमं पर्व संस्कृतेऽनूद्यमानमेवं भवति—

'11-1-1930 दिने देवालये किमपि वृत्तम्। धर्मपरिपालन-समितेः शासनादिदं वयं जानीमः यत् तस्मिन् दिने श्रीकस्तूरिरङ्ग-अय्यङ्गार्, आर्. श्रीनिवास अय्यर्, स्थलस्थधर्मकर्ता उत्तमनम्बि-श्च 'वेदविज्ञापन' कर्मणि सन्निहिता अभवन्। तद् वैकुण्ठैका-दशीदिनं, यत्र श्रीरङ्गदेवालये महता समारोहेण प्रतिवर्षमुत्सवः प्रवर्तते। कस्तूरिरङ्ग अय्यङ्गार् तस्मिन् दिने शासनमेकमकरोत्— वेदविज्ञापनकर्मणि अर्चकैः एकाधिकः प्रणामो न कार्य इति। अर्चका इमामात्मनोऽवमाननां मेनिरे, निराचक्रुश्च। इदमत्र स्मर्तव्यं यत् ते ततः सप्ताहात् पूर्वमेव व्यवहारं प्रवर्तितवन्तः, धर्मकर्तृप्रतिरोधप्रार्थनं च तदीयं निर्णेतव्यावस्थायां वर्तते। अर्चकानां निर्वाहकधर्मकर्तुश्च मध्ये वाक्कलहो वृत्तः श्रीनिवास अय्यर्-समक्षम्। ततःपरं वडकला-धर्मकर्ता श्री के. वि. रङ्ग-स्वामि अय्यङ्गार् सङ्घर्षमाकर्ण्य सत्वरं देवालयमागच्छत्। तदाग-मनवार्ताश्रवणानुपदं यत्र 'वेदविज्ञापनकर्म' प्राचलत् तस्मान्तः-प्राकारस्य कवाटं पिहितमभवत्। अतः सः अगत्या बहिरेवा-वतस्थे। तदात्वे च अन्तः सकृदेव प्रणन्तुं अर्चका निर्बद्धा अभवन्। अथापि निर्वाहकधर्मकर्ता न यत्र साफल्यं लेभे, यतः अर्चकाः तस्य अवमाननस्य असहने तथा दृढसङ्कल्पा अभवन्। तस्मिन् काले प्रतिवादिन उत्तरमपि अधिकरणे न समर्पितमा-सीत्। नूनं तत्समर्पणात् पूर्वमेव सकृत्प्रणामानुष्ठानं आलये प्रतिष्ठितं कर्तुमैच्छत् निर्वाहकधर्मकर्ता। इदं मे भाति यत् श्री

श्रीनिवास अय्यर् अवैष्णवोऽपि सन्, अस्मिन् वृत्ते भागितां प्राप्य तेन्कलापक्षपातित्वं प्रादर्शयदिति। अस्मिन् वृत्ते निवेदिते धर्मपरिपालनसमितिः कस्तूरिरङ्ग अय्यङ्गार्-अमुं उपालभत। अवदच्च तस्मिन् महति देवालये निर्वाहकधर्मकर्तेत्येतादृशं उन्नतं महच्च स्थानमधिष्ठातुमनर्हः स इति।

अस्मिन्नपि काले एवं धीरं अन्याय्यं निर्बन्धं कर्तुं प्रवर्तमानाः तेन्कलाआम्रहिणः समीचीनराज्यशासनरहिते द्विशतकेभ्यः प्राक्तने काले किं किं न कृतवन्तः स्युरिति सुधियश्चिन्तयितुमर्हन्ति।

13 कण्ठीरवनरसिंहराजवोडयार्-शासनेन सत्यापितमेतत् यत् पूर्वपक्षिणा प्रवर्तितः रामानुजदयापात्रपद्यस्य बृहत्परकालस्वामिकृतत्ववादः केवलं मिथ्यावाद इति। ये केऽपि इतः परं न मनागपि कलुषमतयो भविष्यन्तीति निश्चितमेतत्। पूर्वपक्षी तु सप्तशः क्षालितलज्जाभीतिसङ्कोचत्वात् सम्प्रति मध्यन्दिने विस्तृते वियति प्रस्फुरन्तं सहस्रकिरणं 'अयं चन्द्र एव' इति धीरं प्रतिज्ञातुं धृष्णुवन् अत्र अन्यथासिद्धिं स्वस्वभावमनतिक्रम्य कल्पयितुमीहते। शासने

"यदुगिरिक्षेत्रे तिरुनारायणसन्निधौ तथा इतरसन्निधिष्वपि प्रबन्धानुसन्धानसमये राजवोडयप्रभोरारभ्य अस्मत्पितृपादादिनपर्यन्तं 'रामानुजदयापात्रं' इति तनियन् श्लोकः अनुसन्धानेन यथाऽनुवृत्तः"

इति निर्णयदातुर्महाराजस्य कालात् चिरात् पूर्वमेव पात्रपद्यस्य अनुसंहितत्वमुच्यते। तेन पूर्वपक्षिवादस्य शिरसि कुठारः पातितो भवति। अस्मादात्मानं रक्षितुमिच्छन् स्वायोग्यत्वे सर्वलोकसाक्षिके स्थिते राज्ञि तद्गुरौ च तत्कल्पयति। यदि शिष्यभूतो राजा स्ववचनानुसारेण न्याय्यमन्याय्यं वा सर्वं करिष्यतीति दृढो विश्वासः पात्रपद्यविषये महा-

नाग्रहश्च परकालस्वामिन आसीत; राजा च तथा विधेयः तर्हि पाद्यपाद्यान्तरपठनेन अत्यन्तप्रतिरुद्धेन भाव्यमिति अतिमूढोऽपीदं जानीयात्। स्वयमुदीयमानं इममाक्षेपं समाधातुं प्रवृत्तः, "परकालस्वामी श्रीशैलेशपद्यपाठं सर्वथा निरोद्धव्यमवदिष्यच्चेत् राजा तथैवाकरिष्यत्। अचातुर्यात्तु स स्वामी तन्निकटे तथा नावोच'दिति निर्लज्जं वदति। स्वयमभिनवं पद्यं कृत्वा सर्वत्र तत्प्रचारे, देशिकार्चाप्रतिष्ठापने च तीव्रोद्यमकारितया, काञ्चीपुरीमागत्य तत्रापि स्वाभिमतकरणाय तातार्यवंश्यान् निर्बध्य तेषु तदकुर्वत्सु शापोदकं दत्त्वा प्रतिनिवृत्ततया च यः परकालस्वामी वर्ण्यते स वस्तुतः यदि तथा अभिनिविष्टो व्यग्रश्च बभूव तर्हि सर्वाधिकारशालिनि महाराजे परमविधेये सति कथं तन्निरोधं कर्तुं नादिशेत्। किं तत्र अचातुर्यं नाम? राजा वा तथा आचार्यभक्तिभरितः सर्वस्वतन्त्रश्च भवन् कथं अनादिष्टोऽपि स्वयं स्वाचार्याभिमतपद्यपाठं विना पद्यान्तरं न पठनीयमिति नादिशेत्। इदं हि मुखमस्तीति भाषणम्। 'कस्त्वं बाल' श्लोकपाठोऽप्यत्रैव सुसङ्गतः।

1 'शीरोन्नुतूप्पुल्' तनियन् गाथायाः पिल्लैलोकार्यकृतत्वं,
2 सप्ततिरत्नमालिकायाः प्रतिवादिभयङ्करार्यकृतत्वं,
3 श्रीवेदान्ताचार्यवैभवप्रकाशिकायाः दोड्डयाचार्यकृतत्वं,

इत्यादिमिहिरस्य मयूखमालित्वमिव सुप्रसिद्धं अनपलप्य, प्रमाणलेशेनापि रहिताः वास्त्याहोबिलाचार्यचन्द्रगिरिवेङ्कटाचार्यादिकृतव्याख्यानग्रन्थानां तत्तत्कालप्रादुर्भूतत्वमनपह्नुत्य, आपाततोऽप्यसम्भाव्याः मिथ्याकल्पनाः अप्रकल्प्य च स्वाभिमतसाधनाय एकमप्यक्षरं लेखितुं न शक्यत इतीदं जानन् पूर्वपक्षी, यदि परमार्थतो हृदयं नाम किञ्चिदन्तर्वर्तेत तर्हि, नूनं ग्रीष्मे कुठारच्छिन्नपतितद्रुमशोषं शुष्येत्। अहृदयः पुनः सः।

रावणवधानन्तरं हनूमन्तमादिश्य सर्वां लङ्कां निरवशेषां भस्मसात्कर्तुं शक्तोऽपि रामः अचातुर्यात् तथाऽकृत्वा सीताप्रतिलम्भमात्रसन्तुष्टो निवृत्त इति किल रावणज्ञातयः केचिदवोचन् । तादृगिदं भवति । ३०

14 "बृहत्परकालयतिवरः तेन्कलाचार्यस्यैव सन्निधौ भगवद्विषयग्रन्थमध्येष्ट ।" इति निरनुक्रोशं लिखति । किं पुनस्तत्र प्रमाणम् ? तदाह निपुणः "स तावत् स्वामी स्वकीयस्य शठकोपगाथासहस्रव्याख्यानस्या रम्भे "व्याख्यानं शठकोपसूरिवचसां यद् दाक्षिणात्यैः कृतं ... स्वारस्यं परिगृह्य तद्गतम्" इति वक्ति । तत्स्वारस्यावगमः कथमस्य सम्पन्न इति चेत् दाक्षिणात्याचार्यमुखादेवेति वक्तव्यम् । ननु पण्डिताग्रेसरः स स्वामी स्वयं ग्रन्थमवलोक्य तद्गतं स्वारस्यमस्वारस्यं वा ज्ञास्यति । किं तस्य दाक्षिणात्याचार्योपसर्पणेनेति चेन्न 'पत्रेक्षितो वा व्यर्थः स्यात्' इति शास्त्रार्थं न खलु न विदन्ति ते यतिवराः । शास्त्रवश्यास्ते कथं तदुल्लङ्घ्य पत्रे ग्रन्थमीक्षेरन्निति ।

सम्यक् तावदुक्तमेतत् । अतिनिपुणमुक्तम् । तदीयमिदं पद्यमेव तत्र प्रमाणं, नान्यदिति पर्यवसितम् । साधु । तत इदं चिन्तनीयम् । "श्रीभाष्यादिविरुद्धमेव तदिति ख्यातं यतः प्रायशः" इति यत् तत्र द्वितीयपादे उच्यते तदपि किं तस्यैव तेन्कलाचार्यस्य मुखादवगतवान्, उत स्वयमेव निर्धारयामास । द्वितीये तत् निर्धारणं किं तमाचार्यं प्रति उपसदनात् पूर्वं उत पश्चात् ? आद्ये व्याख्यानस्य श्रीभाष्यादिविरुद्धत्वं शिष्याचार्यपरम्परयाऽभ्युपगतमिति स्यात् । द्वितीये पत्रेक्षितो वा व्यर्थः स्यादिति शास्त्रमतिलङ्घ्य एव स इति स्यात् । तृतीये आचार्यानभिमतमर्थं निश्चिन्वन् तस्मिन् कृतापचारः स्यात् । शास्त्रवश्यस्य कथमिदं युज्यते ।

भगवद्विषयव्याख्याने कस्मिंश्चित् यथासम्प्रदायं गुरुमुखादधीते पुनः कुतूहलाद् व्याख्यानान्तरपरिचयकारिणः सर्वे किं एकैकमपि

व्याख्यान्तरं गुरुमुखादेव गृह्णन्ति ? रङ्गरामानुजस्वामी साक्षात्स्वामी वा किं दाक्षिणात्यस्य कस्यचिन्मुखादेव व्याख्यानान्तरमधिजगे ? दाक्षिणात्या वा किमेतद्व्याख्यानपरिचयकाङ्क्षिणः पत्रेक्षितो वा व्यर्थः स्यादिति बिभ्यतः वडकलाचार्यमुपसद्य एतदीयतनियन्-पद्यानुसन्धान-पूर्वकमधीयते ? षट्सहस्र्यां स्थितायामपि विस्तृतत्वात् विविधविशेषार्थप्रतिपादकत्वाच्च निगमपरिमलस्य गुरुमुखाद् गृहणमकुरुतां वरदाचार्यब्रह्मतन्त्रस्वामिनौ ।

'दाक्षिणात्यव्याख्यानस्य भूयिष्ठं श्रीभाष्यादिविरुद्धत्वात् तद्दर्शिनो जनाः सिद्धान्तार्थान् अन्यथा गृहीत्वा मा स्म विनश्यन्निति हेतोः तथाविरुद्धानंशान् परित्यज्य व्याख्यानान्तरं मया लिख्यते ।' इति श्लोकस्य प्रधानप्रतिपाद्यार्थः । "एतेन तत्र स्वारस्यं सर्वथा नास्ति' इति मया नोच्यते । 'अस्त्येव स्वारस्यम् । तदपरित्यज्य, तद् घटयित्वैव लिख्यते ।" इति उपरि वदन् स्वामी 'नाहं दूषणपरः । किन्तु लोकानुग्रहायैव निष्पक्षपातं प्रामाणिकत्वाप्रामाणिकत्वसारासारविवेचनं कृत्वा अप्रामाणिकासारपरित्यागेन प्रामाणिकसारग्रहणेन च अभिनवं व्याख्यानं करोमि' इति स्वस्य परममार्जवं प्रकाशयति । एवं वस्तुतत्त्वे स्थिते

1 'श्रीभाष्यादिविरुद्धमेव तत्' इति श्लोकोक्तं श्रीभाष्यादिविरुद्धत्वं सर्वथा अविद्यमानं कृत्वा

2 'स्वारस्यं परिगृह्य तद्गतम्' इति स्वारस्यकीर्तनमात्रेण स्वारस्यातिशय एवोक्त इति,

3 अयमस्य तत्स्वारस्यावगमो दाक्षिणात्याचार्यमुखादेवाधिगत इति,

4 पत्रेक्षितो वा व्यर्थः स्यादिति शास्त्रे एवंविधेष्वपि विषयेषु प्रवर्तत इति,

2 प्रकीर्णकम् ।

1 काञ्चीमण्डले अस्ति कश्चित् "आक्कूर्" नाम श्रीवैष्णवाग्रहारः । तन्निवासिनः सर्वे तेन्कला आसन् । तत्र शताद्वत्सरेभ्योऽर्वाचीन एव काले वेदवित् शास्त्रज्ञः धर्मशास्त्रे गाढपरिचयश्च महान् कश्चिदासीत् । 'अण्णा' इति स प्रथित इत्याचक्षते । तस्मिन् आग्रहारिकाणां सुमहद्गौरवम्, अभ्यधिका भक्तिः ।

स कस्मिंश्चिद् दिने स्नातुं गतः स्नात्वा धृतवस्त्रः तदवधि धृतं तेन्कलापुण्ट्रं परित्यज्य वडकलापुण्ट्रं धारयति स्म । तदर्शिन इतरे एकगृहस्थवर्जं सर्वे तेन अनादिष्टा अपि स्वयमेव तद्वत् वडकलापुण्ट्रमधारयन् । स पुनर्गृहस्थः तं महान्तमुपेत्य कथमेवं सम्प्रदायान्तरे आदरः ? इत्यन्वयुङ्क्त । तस्मै सः "स एव प्रामाणिकः पारमार्थिकः सम्प्रदायः । तथा मम निश्चयः । तेनाहं तं आश्रितवानस्मि । इतरानहं न निर्बध्नामि ।" इत्युत्तरमदात् । तदा प्रभृति तमेकं कुटुम्बिनं वर्जयित्वा अन्ये सर्वे वडकला एव विराजन्ते । अस्यैवाग्रहारस्य नाम्ना "आक्कूर् आण्डवन्" इति प्रसिद्धः श्रीरङ्गे महति आचार्यपदे स्थितः उपदशेभ्यो वर्षेभ्यः प्राक् परमपदं प्रपेदे । विदुषां प्रमाणशरणानां धीराणामेवं स्थितिर्भवति ।

2 तेन्कलाश्रीवैष्णवेषु च अद्यापि केचित् सन्ति, ये वडकला श्रीवैष्णववदेव वेदाध्ययनवैदिककर्मानुष्ठानादिषु कुलपरम्परयाऽत्यन्तं श्रद्धालवो भवन्ति ।

3 'रामानुजदयापात्रम्' इतीदं पद्यं कुत्सयन् अग्निबीजेन उपक्रान्तमिदमित्याह । मूर्खा भ्रातरः परस्परं भण्डभाषया निन्दन्तः मातापितृनिन्दाकारिणो भवन्तीति पश्यामः । तथेदं भवति 'जगत्प्रथममङ्गलं

भगवतो नाम यद् राम इति लक्ष्मणस्य श्रीकृष्णस्य श्रीमद्भाष्यकारस्य च यन्नाम रामानुज इति तदपि अग्निबीजोपक्रममेव । किं तदपि कुत्सितं तत्र भवान्मन्यते न चेत् तदुपक्रमस्य पात्रपद्यस्य को दोषः ? अहो बत अविवेकितायाः साम्राज्यम् ।

'कंसस्योदरे अग्निवत् स्थित हे भगवन्' इति भगवत उपमानतया तत्रभवत्या श्रीगोदादेव्या निर्दिष्टं, विद्यास्थानेषु सर्वेषु अङ्गितया प्रधानभूता ये वेदाः तेष्वपि सर्वत्र प्रथमनिर्देशभाक्त्वेन प्रधानभूतो य ऋग्वेदः तेन सर्वादौ 'अग्निमीळे पुरोहितम्' इत्याम्नायमानं, आसुरराक्षसप्रकृतीनां दाहकत्वेन यायजूकानां हव्यवाहत्वेन च सुप्रसिद्धं देवमग्निं बोधयताऽक्षरेण उपक्रम्यमाणमिदं परमशोभनमिति आशंसायां कर्तव्यायां साक्षाद् वैपरीत्येन निन्दां कुर्वन् विपर्यस्तमतिः शोच्यः ।

अपि च अग्निबीजं ह्रस्वघटितम् । इह तु दीर्घोऽवर्णः स्थितः पञ्चोपनिषन्मन्त्रश्चायम् । तदिह दुर्भेदो भ्रान्तिग्रन्थिः कपिरपि चेति न्यायेन पूर्वपक्षिणमत्यन्तमाकुलयति ।

4 नाच्चियार्-कोविल् इति सम्प्रति प्रथितं कुम्भघोणसमीपवर्ति दिव्यक्षेत्रं तिरुमङ्गै आळ्वार् इति प्रसिद्धेन परकालसूरिणा स्वकीये महति दिव्यप्रबन्धे सर्वक्षेत्रान्तरवैलक्षण्येन दशभिर्दशकैः स्तुतम् । तत्र श्रीवञ्जुलवल्लीनायिकासमेतेन भगवता श्रीनिवासेन सहैव सर्वदा गर्भगृहे निगमान्तमहादेशिको विराजते । तत्र अस्य कालात् प्रभृति एतत्कृतव्यवस्थानुरोधेन अविच्छिन्नः रामानुजदयापात्रपद्यपाठपर्यवसानोपक्रमोपसंहारः प्रबन्धपारायणक्रमः अद्याप्यनुवर्तते । तत्र गोष्ठ्यां तेन्कलाजनैः तूष्णीं सन्निहितैरपि न भाव्यम् । प्रबन्धपारायणाधिकारवन्तः तदर्थसर्वबहुमानभाजश्च वडकला एव ।

कलहमुपक्रम्य तेन्कलाः १८४५ वत्सरे न्यायस्थले व्यवहारमकुर्वन्। तत उपर्युपरि बहवो व्यवहाराः। उत्तमाधिकरणपर्यन्तं गत्वा अन्ततः (१८९२-९५) अन्याय्यं अन्याय्यमित्येव निर्धारितं दृष्ट्वा शान्ता अभवन्।

के भगवन्मुखोल्लासाय चिरात् स्वभावतो दिव्यप्रबन्धपारायणमाद्रियमाणाः, के स्पर्धामात्रवशेन पश्चात् तत्र प्रदर्शिताभिमाना इति तत्त्वतो वेदितुमिच्छद्भिः एतत्क्षेत्रस्था स्थितिः सम्यक् पर्यालोचनीया।

5 अत्र कस्मिंश्चिद्दृशके (६. ५-५)

वेदांश्चतुरो यज्ञान्
पञ्च षडङ्गानि ये स्वरान् सप्त।
दक्षाः सञ्चारयितुं
तैरास्थितमधिवसन् प्रभुर्नरैयूर्॥

इत्येवमर्था परकालसूरिश्रीसूक्तिर्दृश्यते। नरैयूर् इति प्राचीनं नाम तस्य क्षेत्रस्य। एवं साङ्गवेदाध्यायिभिः पञ्चमहायज्ञानुष्ठाननिरतैश्च श्रोत्रियाग्रेसरैरध्युषितत्वेन क्षेत्रस्य तद्वासिनो भगवतश्च वैशिष्ट्यं प्रतिपादयति दिव्यप्रबन्धे वयमेव भक्तिभाजः नान्य इति यदि वेदयज्ञविद्वेषपरित्यागादिकमेव स्वस्वरूपनिरूपकधर्मं मन्यमाना वदन्ति तत्र किं बुद्धिमन्तः तत्त्वप्रतिपत्तिं प्रति क्लेशमनुभविष्यन्ति?

6 यस्योत्सङ्गे बलिविजयिनस्तस्य मञ्जीरवान्तं
पाथो दिव्यं पशुपतिजटास्पर्शशून्यं विभाति।

इति हंससन्देशे देशिकेन नूपुरगङ्गायाः पशुपतिजटास्पर्शशून्यत्वेन विशेषप्रतिपादनात् भागीरथ्या अशुद्धिरुक्ता भवतीत्यपि केवला भ्रान्तिरेव।

अनुज्झितक्षमायोगमपुण्यजनबाधकम्।
अस्पृष्टमदरागं तं रामं तुर्यमुपास्महे॥

इत्यत्र देशिकेन पूर्वेषां त्रयाणां रामाणां यात्रानपकर्ष उक्तः तावानेवेह त्रिपथगाया इति श्रुण्णमहाकविमार्गाणां सुमनसां सुग्रहमेतत् ।

7 शास्त्ररत्नाकर श्री कोळियालंशठकोपाचार्येण न्यायमीमांसाशिरोमणिना सम्पादितस्य अचिरप्रकटितस्य विधित्रयपरित्राणस्योपोद्घाते तत्कर्त्रा वेङ्कटाध्वरिणा कृतानां ग्रन्थानां प्रस्तावावसरे एवमुक्तं दृश्यते—

'एवमनेन तिरुवायमोलिनामकस्य श्रीशठकोपमुनिकृतस्य द्राविडभाषामयगाथासहस्रस्य संस्कृतभाषायां विवर्तरूपः कश्चन प्रबन्धोऽपि कृतोऽस्तीति श्रूयते । तत्र ग्रन्थे स्थितमेकं पद्यमपि श्रुतमिति डाक्टर् एम्. कृष्णमाचार्यैः (M. A.) स्वकीये संस्कृतग्रन्थजातचरिते (Classical Sanskrit Literature) निर्दिष्टं विद्यते । तत्पद्यरूपं त्वित्थम्—

लोकं पुष्कलमेकनायकतया ये शासितारो नृपाः
श्यामाङ्केन शुना प्रदष्टचरणास्ते भग्नभिक्षाघटाः ।
अस्मिन् जन्मनि सार्वलौकिकतया भिक्षामटन्ति स्वयं
श्रीनारायणपादसेवनरता भो भोः समुज्जीवताम् (त)॥
(ओरु नायकमायोड)

इति । स्वसम्प्रदायेऽनुवृत्तेन दिव्यप्रबन्धप्रावण्यातिशयेन प्रेरितो हि वेङ्कटाध्वरी एवं तस्य संस्कृतानुवादे स्वयं प्रावर्तत । सः स्वकीयानां तत्र अनादरं स्थितमावेदयतीति वचः कस्य श्रद्धेयं भवेत् ।

8 लोकाचार्यकृते 'तनिप्रणव'रहस्ये एवं दृश्यते—

"अथ च केचिदाचार्याः एवमाचक्षते । कथमिति चेत्—अपत्नीकस्य यागान्वय इव प्रधानमहिषी व्यतिरेकेण राज्ञोऽभिषेक इव च अस्य (भगवतः) रक्षकत्वशेषित्वे लक्ष्मीव्यतिरेकेण न स्त इति ।

वेदान्तिमुनिः (नञ्जीयर्) अस्यार्थस्य प्रतिपादनावसरे "देव्याः

सत्तासिद्धिर्भगवता । भगवतो निरूपकसिद्धिः देव्या ।" इत्यन्वग्रहीत् ।"

इति । एतेन देवीसहितस्यैव भगवतो रक्षकत्वं, न केवलस्येति प्राचामाचार्याणां सिद्धान्त इति स्पष्टम् ।

9 तनिद्वयरहस्ये—

तदनेन मोक्षोपायः प्रपदनमित्येतत् प्रपत्त्यधिकारी मुमुक्षुरित्येतच्चोक्तं भवति ।

इति स्पष्टं प्रपत्तेरुपायत्वमुक्तम् ।

10 चोलसिंहपुरमिति प्रसिद्धे घटिकाचलक्षेत्रे वसन्तः चण्डमारुतकर्तृमहाचार्यवंश्याः प्रपत्तिमनुतिष्ठन्त एव वर्तन्त इति ज्ञायते ।

11 तथा यदुगिरिवासिनोऽपि । एते च एतं विषयं प्रति अनुयुक्ताः, 'देशिककृतं निरूपणमभ्युपेत्य पेरियवाच्चान्पिल्लै (चतुर्विंशतिसहस्रीकारः श्रीकृष्णपादगुरुः) निष्कम्पं प्रपत्तिमवश्यमनुष्ठातव्यां मेने । तस्मात् तदा प्रभृति तदनुष्ठानमविच्छिन्नमत्र प्रवर्तते' इत्यवोचन् इति श्रूयते ।

12 "नीळातुङ्गस्तनगिरितटी' इति गोदातनियन्-पद्यं व्याचक्षाणो लोकार्यः 'नम इदमिदं भूय एवास्तु भूयः' इत्यत्र 'नारायणाय नमः' इति प्रणम्योत्थायोत्थाय पुनः पुनः प्रणम्य" इति भगवद्भाष्यकारश्रीसूक्तिमुदाहरति । ततः कायिकसकृत्प्रणामनिर्बन्धोऽत्यन्तमर्वाचीन इति निस्सन्धिरयमेतत् ।

13 'सेतौ स्नानं न कर्तव्यम्' इति तु देशिका अभिप्रयन्ति—'तं वीक्ष्य सेतुमधुनाऽपि शरीरबन्धः सर्वे षड्ऊर्मिबहुलं जलधिं तरन्ति' इति ।

इति लिखति । वीक्षणमत्राभिहितम्, न स्नानम् । अतोऽत्र स्नानप्रतिषेधोऽभिसंहित इति विप्रलम्भको व्याचष्टे । 'स्तोष्यामि नः कुलधनम्'

'नमो नमो वाङ्मनसातिभूमये' इति यामुनाचार्यः भगवत्पूजां प्रतिषेधति। स्तुतिनमस्कारमात्राभिधानात्। तदतिरिक्तार्घ्यपाद्याचमनीयधूपदीपनैवेद्यादिसमर्पणानभिधानेन तत्प्रतिषेधप्रतीतेः। इति कुतो न भवति। हन्त काष्ठागते जाड्यकौटिल्ये।

श्लोकानां अथवा यस्य कस्यापि वाक्यस्य अर्थप्रतिपादने 'स्वयमपि न विबुध्यते सुतोऽयं सुमतिजनस्य शृणोति नापि वाचम्' इतीयं पूर्वपक्षिणः स्थितिः।

'वेदान्तदेशिकपदे विनिवेश्य बालं
देवो दयाशतकमेतदवादयन्माम्।'

इत्यत्र बालमिति वयःपरमेवेति प्रतिजानीते। देवो दयाशतकं मां अवादयत्, नाहं स्वयमवदमित्यस्य वाक्यार्थस्य वयोविशेषो वा उपयुक्तः समुचितयोग्यताराहित्यं वेति पर्यालोचयितुं स्वयं तपस्वी न क्षमः। सर्वज्ञताभिमानाध्मातहृदयत्वाच्च परप्रश्नकथा नास्ति। निर्लज्जत्वान्निर्भयत्वाच्च असम्बद्धार्थस्य उच्चैर्घोषः।

14 तेनकलापुण्ट्रः शूर्पाकार एव। हरिपादाकृतित्वादरे स पुण्ट्रः कथमपि न सेत्स्यतीति निरूपितवन्तः स्मः। तत्रेदमपि द्रष्टव्यम्। नासिकायां अङ्गुलद्वयपरिमाणं पुण्ट्रस्य पूर्वपक्षी अभ्युपगच्छति।

ललाटे कण्ठदेशे तु स्कन्धयोश्च त्रिके तथा।
चतुरङ्गुलमानानि पञ्च पुण्ट्राणि धारयेत्॥

इति सच्चरित्ररक्षायां ललाटपुण्ट्रस्य चतुरङ्गुलपरिमितत्वे वचनमुदाहृतम्। तत्र यदि नासिकायां अङ्गुलद्वयं क्रियते तर्हि अङ्गुलद्वयमेव ललाटे कार्यमिति अर्धललाट एव पुण्ट्राग्रमवतिष्ठेत। न चैवं भवतीत्येतदपि तस्याप्रामणिकत्वे लिङ्गमिति प्रामाणिकाः प्रतिपादयन्ति।

वृश्चिकान् सृज सर्वत्र सर्वेश्वर न तं जनम्।
असङ्गतैकलेखाय ध्रियते येन लेखनी॥

इति प्रकीर्णकपरिच्छेदः।

इति परिशिष्टकाण्डः।

सुग्रहत्वाय आचार्याणां अन्येषां च काल इह-निर्दिश्यते—

		आङ्गलशकः
1	श्रीनिगमान्तमहादेशिकः	१२६८—१३७०
2	श्रीब्रह्मतन्त्रस्वतन्त्रस्वामी (1) (रामानुजदयापात्रपद्यकारः) जीवितकालः	१२८६—१३८६
	आस्थान ...	१३६०—१३८६
3	द्वितीयब्रह्मतन्त्रस्वतन्त्रस्वामी । आस्थानम् द्वादशसहस्रीगुरुपरम्पराकारः तत्र उत्तरार्धे रामानुजदया-पात्रमित्यादिश्लोकपञ्चकस्य अन्येषां सर्वेषां दिव्यप्रबन्ध-तनियन्-पद्यानां च व्याख्यानकारः ।	१३८६—१३९४
4	ज्ञानाधिब्रह्मतन्त्रस्वतन्त्रस्वामी । (15) आ-म् उपनिषद्भाष्यकारस्य रङ्गरामानुजस्वामिनः सन्न्यासाश्रम-प्रदः । पात्रपद्यव्याख्यातुः वात्स्याहोबिलाचार्यस्य आचार्यः	१६०७—१६१८
5	बृहत्परकालस्वामी (21) आस्थानम् दिव्यप्रबन्धव्याख्यानकारः । पात्रपद्यव्याख्यातुः चन्द्रगिरि-श्रीनिवासाचार्यस्य अन्तेवासी ।	१६७६—१७३७

1	राजवोडयार् महाराजः । शासनकालः	१५७८—१६१७
2	कण्ठीरवनरसिंहराजवोडयार् । राजा शासनम् महाराजः ... ... अस्य सकाशं प्राप्ते पात्रपद्यव्यवहारे राजवोडयार्-काला-त्प्रभृति अस्मत्पितृकालावधि यथा, तथा रामानुजदया-पात्रपद्यमेवानुसन्धेयमिति निर्णयं कृतवान् ।	१७०४–१७१४
3	कृष्णराजवोडयार् । राजा शासनम् अयं महाराजः तिरुपतिक्षेत्रवासिनं बृहत्परकालस्वामिनं मैसूर्-राज्यमानाय्य आश्रयति स्म ।	१७१४—१७३२

पुट.	पङ्क्ति
4	20
12	9
,,	12
13	20
14	2
,,	1
15	श्री
16	1
,,	1
,,	2
18	1
22	
,,	
24	
26	
28	
,,	
30	
,,	
31	
34	
35	

शोधनिका ॥

पुट.	पङ्क्ति	शुद्धम्	पुट	पङ्क्ति	शुद्धम्
4	20	(लुप्तः)	35	19	सुप्रसिद्धः।
12	9	गर्भित	39	1	यथायथा
,,	12	त्कार	,,	2	कौतूहलम्।
13	20	प्रतिष्ठापन	..	17	पात्रपत्रं
14	2	उपदेशतो वा	40	6	ह्युपादिशत्
,,	14	-वसानयोः	,,	15	इति
15	शीर्षके	कला	42	4	मूलभूत
16	1	निश्शङ्क	,,	22	प्रथम
,,	17	निरूपिता;	44	5	कृतं
,,	24	तिरु	,,	7	पात्रम्
18	13	यथापूर्व	,,	17	यथादृष्टं
22	10	विरहे	55	12	इति।
,,	19	वा मे	,,	15	यथाशील
24	8	दा भ	59	8	यथासम्भवं
26	20	मित्थमेवेति	,,	9	पूर्वं प्रतीयते।
28	7	लिखति। (ते	61	19	इदमपि
,,	10	किलेदम्।)	63	8	कृत्याकरणे च
30	15	अयं तु	64	24	देवा
,,	,,	"तेन्कला	66	15	स्तुतत्वं
31	20	स्वाचार्यं	69	20	तत् कस्य
34	22	तावता यं	81	20	कीर्नाम
35	16	ब्रयात्	82	10	ति पश्यन्त

पुट	पङ्क्ति	शुद्धम्	पुट	पङ्क्ति	शुद्धम
82	12	चिह्न	95	1	विपुलस्य व्या-
83	1	पुनःपुन			[ख्यानस्य
86	6	प्रपत्ति	,,	1	अपह्नोतुं
,,	7	"प्रपत्ति...या।	98	22	निष्ठेन।
,,	8	मुमुक्षोः	99	2	प्रतिपादयति।
,,	20	किंरूपा	,,	21	"कथं
89	18	शोका	102	19	विद्यते-पदं
90	2	औपचारिकश्चायं	105	22	प्रतिकथका इति
,,	6	स्थलेषु इत्यपादि।	108	20	विषयः।
93	1	प्रत्याक्रमणा	110	4	बह्वयो द्राविड
			115	24	प्रतिष्ठितं
			118	7	नस्यारम्भे
112	18	वाच्यम्।			
117	2	पद्यान्तर			
,,		इत्यादि-मिहिरस्य			
,,		"प्रमाणलेशेनापि रहिताः" (इदं २० पङ्क्तौ "आपाततः" इत्यतःपूर्वं पठनीयम्।)			
119	6	ग्रहणम्			

Srinivasa Press, Thiruvaiyaru.